पुरुषसूक्तम्

प्रतिपदार्थ-तात्पर्यसहित सायण-महीधर
उवट-भट्टभास्कर-श्रीरंगरामानुजस्वामि प्रभृतिभिः
विरचितभाष्योपेतम्

संस्कृत संशोधन संसत्
मेलुकोटे - ५७१ ४३१

संस्कृत-संशोधन-संसत् ग्रन्थमाला - ७९

पुरुषसूक्तम्

[प्रतिपदार्थ-तात्पर्यसहित सायण-महीधर-उवट-भट्टभास्कर श्रीरङ्गरामानुजस्वामि प्रभृतिभिः विरचितभाष्योपेतम्]

संस्कृत - संशोधन - संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१
२०११

वेद-आगम विभागः

पुरुषसूक्तभाष्यम्

संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रधानसम्पादकः
डा. भाष्यं स्वामी एम्.ए. पिएच्.डि., डि.लिट्.
निर्देशकः तथा सहकार्यदर्शी

प्रकाशनम्
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

सर्वेऽधिकाराः संस्कृतसंशोधनसंसदायत्ताः

प्रथमसंस्करणम् - २०११
प्रतयः - ५००
मूल्यम् : ₹ १३५-००

अक्षरसंयोजनम् - मुद्रणञ्च
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

Academy of Sanskrit Research series - 79

PURUṢASŪKTAM

[word by word meaning and synopsis, with commentaries of Sāyaṇa, Mahīdhara, Uvaṭa, Bhaṭṭa Bhāskara, SriRangaRāmānujaMuni]

ACADEMY OF SANSKRIT RESEARCH

MELKOTE - 571 431

2011

Veda-Āgama vibhāga

Puruṣasūktabhāṣyam

Academy of Sanskrit Research

Melkote - 571 431

Chief Editor

Dr. Bhashyam Swamy *M.A. Ph.D., D.Litt.*

Director & Joint Secretary

Publisher

Academy of Sanskrit Research

Melkote - 571 431

© With the publishers

First Edition : 2011

Copies : 500

ISBN 978-93-80900-14-8

PRICE : ₹ 135-00

Typeset & Printed at :

Academy of Sanskrit Research

Melkote - 571 431

संपादनमण्डली

प्रधानसम्पादकः

डा.भाष्यम् स्वामी एम्.ए. पिएच्.डि., डि.लिट्.

निर्देशकः तथा सहकार्यदर्शी

संस्कृत-संशोधन-संसत्

संपादकौ

विद्वान् एस्. नारायणः एम्.ए. (सं.) एम्.ए. (कन्नड)

संशोधनाधिकारी

अलंकारविद्वान्, विशिष्टाद्वैतवेदान्ताचार्य, राष्ट्रभाषाविशारदः

विद्वान् आर्. जनार्दनन् एम्.ए, एम्.फिल्

मीमांसाशिरोमणी

सहसंपादकः

विद्वान् एस्. कृष्णन् एम्.ए. बि.एड्

विशिष्टाद्वैतवेदान्ताचार्य

संशोधनसहायकौ

श्री के. श्रीनिवासन् बि.ए.

श्रीमती वि. शशिकला एम्.ए.

कार्यनिर्वाहककार्यदर्शी

श्री एस्. कुमारः एम्.कां.

कुलसचिवः (कार्यविभागः)

Editorial Board

Chief Editor

Dr. Bhashyam Swamy MA. Ph.D. D.Litt.

Director and Joint Secretary

Academy of Sanskrit Research

Editors

Vidvan. S. Narayana M.A (San) M.A. (Kan)

Research officer

Alaṅkāra vidvān, Viśiṣṭādvaitavedāntācārya, R.B.V.

Vidvan. R. Janardanan M.A. M.Phil

Mimāṃsāśiromaṇi

Co-Editor

Vidvan. S. Krishnan M.A. B.Ed.

Viśiṣṭādvaitavedāntācārya

Research Assistants

Sri K. Srinivasan B.A

Smt. V. Shashikala M.A.

Executive Secretary cum member

S. Kumara M.Com.

Registrar (Administration)

आमुखम्

श्रुतिः स्मृतिः ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते ।

आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ।।

इत्युक्तरीत्या साहित्यप्रपञ्चे प्रथमं स्थानं श्रुतेरेव इति निश्चप्रचम् । **'वेदोऽखिलो धर्ममूलम्'** इति धर्मे प्रथमप्रमाणभूतो वेद एव इति स्मरन्ति ।

एतादृशप्रथमप्रमाणभूतवेदेषु ऋग्यजुस्सामअथर्वणाख्यप्रमाणचतुष्टयं अङ्गीक्रियते । तादृशप्रमाणभूतवेदचतुष्टयेऽपि पुरुषसूक्तं हि नाम भगवतः पुरुषोत्तमस्य अनितरसाधारणं प्रभावमधिकृत्य प्रवृत्तं वैदिकं सूक्तम् । पुरुषशब्दो निरुपाधिप्रयुज्यमानो वैदिकलौकिक-प्रसिद्धिप्राचुर्यात् भगवति वासुदेवे रूढ इति सर्वप्रामामिकसंप्रतिपन्नः सिद्धान्तः । **'अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेय'** इत्युपनिषदि **'हवै'** इति प्रयोगः पुरुषपदस्य नारायणे प्रसिद्धिप्राचुर्यं द्योतयति । पुराणेषु च -

'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।

निरुपाधी च वर्तेते वासुदेवे सनातने ।

तं विना पुण्डरीकाक्षं कोऽन्यः पुरुषशब्दभाक्' ।

इत्यादि पठ्यते । एवं अर्वाचीनाः कवयोऽपि -

नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।

अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते ।।

'तमसः परमाद्यमव्ययं पुरुषं योगसमाधिना रघुः' । इत्यादि प्रयुञ्जते ।

तच्चेदं पौरुषं सूक्तं चतुर्ष्वपि वेदेषु परिपठ्यते । यथा ऋग्वेदसंहितायाम् (१०-९१); तैत्तिरीयारण्यके (३-१२); वाजसनेयसंहितायाम् (३१) सामवेदारण्यसंहितायां (४-३); अथर्वसंहितायां (१९-६-३) च पठितमिदम् । एवमस्य सार्वभौमं प्रामाण्यं प्रतिष्ठितं भवति । तथा चाह भगवान् बादरायणो मोक्षधर्मे-

'इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ।

अतः श्रुतिभ्यः सर्वाभ्यो बलवत्समुदीरितम्' ।। इति ।

एवं शौनक-आपस्तम्ब-बोधायनादयो महर्षयः पुरुषसूक्तमन्त्राणां जपहोम-पूजाप्रायश्चित्तादिषु बहुधा विनियोगमाचचक्षिरे ।

तच्चेदं सूक्तरत्नं तत्तत्संप्रदायप्रवर्तकैः अभियुक्तैः बहुधा व्याख्यातम् । अस्माकं संस्कृत-संशोधन-संसत् पुरुषसूक्तभाष्येऽस्मिन् सायणाचार्य भट्टभास्कराचार्य उवट महीधराचार्य तथा श्रीरङ्गरामानुजमुनिप्रभृतिभिः अनुगृहीतानि भाष्याणि, विशेषांशनिरूपणपरां टिप्पणीं च संयोज्य प्रकटयितुं क्रमेण संनह्यति ।

वेदागमविभागे प्रकाशनं करणीयमिति सङ्कल्प्य आचार्यानुग्रहवशात् प्रप्रथमतया वेदभागे पुरुषसूक्तस्य विमर्शकात्मकं संपादनं क्रियते । इह तु यावन्ति प्रसिद्धानि भाष्याणि सन्ति तान् सङ्कलय्य प्रकटनात् जिज्ञासमानानां पाठकानां कृते भूयात् भूयानुपकार; इति दृढं विश्वसिमः ।

मितज्ञैः मितशक्तिभिरपि दुःसाधेऽस्मिन् महत्तरे वेदभाष्यप्रकाशनकृत्ये समुद्रतरणे इव यैः कर्णधारायितं श्री.एस्. नारायणः, तथा संशोधकाः श्री जनार्दनन्, श्री एस्. कृष्णन् तेभ्यः हार्दाः धन्यवादाः । तथा कुलसचिवचरत्वेन कार्यविभागतः प्रोत्साहं कृतवद्भ्यः श्रीकुमारमहाभागेभ्यश्च हार्दं कार्तज्ञ्यम् ।।

इति विद्वद्वशंवदः

डा. भाष्यं स्वामी

निर्देशकः तथा सहकार्यदर्शी

संस्कृत संशोधन संसत्

प्रस्तावना

पुरुषसूक्तं हि नाम - भगवतः पुरुषोत्तमस्य अनितरसाधारणं प्रभावमधिकृत्य प्रवृत्तं वैदिकं सूक्तम् । **'पुर अग्रगमने'** इति धातोः **'पुरः कुषन्'** उ.सू.५२३ इत्यनेन सूत्रेण निष्पन्नः पुरुषशब्दः । ब्रह्मपुराणे पुरुषशब्दार्थः एवं प्रतिपादितः -

परः स पुरुषो ज्ञेयो ह्यव्यक्तोऽक्षर एव तु ।

अपरश्च क्षरस्तस्मात्प्रकृत्यन्वित एव च ।

निराकारात्सावयवः पुरुषः समजायत ।। इति । भगवद्गीतायामपि -

'पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्' । इति च प्रतिपादितः ।

पुरुषशब्दो हि निरुपाधिकत्वेन प्रयुज्यमानः वैदिकलौकिकप्रसिद्धिप्राचुर्यात् भगवति वासुदेवे रूढ इति सर्वप्रामाणिकसंप्रतिपन्नः सिद्धान्तः । **'पुरुषो ह वै नारायणोऽकामयत, अतितिष्ठेयं सर्वाणि भूतानि अहमेवेदं सर्वं स्याम्'** (श.ब्रा.१३-६-१-१) इति श्रुत्या **'अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति'** इति नारायणोपनिषदि **ह वै** इति प्रयोगः पुरुषपदस्य नारायणे प्रसिद्धिप्राचुर्यं द्योतयति । पुराणेऽपि-

'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।

निरुपाधी च वर्तेते वासुदेवे सनातने' ।। इति ।

सूक्तशब्दस्य स्तोत्रमित्यर्थः । पुरुषं स्तौतीति पुरुषसूक्तम् ।।

पुरुषसूक्तस्य वेदसारत्वम् -

यतो हि सर्वे ब्राह्मणाः वेदाध्ययने प्रवृत्ताः पुरुषसूक्ताध्ययनशालिनः समवलोक्यन्ते । सर्ववेदसारत्वात् पुरुषसूक्तस्य अध्ययनेनैव सर्ववेदपारायणफलं सेत्स्यतीति च त्रयीवृद्धानां मतं महीयते । इदमेव मोक्षधर्मे प्रतिपादितम् -

'इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ।

अतः श्रुतिभ्यः सर्वाभ्यो बलवत्समुदीरितम्' ।। इति ।

अत एव उक्तं पाद्मे -

'वेदेषु पौरुषं सूक्तं पुराणेषु च वैष्णवम् ।

भारते भगवद्गीता धर्मशास्त्रेषु मानवम्' ।। इति ।

वेदानां स्वरउच्चारणस्य आवश्यकत्वं उच्यते -

'अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित् ।

एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति' ।।

अत्र स्वरसहितेनैव वेदशब्दोच्चारणः कर्तव्यः इत्यभिधीयते । स्वरमन्तरेण पठ्यते चेत् अनर्थावहं भवति इति पाणिनीयशिक्षायां सोदाहरणेन प्रतिपाद्यते-

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' ।।

इति त्वष्टृ उपाख्यानमनुसन्धाय स्वरबद्धवेदाभ्यासस्य मुख्यत्वं वर्ण्यते । तादृश स्वराणां भेदाः नारदीयशिक्षायां निरूपिताः -

'उदात्तश्चानुदात्तश्च स्वरितप्रचितौ तथा ।

निघातश्चेति विज्ञेयः स्वरभेदास्तु पञ्चधा' ।। इति ।

इमे पञ्चविधाः स्वराः सामान्यतः ऋग्यजुरथर्ववेदेषु उपयुज्यन्ते । सामवेदे तु इतोऽप्यधिकाः सप्त स्वराः सन्ति। क्रुष्टप्रथमः, प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, मन्त्रः, अतिस्वार्यः इति भेदात् । सङ्गीतशास्त्रेऽपि उदात्तादिस्वराधारत्वेनैव निषादादिस्वराः जायन्ते इति नारदीये उपपाद्यते -

'उदात्तो निषादगान्धारावनुदात्त ऋषभधैवतौ ।

स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः' ।। इति ।

स्वरपरिज्ञानेन सह वेदमन्त्राणां ऋषिछन्दोदेवतानां परिज्ञानं, मन्त्रार्थज्ञानञ्च संपाद्य तत्स्मरणपूर्वकं मन्त्रपठनं करणीयमिति विधीयते । तदेव वीर्यवत्तरं भवतीति उद्घोष्यते स्मृत्यन्तरे -

आर्षं छन्दो दैवतञ्च विनियोगस्तथैव च ।

वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ।।

अविदित्वा तु यः कुर्याद्यजनाध्ययनं जपम् ।

होममन्त्रजपे दानं तस्य चाल्पफलं भवेत् ।।

यो विजानाति मन्त्राणामार्षं छन्दश्च दैवतम् ।

विनियोगं ब्राह्मणञ्च मन्त्रार्थं ज्ञानकर्म च ।। इति ।

अन्यत्रोपात्तानां शब्दानां वाक्यानाञ्च यथास्थानमुपयोगः विनियोगः ।

नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम् ।

प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यते ।।

एकैकस्य ऋषेः सोऽपि वन्द्यो ह्यतिथिवत् भवेत् ।

देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः ।। इति ।

'ऋषि, दैवत, छन्दांसि अविदित्वा यः अधीते, अनुब्रूते, जपति, जुहोति, यजते, याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवति । अथान्तरा अश्वगर्ते वापद्यते, स्थाणुं वर्च्छति, प्रमीयते वा पापीयान् भवति । अथ विज्ञायैतानि योऽधीते तस्य वीर्यवत्, अथ यो अर्थवित् तस्य वीर्यवत्तरं भवति, जपित्वा, हुत्वा, इष्ट्वा तत्फलेन युज्यते' इति । ऋष्यादि ज्ञानमूलक जपादीनां विशेषफलमिति वर्णितम् -

अर्थज्ञाने ऋषिज्ञानं भूयिष्ठमुपकारकम् ।

वक्ष्यन्त ऋषयस्तस्मात् स्वरूपस्थास्तु देवताः ।।

ऋषिनामार्षगोत्राणां ज्ञानमायुष्यमुच्यते ।

पुत्र्यं पुण्यं यशस्यं च स्वर्ग्यं धन्यममित्रहम् ।।

(यैः ईश्वरध्यानानुग्रहाभ्यां महता प्रयत्नेन मन्त्रार्थस्य प्रकाशितत्वात् तत्कृत महोपकारस्मरणार्थं तन्नामलेखनं मन्त्रस्योपरि कर्तुं योग्यमस्ति ।)

'वेदितव्यं दैवतं हि मन्त्रे मन्त्रे प्रयत्नतः ।

दैवतज्ञो हि मन्त्राणां तदर्थमवगच्छति ।।

न हि कश्चिदविज्ञाय याथातथ्येन दैवतम् ।

लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते ।।

अर्थमिच्छन् ऋषिर्देवं यं यमाहार्यमस्त्विति ।

प्राधान्येन स्तुवन् भक्त्या मन्त्रस्तद्देव एव सः ।।

देवतातत्त्वविज्ञानं महता तपसा भवेत् ।

शक्यते किमस्माभिर्याथातथ्येन भाषितम्'।। इति ।

तस्मात् पुरुषसूक्तादि वैदिकमन्त्रपठनकाले तत्तत्ऋष्यादीन् ध्यात्वा मन्त्रार्थं च स्मृत्वा मन्त्रः प्रयोक्तव्यः इति सिद्धम् ।।

पुरुषसूक्तप्रतिपाद्यं परं ब्रह्म -

पुरुषसूक्ते महापुरुषः सर्वव्यापित्वेन सर्वकारणत्वेन सर्वात्मत्वेन च प्रतिपादितः **'स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम्', 'पुरुष एवेदं सर्वं, यद्भूतं यच्च भव्यम्', 'सर्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वाऽभिवदन् यदास्ते' ।** इत्यादि वाक्यैः । वेदान्तवाक्येषु उपनिषत्सु तावत् जगज्जन्मादिकारणं सर्वव्यापि सर्वात्मभूतं

परं ब्रह्म आम्नातम्- **'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति'** इत्यादिषु । अतः पुरुषसूक्तोक्त महापुरुष एव वेदान्तवेद्यं परं ब्रह्मेति शक्यनिर्णयम् । किञ्च- परब्रह्मवेदनस्य मोक्षहेतुत्वं श्रूयते तैत्तिरीयोपनिषदि- **'ब्रह्मविदाप्नोति परम्'** इति । पुरुषसूक्ते तु इतरोपायनिषेधपूर्वकं महापुरुषवेदनस्य मोक्षहेतुत्वं श्रुतं- **'तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते'** ।। इति । तस्मात् महापुरुष एव परं ब्रह्मेति निश्चीयते ।।

पुरुषसूक्तस्य उपनिषदश्च एकार्थता -

मुण्डकोपनिषदि अक्षरात् परतः परः दिव्यः पुरुषो यः परविद्यावेद्यत्वेन श्रुतः, छान्दोग्ये च अन्तरादित्यविद्यायां यो हिरण्मयः पुण्डरीकाक्षः पुरुषविशेषः उद्गीथोपासनत्वेन श्रुतः, यश्च श्वेताश्वतरे महापुरुषः सत्वप्रवर्तकत्वेन श्रुतः, यः प्रश्नोपनिषदि त्रिमात्रप्रणवालम्बनोपासनगम्यत्वेन मुक्तेक्षणकर्मत्वेन च जीवघनात् परात्परः पुरुषः पुरिशेते इति श्रुतः, यश्च तैत्तिरीयके आनन्दमयोऽमृतो हिरण्मयः पुरुषाकारः शारीर आत्मा श्रुतः । स एव पुरुषः पुरुषसूक्ते प्रतिपादितः मुक्तेश्वरत्वेन **'उतामृतत्वस्येशानः'** इति । मुक्तेश्वरत्वं च महापुरुषस्य नारायणस्यैवेति सर्वत्रय्यन्तवृद्धसम्मतम् । तस्मात् उपनिषदैकार्थ्यं पुरुषसूक्तस्य भवति इति सुप्रतिष्ठितम् ।।

पुरुषसूक्तस्य महत्वम् -

जगत्कारणभूतस्य भगवतो महापुरुषस्य वैभवम्, सृष्टियज्ञं, देवमनुष्यपशु-पक्ष्यादिलोकसृष्टिः मोक्षोपायश्च पुरुषसूक्ते उच्यते । तादृशं पुरुषसूक्तं हि वेदेष्वन्तर्भवति । वेदास्तु परमात्मनः उच्छ्वासनिश्वासैवेति प्रसिद्धिः । महाभारते शान्तिपर्वण्यपि एवमुच्यते ।

'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा' इति ।

इमा वेदशाखाः बह्व्यः सन्ति इति वेदेनैव श्रूयते- **'अनन्ता वै वेदाः'** इति । एतासां ऋगादिवेदशाखानां सारांशत्वेन उपलब्धं पुरुषसूक्तं इति श्रीपाञ्चरात्रे लक्ष्मीतन्त्रे च उपबृंहितम् -

'मथ्यमानस्ततस्तस्मात्सामग्र्यजुषसंकुलात् ।
तत्सूक्तं पुरुषं दिव्यं दध्नो घृतमिवोत्थितम्' ।। इति ।

(ल.तं.५०-१३,१४)

इदं पुरुषसूक्तं सर्ववेदसारमिति कथं वक्तुं शक्यमिति चेत्? उच्यते महाभारते शान्तिपर्वणि -

'इदं पुरुषसूक्तं हि सर्ववेदेषु पार्थिव ।
ऋतं सत्यं च विख्यातं ऋषिभिः परिचिन्तितम्' ।। इति । (३३८-५)

ब्रह्मयज्ञानुष्ठाने हरिस्मरणपूर्वकं पुरुषसूक्तं जप्यते चेत् साङ्गोपाङ्गवेदोक्त फलं भवितुमर्हतीति विष्णुधर्मोत्तरपुराणे वर्णितः -

'ब्रह्मयज्ञे जपन् सूक्तं पुरुषं चिन्तयन् हरिम् ।
स सर्वान् जपते वेदान् साङ्गोपाङ्गविधानतः' ।।

इत्यादि प्राशस्त्यबोधकप्रमाणवचनेन सर्ववेदसारत्वं सिद्धम् ।।

पुरुषसूक्तस्य फलम् -

(पुरुषसूक्त होमफलमधिकृत्य सनत्कुमारसंहितायां उक्तमिति कटलङ्कुटि पण्डित नटेशशास्त्रिकृत पुरुषसूक्तस्य द्राविडव्याख्यां उद्धृतोऽयं विषयः)

'पूर्वं सनत्कुमारेण पृष्टो विष्णुस्सनातनः ।
उक्तवान् पौरुषं होमैर्विधानं कामदं नृणाम् ।।
वक्ष्यामि तदहं पुण्यं शृणुध्वं मुनिसत्तमाः ।
पुत्रप्रदमपुत्राणां जयदं जयकामिनाम् ।।
श्रीदं श्रीकामिनां पुंसां राज्यदं राज्यकामिनाम् ।
धान्यदं धान्यकामानां कीर्तिदं कीर्तिकामिनाम् ।।
भुक्तिदं भुक्तिकामानां मुक्तिदं मुक्तिकामिनाम् ।
बहुना किमिहोक्तेन सर्वसिद्धिप्रदं नृणाम्' ।।

इत्यादि ऐहिक, आमुष्मिकफलप्रदत्वं पुरुषसूक्तस्य अस्तीत्युपलभ्यते ।।

अस्मिन् ग्रन्थे उपलब्धवेदशाखासु पुरुषसूक्तमुद्धृत्य प्रथमभागे अध्ययन-पारायणादिसौकर्याय सस्वरं मूलपाठं ऋषिछन्दोदेवतासहितं ऋगादि वेदक्रमेण तत्तच्छाखानुसारं पुरुषसूक्तं दत्तमस्ति ।

द्वितीयभागे पुरुषसूक्तस्य मन्त्रार्थबोधकत्वेन प्रतिपदार्थः, तात्पर्यं, टिप्पणिसहितं ऋगादि क्रमानुसारेण वेदानुसारं प्राक्तनैः प्रसिद्धभाष्यकारैः सायण, उवट, महीधर, भट्टभास्कर, रङ्गरामानुजस्वामिभिः अनुगृहीतभाष्योपेतैः प्रकाशितमस्ति । श्रीरङ्गनाथमुनिकृत श्रीपुरुषसूक्तभाष्य - श्रीरङ्गरामानुजकृत पुरुषसूक्तभाष्ययोः बहुषुस्थलेषु साम्यमस्ति । भाष्यकारचरित्र्यस्थले एतद्विषयमधिकृत्य अत्रैव चर्चितमस्ति ।

भाष्यकारचारित्र्यम् -

१. सायणाचार्यः

सायणाचार्यः भारद्वाजगोत्रोत्पन्नः बोधायनसूत्रानुयायी । मातुः - श्रीमती, पितुः - मायणः। भ्रातरौ - भोगनाथः, माधवः । एतद्विवरणं पराशरस्मृतिटीकायाम् एवमुपलभ्यते ।

श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ।।
यस्य बोधायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजकुलं यस्य सर्वज्ञः स हि माधवः ।।

सायणाचार्यस्य त्रयः पुत्राः आसन् ते कम्पण, मायण, शिङ्गण प्रत्येकस्मिन् क्षेत्रे यथा सङ्गीतक्षेत्रे, कवितासामर्थ्ये, वेदपाठनेऽपि कुशलिनः अभवन् ।
तथा चोक्तं अलङ्कारसुधानिधौ -

तत् संव्यञ्जय कम्पण व्यसनिनः सङ्गीतशास्त्रे तव ।
प्रौढिं मायण । गद्यपद्यरचनापाण्डित्यमुन्मुद्रय ।।
शिक्षां दर्शय शिङ्गण ! क्रमजटाचार्यासु वेदेष्विति ।
स्वान् पुत्रान् उपलालयन् गृहगतः सम्मोदते सायणः ।। इति ।

सायणाचार्यस्य गुरवः :- सायणचार्यस्य विद्यातीर्थः, भारतीतीर्थः, श्रीकण्ठः इति त्रयः गुरवः आसन् । न केवलं सायणाचार्यस्य किन्तु सोदराणामपि गुरुत्वेन आसन् ।

जीवनचरित्रम् :- एकत्रिंशवयसि सायणाचार्यः राजप्रबन्धकमन्त्रित्वेन प्रतिष्ठापितः । १४०३ तः १४२२ पर्यन्तं हरिहरस्य अनुजस्य कम्पणस्य राज्यमन्त्री अभवत् । अनन्तरं प्रधानामात्यपदवीं अलङ्कृतम् । नववर्षं यावन्मन्त्रिपदवीमलङ्कृतमासीत् सायणाचार्येण । कम्पणकालादनन्तरं तस्य पुत्रस्य सङ्गमस्यापि शिक्षणं दत्वा समस्तां विद्यामपाठयत् सायणाचार्यः । सङ्गमोऽपि विनयीभूत्वा सायणाचार्यस्य कुशल अध्ययनद्वारा प्रौढशासकोऽभवत् । अलङ्कासुधानिधौ एवं वर्ण्यते !

सम्यक् शिक्षां सचिवगमितः शैशवे सायणार्यः ।
प्रौढिं गाढां प्रकटयति ते सङ्गमेन्द्रः प्रयोगे ।।

सायणाचार्यः न केवलं राज्यप्रबन्धकर्मणि कुशलः अपि तु राज्यविस्तारकर्मण्यपि जागरूक आसीत् । स यदा चत्वारिंशत् वर्षवयस्कः तदानीं राज्यव्यवस्थाभारं नीत्वा

अष्टवर्षपर्यन्त राज्यविस्तारकार्यं सम्पादितवान् अलङ्कारसुधानिधौ - शासनधुरिविषये, युद्धकौशलम् नीतिनैपुण्यं च एवं वर्ण्यते । यथा -

जगद्वीरस्य जागर्ति कृपाणः सायणप्रभोः ।
किमित्येते वृथाटोपा गर्जन्ति परिपन्थिनः ।।
समरे सपत्नसैन्यं सायण! तव बिम्बितं वहन् खड्गः ।
क्रीडति कैटभरिपुरिव बिभ्रत् क्रोडे जगत्त्रयं जलधौ ।।
अमुं शमितशास्त्रवत् स्थिरभुजावलेपोदयं
समीक्ष्य युधि सायणं समधिको भवेद् विस्मयः ।
नखाग्रहतवैरिणो नरहरेर्हरस्याथवा
नवाम्बुजदलोल्लसन्नयनमात्ररब्धद्विषः ।।

(वि.सं. १४२२ तः १४३७ षोडशवर्षाणि यावत् बुक्कस्य राज्ये सायणाचार्यः कार्यमकारि । अयं समयः सायणाचार्यस्य जीवने अतीव महत्वपूर्णमासीत् । यतो ह्यस्मिन् काले अनेन वेदभाष्यम् निरमायि । १४३८ वि.संवत्सरे बुक्कमहाराजस्य कालादनन्तरं तस्य पुत्रः हरिहरः सिंहासनेऽभिषिक्तः । क्रमानुसारं सायणाचार्येण तस्यापि मन्त्रित्वमङ्गीकृतम् । वार्धक्यवशात् बहुकालं मन्त्रित्वं न प्रत्यपादि । तदानीं तेषां वयः ६६ वर्षमासीत् । बौद्धिककर्मणि तेषां मस्तिष्कस्य अतीवोन्नतत्वात् तैः वैदिकसंहिताया अवशिष्टं भाष्यकर्म सम्पादितम् । ततः परं ब्राह्मणभाष्यकर्म प्रारब्धम् समाप्तं च ।

सायणाचार्यैः विरचितानि वेदभाष्याणि

१. तैत्तिरीयसंहिता (कृष्णयजुर्वेदस्य)
२. ऋग्वेदसंहिता
३. सामवेदसंहिता
४. काण्वसंहिता (शुक्लयजुर्वेदस्य)
५. अथर्ववेदसंहिता

ब्राह्मणग्रन्थानां भाष्याणि

(क) कृष्णयजुर्वेद ब्राह्मणभाष्यम् यथा -
१. तैत्तिरीयब्राह्मणम्
२. तैत्तिरीयारण्यकम्

(ख) ऋग्वेदस्य ब्राह्मणभाष्याणि यथा -

३. ऐतरेयब्राह्मणम्

४. ऐतरेयारण्यकम्

(ग) सामवेदस्य ब्राह्मणभाष्याणि यथा -

५. ताण्ड्य (पञ्चविंश) ब्राह्मणम्

६. षड्विंशब्राह्मणम्

७. सामविधानब्राह्मणम्

८. आर्षेयब्राह्मणम्

९. देवताध्यायब्राह्मणम्

१०. संहितोपनिषद्ब्राह्मणम्

११. उपनिषद्ब्राह्मणम्

१२. वंशब्राह्मणम्

(घ) शुक्लयजुर्वेदीयब्राह्मणभाष्यम् यथा -

१३. शतपथब्राह्मणम्

एवं प्रकारेण सायणाचार्यैः पञ्चसंहितासु त्रयोदशब्राह्मण आरण्यकग्रन्थानां भाष्यम् अलेखि । वेदभाष्यमतिरिच्य सायणाचार्यैः अनुगृहीताः इतरग्रन्थाः ।

१. सुभाषितसुधानिधिः

२. प्रायश्चित्तसुधानिधिः

३. आयुर्वेदसुधानिधिः

४. अलङ्कारसुधानिधिः

५. धातुवृत्तिः

६. पुरुषार्थसुधानिधिः

७. यज्ञतन्त्रसुधानिधिः

सायणाचार्यस्य जीवितावधिः -

(वि.सं. १४३८-१४४४) एवंप्रकारेण शारीरक-मानसिकदृष्ट्या पराकाष्ठां समधिगम्य ७२ वयसि १४४४ विक्रमसंवत्सरे दिवं जग्मुः सायणाचार्याः)

२. उवटाचार्यः

वेदभाष्यकाराणां मूध्ये उवटाचार्यः प्राचीनकालिकः इति गण्यते । तस्य जीवित कालः क्रिस्तशताब्देषु एकादशशताब्दः (१०१८ तः १०६०) इत्यूह्यते । किमर्थमिति चेत्

भोजराजस्तु तत्काल एव अवर्तत । तस्मिन् सन्दर्भे उवटाचार्यः स्वभाष्यम् अकारि । उवटार्यस्तु आनन्दपुरवासी । तस्य पितृपादः वज्रटः इत्यादिविवरणम् शुक्लयजुर्वेदस्य माध्यन्दिनसंहिताभाष्यावसाने पद्यरूपेण अलिखत्।

आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना ।
उवटेन कृतं भाष्यं पदवाक्यैः सुनिश्चितैः ।।
ऋष्यादींश्च नमस्कृत्य अवन्त्यामुवटोऽवसन् ।
मन्त्राणां कृतवान्भाष्यं महीं भोजे प्रशासति ।।

इत्युक्तप्रकारेण भोजराजस्य काल एव अस्य उवटस्य कालः इति विमर्शकानामभिप्रायः । उवटेन कृतवेदभाष्यस्य **'मन्त्रभाष्यमिति'** प्रसिद्धिः । उवटाचार्यस्य भाष्यम् नातिविस्तारोऽपि उज्ज्वलतया वर्तते । अनेकमन्त्राणां आध्यात्मिकार्थान् समीचीनतया न्यरूपयत् । पर्यायवाचिभिः शब्दैः अर्थाः निर्दिश्यन्ते; निर्दिष्टार्थसमर्थनाय श्रुतयः च उद्ध्रियन्ते, क्वचित् शब्दाः निरुच्यन्ते ।

उवटार्यैः अनुगृहीताः इतरग्रन्थाः -

१. ऋक्प्रातिशाख्यभाष्यम्
२. यजुःप्रातिशाख्यभाष्यम्
३. ऋक्सर्वानुक्रमणिभाष्यम्
४. ईशोपनिषद्भाष्यम्

३. महीधराचार्यः

मन्त्रभाष्यकर्तुः उवटाचार्यात् अर्वाचीनः । अयं शुक्लयजुर्वेदे माध्यन्दिन-शाखामधिकृत्य भाष्यं विरचितः । अस्य वेदभाष्यस्य नाम वेददीपः इति । अस्य सरणिः उवटमाधवभाष्यानुसारिणी । वचनमेव अत्र प्रमाणम् वेददीपभाष्यारम्भे तेनोक्तम् -

'प्रणम्य लक्ष्मीं नृहरिं गणेशं भाष्यं विलोक्यौवटमाधवीयम् ।
यजुर्मनूनां विलिखामि चार्थं परोपकाराय निजेक्षणाय' ।। इति ।

वेददीपभाष्ये तु मन्त्राः सविस्तरं सप्रसङ्गं व्याख्याताः; श्रुतिप्रमाणानि च उद्धृतानि, सलक्षणानि व्याकरणविधानानि च निर्दिष्टानि ।

महीधरेण कृतइतरग्रन्थौ द्वौ -

१. मन्त्रमहोदधिः (तन्त्रग्रन्थः) २. मन्त्रमहोदधिटीका इति । अस्य महीधरस्य कालः स्पष्टं न ज्ञायते । मन्त्रमहोदधिटीकायां एकं पद्यमस्ति । तद्द्वारा अस्य कालं गणयितुमर्हति । तदुक्तं च -

'अब्दे विक्रमतो जाते बाणवेदनृपैर्मिते ।

ज्येष्टाष्ठम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः' ।। इति ।

अस्याऽर्थः टीकायां उच्यते- पञ्चचत्वारिंशदुत्तरषोडशशततमविक्रम नृपाद्गते सति इत्यवगम्यते । एतद्रीत्या १५८७ वत्सरे मन्त्रमहोदधिः पूर्णोऽभवत् इति अर्थतः सिद्धम् । तस्मात् अस्य कालः षोडशशताब्दः इति प्रतीयते ।।

४. भट्टभास्कराचार्यः

कृष्णयजुर्वेदस्य प्रधानसंहिता तैत्तिरीयसंहिता । तैत्तिरीयसंहितायाः भाष्यकर्तारः सायणाचार्याद प्राक् बहवः आसन् । तेषु भट्टभास्कराचार्यः अन्यतमः । भट्टभास्कराचार्यादि पूर्वं ये ये व्याख्याग्रन्थाः आसन् ते संपूर्णतया नोपलभ्यन्ते, किन्तु भट्टभास्करस्य भाष्यम् पूर्णतया उपलभ्यते । काण्डानुक्रमणे एवं वर्तते-

'यस्याः पदकृदात्रेयः वृत्तिकारस्तु कुण्डिनः' इत्युल्लेखनेन तैत्तिरीयसंहितायाः वृत्तिकारः कुण्डिनः इत्यभिधीयते । भट्टभास्कराचार्यः भाष्यारम्भे भवस्वामिनां उल्लेखनं अकारि । सायणाचार्यस्य (व्याख्याने) भाष्ये भट्टभास्कराचार्यस्य उल्लेखनस्य विद्यमानत्वात् भट्टभास्कराचार्यः सायणाचार्यात् प्राचीनः इत्यूह्यते । एकाग्निकाण्डस्य भाष्यकर्ता हरदत्तः भट्टभास्करभाष्यस्य साहाय्यम् प्राप्तवान् । तदर्थं भट्टभास्करस्य कालः क्रिस्तशताब्देषु द्वादशशताब्दः इत्यूह्यते । भट्टभास्कराचार्यस्य तैत्तिरीयसंहिताभाष्यस्य **'ज्ञानयज्ञभाष्यम्'** इति प्रसिद्धिः । अस्मिन् **'ज्ञानयज्ञभाष्ये'** अनेकानां प्राक्तनग्रन्थानां सोदाहरणम् अलिखत् । तद्वत् मन्त्रार्थनिरूपणसन्दर्भे भिन्नभिन्नाचार्यस्य अभिप्रायमपि अकारि । अधियज्ञेन साकं आधिदैविक, अध्यात्मिकार्थानपि विशदीकृतम् भट्टभास्कराचार्यै **'हंसः शुचिषद्'** इत्यत्र हंसशब्दस्य अधियज्ञार्थे **'रथः'** पदं निवेश्य आधिदैविकार्थे **'आदित्यः'** इति पदं दत्वा अध्यात्मिकपक्षे **'आत्मा'** इत्यादयः अर्थविशेषाः असूचयत् वैदिकसाहित्ये भट्टभास्कराचार्यभाष्यस्य महत्वस्थानं वर्तते ।।

५. श्रीरङ्गरामानुजमुनिः

चतुष्षष्ठिप्रबन्धनिर्माता दशोपनिषद्भाष्यकारः श्रीरङ्गरामानुजमुनिरिति अस्य महती प्रशस्तिरस्ति । विशिष्टाद्वैतमतरीत्या उपनिषदां भाष्यं अनेन विरचितम् । अस्य जन्मस्थानं तिरुपतिः । लक्ष्मीपुरशाखीय नल्लान् वंश्यः, श्रीवत्सगोत्रोत्पन्नः, छन्दोगः अयम् । अस्य विद्यागुरुः वात्स्य अनन्ताचार्यः, परमगुरुः ताताचार्यः, सन्यासदीक्षागुरुः श्रीज्ञानाब्धि

ब्रह्मतन्त्रपरकालमुनिः । अस्य पूर्वाश्रमनाम तावत् वरदविष्णवाचार्यः । सोऽयं महाविरक्तस्वरूपः, शान्तः इति प्रख्यातिरस्ति । अस्य जीवनकालः १६७०-१७५० इति ज्ञायते । अस्य ग्रन्थेषु अप्पय्यदीक्षितः दोड्डयाचार्यश्च उल्लेखितौ । वेदेषु दशोपनिषद्भाष्यानि, कृष्णयजुर्वेदे तैत्तिरीयशाखान्तर्गतपुरुषसूक्तभाष्यं, श्वेताश्वतरोपनिषद्भाष्यम्, अथर्वशिखोपनिषद्भाष्यं, कौषीतक्युपनिषद्भाष्यम्, मन्त्रिकोपनिषद्भाष्यं, शतपथब्राह्मणान्तर्गत अग्निरहस्यस्य भाष्यं, महोपनिषद्भाष्यं, ईशावास्यव्याख्या भावदीपिका इत्यादिकं विरचितवन्तः । स्वाचार्यैः कृत श्रीभाष्यादिग्रन्थानां व्याख्यानरूपग्रन्थान् अनेकान् रचितवन्तः इमे रङ्गरामानुजस्वामिनः । श्रीभाष्यव्याख्या मूलभावप्रकाशिका, श्रुतप्रकाशिकायाः व्याख्या भावप्रकाशिका, विषयवाक्यदीपिका, शारीरकशास्त्रार्थदीपिका, न्यायसिद्धाञ्जनटीका, रामानुजसिद्धान्तसारसङ्ग्रहः, तत्वनिष्कर्षः, रहस्यत्रयव्याख्या तात्पर्यकौमुदी, प्रतितन्त्रपरिष्क्रिया, तिरुप्पल्लाण्डु, तिरुप्पावै, तिरुवाय्मोळि, कण्णिनुण्शिरुत्ताम्बु इत्यादि द्रमिडप्रबन्धानां संस्कृतानुवादश्च एतैरेव लिखितानि ।।

६. श्रीरङ्गनाथमुनिः

अस्मिन् ग्रन्थे कृष्णयजुर्वेदीयपुरुषसूक्तभाष्ये सायणभट्टभास्कररङ्गरामानुजस्वामिभाष्यसहितमिति शीर्षकाणि प्रदत्तानि । उत्तमूर् ति वीरराघवाचार्यैः संपादित ग्रन्थे तु श्रीरङ्गरामानुजस्वामिविरचित पुरुषसूक्तभाष्यम् इति मुद्रितम् । किन्तु वि. कृष्णमाचार्यैः संपादित अनुवादित ग्रन्थे तु श्रीरङ्गनाथमुनिकृतम् पुरुषसूक्तभाष्यमिति उल्लेखः वर्तते । तदर्थं उभयोः भाष्य(ग्रन्थ)कर्तृत्वसमानत्वे श्रीरङ्गनाथमुनेः चरित्रे किञ्चित् समस्या वर्तते । तदधोभागे लिख्यते एवम् -

१. भाष्यस्य अस्य रचयिता मुकुन्दनारायणदासापरनामा श्रीरङ्गनाथमुनिरिति निर्दिष्टमत्र भाष्यान्ते । एतत्प्रसङ्गे च श्रीसूक्तभाष्यमेकं श्रीरङ्गनाथमुनिप्रणीत नञ्जीयर् उपज्ञतया प्रकाशितं विम्रष्टव्यं विमर्शकैः । तच्च भाष्यं श्रीप्रणतार्तिहररामानुजाचार्यात् अधिगतश्रीतत्त्वसंप्रदायेन पराशरभट्टान्तेवासिना केनचित् रङ्गनाथमुनिना प्रणीतम् इत्यवगम्यते, अयं च रङ्गनाथमुनिः श्रीवेदान्तदेशिकैः श्रीमद्रहस्यत्रयसारे श्रीसूक्तभाष्य प्रणेतृतया व्यपदिष्टो नारायणमुनि अपरनामकः पेरिय जीयर् भवितुमर्हति इत्यत्र अनपनोद्यं औचित्यमस्ति । तथा निर्दिष्टः को भवितुमर्हति इत्यत्र परं विमतिः उदेति । पूर्वनिर्दिष्टस्य श्रीसूक्तभाष्यकोशस्य प्रकाशयिता भाष्यकर्तारं रङ्गनाथमुनिं नञ्जीयर् अपरनामधेयं वेदान्तिमुनिं आचख्यौ । तस्यौचित्यं विवेचनीयं भवति । अहोबिलमठस्वामि श्रीरङ्गनाथयतीन्द्रकृते

न्यासविवरणे प्रास्ताविक श्रीसूक्तभाष्यस्थः प्रथमः श्लोकः पेरियजीयर् कृतत्वेन उद्धृतः । अतः श्रीसूक्तभाष्यमिदं पेरियजीयर् कृतत्वेन उद्धृतः । अतः श्रीसूक्तभाष्यमिदं पेरियजीयर् कृतमेव इति निश्चितम् ।

अतो ज्ञाप्यते नारायणमुनिरेव परियजीयर् नाम्ना श्रीरहस्यत्रयसारे व्यवहृत इति । नारायणमुनिरयं श्रीरङ्गनारायणाचार्याभिधान वङ्गिवशेश्वरात् अधिगत सांप्रदायिकतत्त्वार्थः श्रीपराशरभट्टाचार्यशिष्य इति च श्रीपाञ्चरात्ररक्षातोऽवगम्यते । किञ्च अयं नारायणमुनिः आत्मानं नारायणदासनाम्ना व्याजहार । यथा पूर्वोक्त श्रीपाञ्चरात्ररक्षोदाहृतश्लोकानामन्ते -

'यो नारायणदासीयो माधवाराधनक्रमः ।

तत्राभिगमनं नाम प्रथमः पटलो ह्ययम्' ।। इति ।

अयमेव नारायणदासापरनामा नारायणमुनिः पेरिय- जीयर् नाम्ना प्रथितः श्रीसूक्तभाष्यकर्ता; तस्यैव रङ्गनाथमुनिः इति नामान्तरमपि इत्युपपत्तिभूम्ना उन्नेतुं शक्यते । तथा च प्रस्तुतश्रीसूक्तभाष्यान्तिमो भागः -

'महालक्ष्मीशदासीये सर्वशस्त्रार्थनिर्णये ।

श्रीसूक्तभाष्ये भाव्येऽस्मिन् रमध्वं पुरुषोत्तमाम्' ।।

इति श्रीरङ्गनाथमुनि विरचितं श्रीसूक्तभाष्यं समाप्तम् इति ।

अयं च नारायणमुनिः नलं तिकळ् नारायण जीयर् इति द्राविडनाम्ना सांप्रदायिकग्रन्थेषु व्यवहृत इति केचिद्विमर्शका अभिप्रयन्ति । मुकुन्दपदस्य नलंतिकळ् पदस्य च यथाकथञ्चित् परस्परं सङ्गतिश्च सम्भवेत् इत्यप्यूहितुं शक्यते । यतोऽयं वङ्गिवंशेश्वर-श्रीरङ्गनारायणाचार्यसमकालिकः, ततो नञ्जीयरपेक्षया वयोऽधिको भवितुमर्हति । अतः जीयर्-नारायणमुन्योः उभयोः श्रीपरशरभट्टशिष्यत्वाविशेषेऽपि वयोऽधिकत्वात् पेरियजीयर् इति नारायणमुनेः मुक्तो व्यवहारः । तेनैव पुरुषसूक्तभाष्ये व्यवहृतेन मुकुन्दनारायणदासेन भाव्यमित्युन्नीयते । किञ्च नञ्जीयर् यतेः स्वाभाविकं नाम माधवयतिः इत्येव इति गुरुपरम्परास्तोत्रग्रन्थेषु दृश्यते । अतो रङ्गनाथमुनेः भिन्न एव स भवितुमर्हति । भाष्यकर्तुः अस्य कालः क्रिस्तुद्वादशशतकारम्भ इति निर्णेतव्यं भवति ।

जपाध्ययनादिना सर्वपुरुषार्थसाधनीभूतं चतुर्वेदेषु पठ्यमानं सकलवेदसारभूतं तत्वहितपुरुषार्थप्रतिपादनैकान्तं उपलब्धभाष्यसहितं पुरुषसूक्तं यथामति संगृहीतम् । ग्रन्थान्ते अकारादिक्रमेण प्रमाणाकरसूचनी, इतरग्रन्थेषु पुरुषसूक्तविचारः पुरुषसूक्तार्थ-

सङ्ग्रहकारिकाः, मन्त्रगताः विशेषशब्दार्थाः, ग्रन्थसूचन्यादि विषयावबोधकाः अनुबन्धाः ग्रथिताः ।

अस्य ग्रन्थास्य सम्पादने श्रीउत्तमूर्वीरराघवाचार्यसम्पादित श्वेताश्वतराद्युपनिषत्पुरुषसूक्तभाष्यम्, श्रीशङ्करपाण्डुरङ्गपण्डितसम्पादित अथर्ववेदसंहिता, श्री महादेवशास्त्रिसम्पादित तैत्तिरीयारण्यकं - भट्टभास्करभाष्योपेतम् इत्यादिभ्यः ग्रन्थेभ्यः उपयुक्ताः विचाराः स्वीकृताः । एतदर्थं तेभ्यः धन्यवादान् समर्पयामः ।

अस्य विमर्शात्मकग्रन्थसम्पादनस्य कृते सूक्तप्रोत्साहनं मार्गदर्शनं प्रदाय उपकृतवन्तः ग्रन्थप्रधानसम्पादकाः डा. भाष्यं महास्वामिनः संसदः निर्देशकाः अतः प्रथमं तेभ्यः नमो वाकं प्रशास्महे । एवमेव अस्य परिशोधने परिष्करणे च साह्यं दत्ताः श्री एस्. कृष्णन्, एस्. श्रीनिवासन्, श्रीमती शशिकला महोदयाः तथा संसदः विद्वांसः तेभ्यः हार्दाः धन्यवादाः । तथा कार्यालयतः आर्थिकसहायं तथा कार्योत्तेजनं कृतवन्तः संसदः कुलसचिवाः श्री एस्. कुमार महाभागाः, तेभ्यः हार्दाः धन्यवादाः । गणकयन्त्रविभागस्य मुख्यस्थः श्री जवरेगौडः, गणकयन्त्रकार्यकत्री श्रीमती डि.एन्. सौभाग्या, मुद्रणकार्यकर्तारौ के.एस्. बेट्टस्वामिगौडः, श्री वि. महेशगौडः, अन्यश्च मुखपुटविन्यासकारः विद्वान् एच्.एस्. हनुमन्तराव्, श्रीलोकेश, मैसूरु, अन्ये अन्ये च आवश्यकान् सर्वान् सहकारान् दत्वा कार्यमेतेन्निर्वोढुं महान्तमानुकूल्यमापादितवन्तः इति तेभ्यः हार्दं कार्तज्ञ्यम् । श्रीमान् यदुशैलदीपः यदुगिरिनायिकासमेतनारायणः प्रसीदतु ।

एस्. नारायणः
आर्. जनार्दनन्
सम्पादकौ

विषयसूचनी

आमुखम्	**i-ii**
प्रस्तावना	**iii-xv**
मूलपाठः (सस्वरः)	**1-18**
ऋग्वेदीयं पुरुषसूक्तम्	**1-2**
शुक्लयजुर्वेदीयं काण्वसंहितान्तर्गतं पुरुषसूक्तम्	**3-4**
शुक्लयजुर्वेदीयं माध्यन्दिन संहितान्तर्गतं पुरुषसूक्तम्	**5-6**
कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकान्तर्गतं पुरुषसूक्तम्	**7-8**
सामवेदीयं जैमिनीयतलवकारशाखान्तर्गतं पुरुषसूक्तम्	**9**
सामवेदीयं कौथुमशाखान्तर्गतं पुरुषसूक्तम्	**10-16**
अथर्वणवेदीयं शौनकसंहितान्तर्गतं पुरुषसूक्तम्	**17**
अथर्वणवेदीयं पैप्पलादपुरुषसूक्तम्	**18**
१. ऋग्वेदीयं पुरुषसूक्तम् (प्रतिपदार्थ तात्पर्य-सायणभाष्यसहितम्)	**19-32**
२. शुक्लयजुर्वेदीयं पुरुषसूक्तम् (सायण-उवट-महीधरभाष्यसहितम्)	**33-47**
३. कृष्णयजुर्वेदीयं - पुरुषसूक्तम् (सायण-भट्टभास्कर-रङ्गरामानुजस्वामि भाष्यसहितम्)	**48-82**
४. सामवेदीयं पुरुषसूक्तम् (सायणभाष्योपेतम्)	**83-85**
५. अथर्वणवेदीयं पुरुषसूक्तम् (सायणभाष्योपेतम्)	**86-97**
अनुबन्धाः	**99-132**
१. प्रमाणानां अकारादिसूचनी ।	**99-104**
२. पुरुषसूक्तार्थसङ्ग्रहकारिकाः ।	**105-108**
३. ग्रन्थान्तरेषु पुरुषसूक्तार्थविचारः ।	

३. ग्रन्थान्तरेषु पुरुषसूक्तार्थविचारः ।

अ. श्रीभाष्ये पुरुषसूक्तार्थविचारः । 109-112

आ. मुद्गलोपनिषदि पुरुषसूक्तार्थः । 113-115

इ. श्रीपाञ्चरात्रे पराशरसंहितायां पुरुषसूक्तस्य विनियोगः । 116-117

ई. अहिर्बुध्न्यसंहितायां पुरुषसूक्तस्य विशेषार्थाः । 118-120

उ. महार्णवकर्मविभागे ऋग्विधानोक्तपुरुषसूक्तप्रयोगः । 121-126

४. मन्त्रगताः विशेषशब्दार्थाः । 127-128

५. सङ्केताक्षरसूचनी । 129-130

६. ग्रन्थसूचनी । 131-132

ऋग्वेदीयं पुरुषसूक्तम्

(मण्डलम् १० - सूक्तम् ९०)

अस्य श्रीपुरुषसूक्तस्य नारायण ऋषिः । अनुष्टुप् छन्दः अन्त्या त्रिष्टुप् । पुरुषो देवता ॥

सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषःपादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥

तस्माद्विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ७ ॥

तस्माद्यज्ञात्सर्वहुतस्संभृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥ ८ ॥

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥

तस्मादश्वा अजायन्त ये के चोभयादतः ॥
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥ १० ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥ ११ ॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३ ॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानस्सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

॥ ऋग्वेदीयं पुरुषसूक्तं समाप्तम् ॥

शुक्लयजुर्वेदीयं काण्वसंहितान्तर्गतं पुरुषसूक्तम्

(अध्याय: ३५, अनुवाक: १)

अस्य श्रीपुरुषसूक्तस्य नारायण ऋषिः । अनुष्टुप् छन्दः अन्त्या त्रिष्टुप् । पुरुषो देवता ।।

सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ।
स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

पुरुष एवेदꣳ सर्वंय्यद् भूतँय्यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

एतावानस्य महिमातो ज्यायाꣳश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥

ततो विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥

तस्माद्यज्ञात्सर्वहुतस्सम्भृतम्पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥

तस्माद्यज्ञात्सर्वहुत ऋचस्सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥

तँय्यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥

यत्पुरुषँव्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा उच्येते ॥ १० ॥

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳशूद्रो अजायत ॥ ११ ॥

चन्द्रमा मनसो जातश्चक्षोस्सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

नाभ्या आसीदन्तरिक्षꣳशीर्ष्णो द्यौस्समवर्त्तत ।
पद्भ्याम्भूमिर्दिशश्श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥ १३ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मश्शरद्धविः ॥ १४ ॥

सप्तास्यासन्परिधयस्त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषम्पशुम् ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानस्सचन्त यत्र पूर्वे साध्यास्सन्ति देवाः ॥ १६ ॥

।। शुक्लयजुर्वेदीयं काण्वसंहितान्तर्गतं पुरुषसूक्तं समाप्तम् ।।

शुक्लयजुर्वेदीयं काण्वसंहितान्तर्गतं पुरुषसूक्तम्

(अध्यायः ३५, अनुवाकः १)

अस्य श्रीपुरुषसूक्तस्य नारायण ऋषिः । अनुष्टुप् छन्दः अन्त्या त्रिष्टुप् । पुरुषो देवता ।।

सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ।
स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

पुरुष एवेदꣳ सर्वँय्यद् भूतँय्यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

एतावानस्य महिमातो ज्यायाꣳश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥

ततो विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥

तस्माद्यज्ञात्सर्वहुतस्सम्भृतम्पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥

तस्माद्यज्ञात्सर्वहुत ऋचस्सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥

तँय्यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥

यत्पुरुषँव्व्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा उच्येते ॥ १० ॥

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳशूद्रो अजायत ॥ ११ ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२अकल्पयन् ॥ १३ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥

सप्तास्यासन्परिधयस्त्रिःसप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

।। शुक्लयजुर्वेदीयं माध्यन्दिनसंहितान्तर्गतं पुरुषसूक्तं समाप्तम् ।।

कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकान्तर्गतं पुरुषसूक्तम्

(प्रश्नः ३ अनुवाकः १२)

अस्य श्रीपुरुषसूक्तस्य नारायण ऋषिः । अनुष्टुप् छन्दः अन्त्यानां त्रयाणां त्रिष्टुप् । पुरुषो देवता ॥

सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

पुरुष एवेदँ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥ २ ॥

एतावानस्य महिमा । अतो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः ।
ततो विष्वङ् व्यक्रामत् । साशनानशने अभि ॥ ४ ॥

तस्माद्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ ५ ॥

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥

सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ॥ ७ ॥

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥ ८ ॥

तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ॥ ९ ॥

तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ १० ॥

तस्मादश्वा अजायन्त । ये के चोभयादतः ॥
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥ ११ ॥

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ १२ ॥

ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्याँशूद्रो अजायत ॥ १३ ॥

चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥ १४ ॥

नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत ।
पद्भ्यां भूमिर्दिशश्श्रोत्रात् । तथा लोकाँ अकल्पयन् ॥ १५ ॥

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्
यदाऽऽस्ते ॥ १६ ॥

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।
तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥ १७ ॥

यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः ॥ १८ ॥

।। कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकान्तर्गतं पुरुषसूक्तं समाप्तम् ।।

सामवेदे जैमिनीयशाखायां पुरुषसूक्तस्य ऋक्पाठः

(संहिता - आरणम् खण्डं ३ - ऋकृ ६-१० , ४ खण्ड १,२)

पुरुषव्रतस्य नारायणऋषिः । अनुष्टुप् छन्दः । पुरुषो देवता ।।

सहस्राशीर्षापूरुषः । सहस्राक्षास्सहास्रापात् ।
साँभूमिं सर्वातोवृत्वा । अत्यातिष्ठत् दशांगूलाम् ॥ १ ॥

त्रीपादूर्ध्वा उदैत् पूरुषः । पादोस्येहाभावत् पूनाः ।
ताथाविष्वं व्याक्रमात् । अशनानंशने आभि ॥ २ ॥

पूरुषा एवेदं सर्वम् । यत् भूतं याच्चाभाव्यम् ।
पादोस्या सर्वाभूतानि । त्रीपादस्यामृतं दीवी ॥ ३ ॥

तावानस्यामाहीमा । तातोज्यायांश्च पूरुषः ।
ऊतामृतत्वस्येशानः । यादन्नेनतीरोहाति ॥ ४ ॥

तातोवीराड्जायता । वीराजो आधीपूरुषः ।
साजातो अत्यारिच्यत । पश्चात् भूमिमाथो पूरः ॥ ५ ॥

यत् पूरूषेणाहावीषाः । देवायज्ञामातन्वाता ।
वसन्तायेषामासीदाज्यम् । ग्रीष्मा इध्माः शाराद्धाविः ॥ ६ ॥

सप्तास्यासन् पारीधायाः । त्रिस्सप्तस्सामीधाः कृताः ।
देवायद्यज्ञन्तन्वानः । आबध्नन् पूरूषंहाविः ॥ ७ ॥

सामवेदीयं जैमिनीयतलवकारशाखान्तर्गतं
पुरुषव्रतनामकं पूरुषसूक्तम्

पुरुष व्रतं सप्त - (आरणम् व्रतपर्व खण्डं - ८ साम १० - १६)

अस्य श्रीपुरुषसूक्तस्य नारायण ऋषिः । अनुष्टुप् छन्दः अन्त्या त्रिष्टुप् । पुरुषो देवता ।।

उहुवाहा बुहुवाहा बुहुवा हाबु । सहस्रशीर्षापूरूषाः । सहस्राक्ष-
की की कीश टत

स्सहस्रापात् । साभूमिं सर्वतो वार्त्वा । अत्यतिष्ठद्दशां गूलाम् । उहुवाहा
ट त ट त ट त की

बुहुवाहाबुहुवाहा उवा । इट्र ईळा ।। १ ।।
की ट त नि

उहुवौहोवा । (त्रिः) त्रीपादूर्ध्वा उदैत्पूरूषाः । पादोस्येहा भवत्पूनाः ।
टुच टुत टुत

ताथा विष्वं वियक्रामात् । अशनानशने आभी । उहुवौहोवा । (द्विः)
ट त ट त टुच

उहुवौहो वा औहोवा । ईळा । उहुवौहोवा । (द्वि) उहुवौहो वा औहो-
टिट ख शि खण टुच टिट ख

होवा । सूवाः । उहुवौ होवा । (द्वि) उहुवौहो वा औहो वा । ई ।। २ ।।
शि खण टुच टिट ख शि ख

इहियौ होवा । (त्रिः) पुरुष एवेदं सार्वाम् । यत्भूतंय्यच्च भावायाम् ।
टुच टृ त टृ त

पादोस्य सर्वाभूतानी । त्रीपादस्या मृतन्दा इवी । इहियौ होवा । (द्विः)
टृ त टृ त्य टुच

इहियौ हो वा औहोवा । ईळा । इहियौहोवा । (द्विः) इहियौ हो वा
टिट ख शि खण टुच टिट ख

औहोवा । जोतीः । इहियौहोवा । (द्विः) इहियौ हो वा औहोवा । ई ।। ३ ।।
श खण टुच टिट ख श ख

ऊर्घा बुहा बुहा बूर्घा बुहा बुहा बूर्घा बुहा बुहाबु । तावा नस्या महा
कय ती कय ती कय तश ट

इमा । तातोज्यायांश्च पूरूषाः । ऊतामृतत्वस्ये शानाः । यादन्नेनातिरोहाती ।
त टुत टुत टुत

ऊर्घा बुहा बुहा बूर्घा बुहा बुहा बूर्घा बुहा बुहा उवा । इट्र इळा ।। ४ ।।
कय ती कय ती कय ती नि

हाबु हाबु हाबु । तातो वीराड जायाता । वीराजो अधि पूरूषाः ।
तुश टुत टुत

साजातो अत्यरिच्याता । पश्चात् भूमि मथो पूराः । हाबु हाबु हा उवा ।
टुत टुत तृ

ई ।। ५ ।।
ख

हाबु हाबु हाबु । यत्पूरूषेणा हावा इषा । देवा यज्ञमतन्वाता ।
तुश टु त्य टुत

वासन्त एषा मासीदाज्याम् । ग्रीष्म इध्मश्शरद्धावाइः । हाबु हाबु हा
टुत टुतश

उवा । ई ।। ६ ।।
तृ ख

हाबु हाबु हाबु । सप्तास्यासन् परिधायाः । त्रिस्सप्तस्समिधः
तुश टुत

कार्त्ताः । देवायद्यज्ञन्तन्वानाः । आबध्नन् पुरुषं हा वाइः । हाबु हाबु हा
टुत टुत टुतश

उवा । ई ।। ७ ।।
तृ ख

।। सामवेदीयं जैमिनीयतलवकारशाखान्तर्गतं पुरुषसूक्तं समाप्तम् ।।

सामवेदीयं कौथुमशाखान्तर्गतं पुरुषव्रतनामानं पुरुषसूक्तम् ।

ऋक् पाठः - (प्रपाठकः ७, दशतिः - ४, ऋचः ३-७)

पुरुषव्रतस्य नारायण ऋषिः । अनुष्टुप् छन्दः । पुरुषो देवता ।।

३ १ २ ३ १ २ ३ २ ३ १ २

सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।

१र २र ३ १ २ ३ १ २ ३ २

सभूमिँ सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।। १ ।।

३ २ ३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १ २

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।

२ ३ २ ३क २र ३२ ३ २

तथा विष्वङ् व्यक्रामदशनानशने अभि ।। २ ।।

१ २ ३२उ ३ २ ३ २उ ३ १ २

पुरुष एवेदँ सर्वं यद्भूतंय्यच्च भाव्यम् ।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १२ ३ २

पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ।। ३ ।।

१ २ ३ १उ ३ १ २ ३ १ २

तावानस्य महिमा ततो ज्यायाँश्च पूरुषः ।

३ १ २ ३ १ २र ३ १र २र ३ १२

उतामृतत्वस्येशानो यदन्नेनातिरोहति ।। ४ ।।

१ २ ३ १ २ ३ २ ३ २ ३ १ २

ततो विराडजायत विराजो अधि पूरुषः ।

२ ३ १र २र ३ २उ ३ १ २ ३२

स जातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः ।। ५ ।।

अस्याः वामदेव ऋषिः गायत्रीछन्दः इन्द्रो देवता (प्रपाठकः - २ दशतिः - ८ ऋक् - ५)

१ २ ३ १ २र ३२ ३१२३ १ २

कयानश्चित्र आभुवदूती सदावृधः सखा ।

२ ३ १ २ ३ २

कया शचिष्ठया वृता ।। ६ ।।

सामवेदीयं कौथुमशाखान्तर्गतं पुरुषव्रतनामानं पुरुषसूक्तम्

(राणायनिशाखायामपि एवमेव रूपम्)

(अरण्यगेयगाने व्रतपर्वणि ६ खण्डे १-६ सामानि)

पुरुषव्रतानां साम्नां पुरुषऋषिः । अनुष्टुप् छन्दः । पुरुषो देवता ।।

२ १ २ १ र र २ र १

उहुवाहाउ । (त्रिः) सहस्राशीर्षाःपुरूऽ२३षाः ।। सहस्राक्षः

२ १ २ १ र २ १र २ १ २ १र २

सहस्राऽ२३पात् ।। सभूमिँ सर्वतोवाऽ२३त्वा ।। अत्यतिष्ठद्दशाङ्गूऽ२३लाम् ।

१ २ १ न २ १ १ १ १

उहुवाहाउ । (द्विः) उहुवाऽ३हाउ । वाऽ३ ।। इट्स्थि इडाऽ२३४५

।। १ ।।

२ १ र र – १र र र २

उहुवौहोवाऽ२ । (त्रिः) त्रिपादूर्ध्व उदैत्पुरूऽ२३षाः ।।

१र र र र २ १ २ १ र २ १ २ र १र

पादोस्येहाभवत्पूऽ२३नाः । तथाविष्वङ्वियक्राऽ२३मात् ।। अशनानशने

२ १ र र – १ र ३

आऽ२३भी । उहुवौहोवाऽ२। (द्विः) उहुवौ । होऽ२ । वाऽ२३४ ।

५ र र ३ ५ २ १ र र – १र

औहोवा । ईऽ२३४डा । उहुवौहो वाऽ२ । (द्विः) उहुवौ । होऽ२ ।

३ ५र र ३ ५ २ १ र र –

वाऽ२३४ । औहोवा । सूऽ२३४वाः । उहुवौहोवाऽ२ । (द्विः)

२ १ र ३ ५र र ३ १ १ १

उहुवौ । होऽ२ । वाऽ२३४ । औहोवा ।। ऊऽ२३४५ ।। २ ।।

१ र र – १ र र २ १ र २

इयौहोवाऽ२। (त्रिः) पुरुष एवेदँसाऽ२३र्वाम् ।। यद्भूतं यच्च-

१र २ १र र र र २ १र र २ १ २

भावाऽ२३याम् ।। पादोस्यसर्वाभूताऽ२३नी ।। त्रिपादस्यामृतंदाऽ२३इवी ।

१ २२ – १२ ३ ५२ २ ३ ५
इयौहोवाऽ२। (द्विः) इयौ । होऽ२ । वाऽ२३४ । औहोवा । ईऽ२३४डा ।
१२२ – १२ ३ ५२२ ३ ५
इयौहोवाऽ२ । (द्विः) इयौ । होऽ२। वाऽ२३४ । औहोवा । ज्योऽ२३४तीः ।
१ २ २ – १ २ ३ ५२ २
इयौहोवाऽ२। (द्विः) । इयौ । होऽ२। वाऽ२३४ । औहोवा ।।
३ १११
ईऽ२३४५ ।। ३ ।।

२२ २ २ १२ २ २ १ २ २२ २ २
हाउहाउहाउ । तावानस्य । महाऽ२३इमाऽ३ ।। हाउहाउहाउ ।
१ २ २ २ २१२ २ २२ २ २ १२ २
ततोज्यायाँश्चपूरूऽ२३षाऽ३ः ।। हाउहाउहाउ । उतामृतत्वस्येशाऽ२३
२ २२ २ २ १ २ २ २१२ २ २
नाऽ३ः ।। हाउहाउहाउ । यदन्नेना तिरोहाऽ२३तीऽ३ । हाउहाउहाउ ।
१ १११
वाऽ३ ।। इट् स्थि इडाऽ२३४५ ।। ४ ।।

२ १ २ २ १२ २२ १२ २२
हाउहाउहाउवा । ततोविराडजायत ।। हाउहाउहाउवा । विराजो
१ २ १२ २ १२२ १२ २
अधिपूरुषः ।। हाउहाउहाउवा । सजातो अत्यरिच्यत ।। हाउहाउहाउवा ।
१२ २ २१ २ २१ २ १११
पश्चाद्भूमिमथोपुरः । हाउहाउहाउवाऽ३ ।। ईऽ२३४५ ।। ५ ।।

पुरुषव्रतस्य साम्नः पुरुष ऋषिः गायत्रीछन्दः ईश्वरः पुरुषो देवता ।

२२ २ २ १ २ १ २ १ २ १ २
हाउहाउहाउ । अस्मीनस्मिन् । (त्रिः) नृम्णाइनृम्णम् । (त्रिः)
१ २ २ १ २ – २ २ २
निधाइमाहे । (त्रिः) कयानश्चित्रऽ३ आभूऽ१वाऽ२त् ।। ऊतीसदावृ३

१ २ — र १ २ २र र र

धा:साऽ१खाऽ२ ।। कयाशचिष्ठ्ऽ३यावाऽ१र्त्ताऽ२३ ।। हाउहाउहाउ ।

१ २ १ २ १ २ १ २ १ २

अस्मी नस्मिन् । (त्रिः) । नृम्णाइनृम्णम् । (त्रिः) निधाइमाहे ।

१ १ ३ ५रर १ र ३

(द्विः) निधाऽ२३इ । माऽ२। हाऽ२३४ । औहोवा ।। सुवर्ज्योतीऽ

१११

२३४५: ।। ६ ।।

।। सामवेदीयं कौथुमशाखान्तर्गतं पुरुषसूक्तं समाप्तम् ।।

अथर्वणवेदीयं शौनकसंहितान्तर्गतं पुरुषसूक्तम्

(काण्ड १९-अनुवाक १ सूक्तं ६,७)

अस्य श्रीपुरुषसूक्तस्य नारायण ऋषिः । अनुष्टुप् छन्दः । नारायणो देवता ।।

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशांगुलम् ॥ १ ॥

त्रिभिः पद्भिर्द्यामरोहत् पादस्येहाभवत् पुनः ।
तथा व्य क्रामद् विष्वङशनानशने अनु ॥ २ ॥

तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्य म् ।
उतामृतत्वस्येश्वरो यदन्येनाभवत् सह ॥ ४ ॥

यत् पुरुषं व्यदधुः कतिधा व्य कल्पयन् ।
मुखं किमस्य किं बाहू किमूरू पादा उच्येते ॥ ५ ॥

ब्राह्मणो ऽस्य मुखमासीद् बाहू राजन्यो भवत् ।
मध्यं तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥ ६ ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ॥ ७ ॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ॥ ८ ॥

विराडग्रे समभवद् विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥ ९ ॥

यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १० ॥

तं यज्ञं प्रावृषा प्रौक्षन् पुरुषं जातमग्रशः ।
तेन देवा अयजन्त साध्या वसवश्च ये ॥ ११ ॥

तस्मादश्वा अजायन्त ये च के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥ १२ ॥

तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दो ह जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥ १३ ॥

तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्य म् ।
पशूँस्तांश्चक्रे वायव्या नारण्या ग्राम्याश्च ये ॥ १४ ॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥

मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः ।
राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ॥ १६ ॥

।। अथर्वणवेदीयं शौनकसंहितान्तर्गतं पुरुषसूक्तं समाप्तम् ।।

अथर्ववेदीयं पुरुषसूक्तम् (पैप्पलादसंहिता) ९-५

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम् ।। १ ।।
त्रिभिः पद्भिर्द्यामरोहत् पादस्येहाभवत् पुनः ।
तथा व्यक्रामद् विष्वङ् अशनानशने अनु ।। २ ।।
तावन्तो अस्य महिमानस्ततो ज्यायांश्च पुरुषः ।
पादस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।। ३ ।।
पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येश्वरो यदन्नेनाभवत् सह ।। ४ ।।
यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य किं बाहू किमूरू पादा उच्येते ।। ५ ।।
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्योभवत् ।
मध्यं तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ।। ६ ।।
विराडग्रे समभवद् विराजो अधि पूरुषः ।
स जातो अत्यरित्यत पश्चाद् भूमिमथो पुरः ।। ७ ।।
यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।। ८ ।।
तं यज्ञं प्रावृषा प्रौक्षन् पुरुषं जातमग्रशः ।
तेन देवा अयजन्त साध्या वसवश्च ये ।। ९ ।।
तस्मादश्वा अजायन्त ये च के चोभयादतः ।
गावो हजज्ञिरे तस्मात्तस्माज्जाता अजावयः ।। १० ।।
तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दो ह जज्ञिरे तस्माद् यजुस्तस्मादजायत ।। ११ ।।
तस्माद् यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ।। १२ ।।
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।। १३ ।।
मूर्धो देवस्य बृहतो अंशवः सप्त सप्ततीः ।
राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ।। १४ ।।
चन्द्रमा मनसो जातश्चक्षुः सूर्योऽजायत ।
श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत ।। १५ ।।
नाभ्यां आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्राङ् तथा लोकाँ अकल्पयन् ।। १६ ।।

ऋग्वेदीयं पुरुषसूक्तम्

[प्रतिपदार्थ-तात्पर्य-सायणभाष्यसहितम्]

[1]सहस्रशीर्षा [2]पुरुषस्सहस्राक्षस्सहस्रपात् ।
स भूमिं विश्वतो वृत्वा[3]त्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

प्र. - सहस्रशीर्षा - सहस्रशिरोभिर्युक्तः, **पुरुषः** - परमपुरुषः, **सहस्राक्षः** - सहस्रनेत्रयुक्तः, **सहस्रपात्** - सहस्रचरणोपेतः, **सः** - पुरुषः, **भूमिं** - पृथिवीं, **विश्वतः** - सर्वत्र, **वृत्वा** - व्याप्य, **दशाङ्गुलम्** - दशअङ्गुलदूरं यथा तथा, **अत्यतिष्ठत्** - अतीत्य वर्तते।।

ता. - सहस्रशीर्षा इति । शिरः शब्दस्य **शीर्षंश्छन्दसि** (पा.सू.६-१-६०) इति सूत्रेण शीर्षन्नादेशः । सहस्रशब्दः अनन्तवाची । पुरुषः पूर्णत्वात् पुरुषः । योऽयं सहस्रशीर्षा सः पुरुषः सहस्राक्षः, सहस्रपाच्च । सः भूम्यादिलोकजातं विश्वतो व्याप्य दशाङ्गुलमतिक्रम्य अतिष्ठत् ।

अत्र दशाङ्गुलशब्दार्थ उच्यते - दशसंख्याकाङ्गुलिपरिमितिवचनो न । किन्तु अपरिच्छिन्नस्य पुरुषस्य परिच्छेदप्रसङ्गात् । तर्हि दशाङ्गुलशब्दः अनन्तयोजन वचनः । प्रपञ्चादूर्ध्वं अनन्तयोजनान्यतीत्य अतिष्ठदित्यर्थः ।।

सा.भा. - यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।।

'सहस्रशीर्ष' इति षोडशर्चं सूक्तम् । नारायणो नाम ऋषि अन्त्या त्रिष्टुपु शिष्टा अनुष्टुभः । अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः **'पुरुषान्न परं किंचित्'** (क.उ.३-११)

---

१. तथा चोक्तम् कूर्मपुराणे- 'सहस्रमूर्धानमनन्तशक्तिं सहस्रबाहुं पुरुषं पुराणम् । शयानमब्धौ सलिले तवैव नारायणाख्यं प्रणतोऽस्मि रूपम्' इति ।।

२. 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' ।। (क.उ. ३-११) तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् । (मुं.उ. ३-८) इत्यादि पुरुषशब्दार्थो वर्णितः ।।

३. 'दशाङ्गुलमिति ब्रह्माण्डहृदययोरुपलक्षणम् । अङ्गुलमित्यवयवोपलक्षणेन मितस्य जगतोऽत्र ग्रहणं भवति । पञ्च स्थूलभूतानि पञ्च सूक्ष्माणि चेतदुभयं मिलित्वा दशावयवाख्यं सकलं जगदस्ति । अन्यच्च पञ्च प्राणाः सेन्द्रियं च चतुष्टयमन्तःकरणं दशमो जीवश्च' । इति ऋग्भाष्यभूमिकायाम् ।

इत्यादिश्रुतिषु प्रसिद्धः स देवता । तथा चानुक्रान्तं - 'सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं तु' इति ।

सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो यः पुरुषः सोयं **सहस्रशीर्षा** । सहस्रशब्दस्योपलक्षणत्वात् अनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षित्वं सहस्रपादत्वं च । **सः** - पुरुषः **भूमिं** - ब्रह्माण्डगोलकरूपां **विश्वतः** - सर्वतः **वृत्वा** - परिवेष्ट्य **दशाङ्गुलं** - दशाङ्गुलपरिमितं देशम् **अत्यतिष्ठत्** - अतिक्रम्य व्यवस्थितः । दशाङ्गुलमित्युपलक्षणम् । ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ।। १ ।।

पुरुष एवेदं सर्वं [१]यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

प्र. - पुरुषः एव - परमपुरुषः, **एव इदम्** - वर्तमानं, सर्वम् **यद्भूतम्** - भूतकाले यत् स्थितं, **यच्च भव्यम्** - भविष्यत् काले यत् जायमानं, **उत अमृतत्वस्य** - परमपदस्य (मोक्षस्य) **ईशानः** - प्रदाता । (स्वामी) **यत्,अन्नेन, अतिरोहति** - सः अन्नमयप्रपञ्चेन अतिक्रम्य भवति ।

ता. - प्रथमया ऋचा देशतो व्याप्तिं उक्त्वा अनया द्वितीयया कालतो व्याप्तिमुच्यते - यदिदं वर्तमानं कार्यजातं तत्सर्वं पुरुष एव । यदतीतं कार्यजातं यच्च आगामि कार्यजातं तत्सर्वं पुरुष एव । किञ्च अयमेव पुरुषः अमृतत्वस्य मोक्षस्य ईशानो भवति । सायुज्यादिचतुर्विधमोक्षस्य प्रदाता भवति । यत्कार्यजातं अन्नेन अदनीयेन भोज्यद्रव्येण स्वकारणमतीत्य रोहतीत्यर्थः ।

सा.भा. - यत् **इदं** वर्तमानं जगत् तत् सर्वं **पुरुष एव** । **यत्** च **भूतम्** अतीतं जगत् **यच्च भव्यं** भविष्यज्जगत् तदपि पुरुष एव । यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोर्दष्टव्यमित्यभिप्रायः । **उत** - अपि च **अमृतत्वस्य** देवत्वस्य अयम् **ईशानः** स्वामी । **यत्** यस्मात्कारणात् **अन्नेन** प्राणिनां भोग्येनान्नेन निमित्तभूतेन **अतिरोहति** स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः ।। २ ।।

---

१. भागवते-कालत्रयसम्बन्धत्वं भगवच्छरीरस्य उपवर्णितम् । 'विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् । यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च यत्' ।। (भा.पु.२-१-२४)

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥[1]

प्र. - एतावान् - अयं लोकः, **अस्य -** परमपुरुषस्य, **महिमा -** वैभवम्, **पुरुषः -** परमपुरुषः, **अतः -** अस्मात् लोकात्, **ज्यायाश्चँ -** अतिशयात्मकाः, **विश्वाभूतानि -** चराचरात्मकानि सर्वभूतानि, **अस्य -** परमपुरुषस्य, **पादः -** चतुर्थोऽशः, **अस्य -** नारायणस्य परमस्य, **त्रिपात् -** अवशिष्टं पादत्रयं **दिवि -** द्युलोके, **अमृतं -** नित्यरूपेण शोभते ।।

ता. - पुरुषः - नारायणः परमपुरुषः एतावान् लोकपरिमाणः अस्य महिमा - विभूतिमात्रम् । अतः - एतादृश महिमोपेतः पुरुषः - ज्यायान् श्रेष्ठः प्रशस्थः । अस्य ज्यायस्त्वं व्यनक्ति - अस्य परमपुरुषस्य विश्वानि चराचरात्मकानि भूतानि पादोऽशः । अस्य भोग्यभोगोपकरणभोगास्थानरूपस्य वस्तुनः परमपदे सत्वात् तेषां त्रिपाच्छब्देन व्यपदिश्यते । तेन अमृतं अमरणधर्मं दिवि परमपदे भासते इत्यर्थः ।।

सा.भा. - अतीतानागतवर्तमानरूपं जगद्यावदस्ति **एतावान्** सर्वोऽपि **अस्य** पुरुषस्य **महिभा** स्वकीयसामर्थ्यविशेषः । न तु तस्य वास्तवस्वरूपम् । वास्तवस्तु **पुरुषः अतः** महिम्नोऽपि **ज्यायान्** अतिशयेनाधिकः । एतच्चोभयं स्पष्टीक्रियते । **अस्य** पुरुषस्य **विश्वा** सर्वाणि **भूतानि** कालत्रयवर्तीनि प्राणिजातानि **पादः** चतुर्थोऽशः । **अस्य** पुरुषस्य अवशिष्टं **त्रिपात्** स्वरूपम् **अमृतं** विनाशरहितं सत् **दिवि** द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेषः । यद्यपि **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै.उ.२-१) इत्याम्नातस्य परब्रह्मण इयत्ताभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षया अल्पमिति विवक्षिततत्वात् पादत्वोपन्यासः ।। ३ ।।

त्रिपादूर्ध्व उदैत्पुरुषःपादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्[2]**साशनानशने अभि ॥ ४ ॥**

---

१. भारते-विश्वरूपं प्रतिपादयति- 'विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः । एकश्चरति क्षेत्रेषु स्वैरवारी यथासुखम्' ।। (म.भा.शां.प. ५१-५)
एवं गीतायां च उक्तम् - उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।। यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।। (१५-१७,१८)

२. साशनं स्वर्गम् । अनशनं मोक्षम् । (उ.भा.)

प्र. - त्रिपात् - अपरिच्छिन्नज्ञानशक्त्यादिमान्, **पुरुषः** - परमपुरुषः, ऊर्ध्वे - प्रकृतिमण्डलादुपरि, **उदैत्** - उदगच्छत्, **अस्य** - भगवतः, **पादः** - चतुर्थोऽशः, इह - अस्मिन् लोके, **पुनः अभवत्** - अवातरत्, **ततः** - पश्चात्, **साशनानशने** - स्थावरजङ्गमे, **अभि** - उद्दिश्य, **विष्वङ्** - समन्तात्, **व्यक्रामत्** - व्यापारमकरोत् ।।

ता. - वासुदेवसङ्कर्षणप्रद्युम्नरूपः त्रिपात् परमपुरुषः नारायणः ऊर्ध्वे परमव्योम्नि श्रीवैकुण्ठे उद्गच्छत् । अस्य नारायणस्य पादः - चतुर्थोऽशः अनिरुद्धाख्यः सर्वं जगत् त्रातुं पुनः इह अभवत् । ततः सः भगवान् योगनिद्राऽवसाने स्वस्यैव तत्तद्रूपेण बहुभवनसंकल्पं अकरोत् । साशनं - जङ्गमम् - देवमनुष्यादिरूपम् । अनशनम् - स्थावरम् - वृक्षगुल्मलतादिरूपम् । स्थावरजङ्गमात्मककृत्स्नजगद्रूपेण अकरोत् इत्यर्थः ।।

सा.भा. - योऽयं **त्रिपात् पुरुषः** संसाररहितो ब्रह्मस्वरूपः सोऽयम् **ऊर्ध्व उदैत्** अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतोऽत्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान् । तस्य **अस्य** सोऽयं **पादः** लेशः सोऽयम् **इह** मायायां **पुनः अभवत्** सृष्टिसंहाराभ्यां पुनःपुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं– **'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'** (भ.गी.१०-४२) इति । **ततः** मायायामागत्यानन्तरं **विष्वङ्** देवमनुष्यतिर्यगादिरूपेण विविधः सन् **व्यक्रामत्** व्याप्तवान् । किं कृत्वा । **साशनानशने** अभिलक्ष्य । साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम् अनशनं तद्रहितमचेतनं गिरिनद्यादिकम् । तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ।। ४ ।।

तस्मा॑द्विराळ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

प्र. - तस्मात् - व्यापारात्, **विराट्** - प्रकृतिः, **अजायत** - उत्पन्नः, **विराजः**- प्रकृतिमण्डलस्य, **अधिपुरुषः** - अधिकारपुरुषः चतुर्मुखः (उत्पन्नः), **सः** - चतुर्मुखो ब्रह्मा, **जातः** - जातस्सन्, **अत्यरिच्यत** - प्रवृद्धकायोऽभवत्, **पश्चात्** - अनन्तरम्, **भूमिं** - पृथिवीं, **अथो** - तदनन्तरं, **पुरः** - प्राणिवर्गान् ससर्ज ।।

ता. - तस्मात् व्यापाराद्धेतोः विराट् महदादिरूपेण विविधं राजत इति विराडिति प्रकृतिः उच्यते । विराजः प्रकृतेः परं चतुर्मुखाख्यः ब्रह्मा समुत्पन्नः । तस्य शरीरवृद्धिं दर्शयति - **स जातो अत्यरिच्यत** इति । चतुर्मुखः जातस्सन् भगवत्कृपया

प्रवृद्धदेहोऽभूत् । अनन्तरं भूमिं असृजत । अत्र भूमिशब्दः ब्रह्माण्डस्य उपलक्षणम् तदनन्तरं पुरः - देवमनुष्यतिर्यगादिजीववर्गान् ससर्ज इति शेषः ।।

सा.भा. - विष्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते । **तस्मात्** आदिपुरुषात् विराट् ब्रह्माण्डदेहः **अजायत** उत्पन्नः । विविधानि राजन्ते वस्तून्यत्रेति विराट् । **विराजोऽधि** विराट्देहस्योपरि तमेव देहमधिकरणं कृत्वा **पुरुषः** तद्देहाभिमानी कश्चित् पुमान् अजायत । सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् । एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति- **'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव'** (नृ.उ.ता.२-१-९) इति । **स जातः** विराट् पुरुषः **अत्यरिच्यत** अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । **पश्चात्** देवादिजीवभावादूर्ध्वं **भूमिं** ससर्जेति शेषः । अथो भूमिसृष्टेरनन्तरं तेषां जीवानां **पुरः** ससर्ज । पूर्यन्ते सप्तभिः धातुभिरिति पुरः शरीराणि ।। ५ ।।

यत्पुरुषेण हविषा देवा [१]यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥

प्र. - **यत्** - यस्मिन् काले, **पुरुषेण** - चतुर्मुखात्मकेन, **हविषा** - पशुना, हविष्ट्वेन, **देवाः** - तदिन्द्रियाणि, **यज्ञं** - मानसं यागं, **अतन्वत** - कृतवन्तः, **अस्य** - मानसयज्ञस्य, **वसन्तः** - वसन्तर्तुः - **आज्यम्** - आज्यत्वेन, **आसीत्** - ध्यातः आसीदिति यावत्, **ग्रीष्मः** - ग्रीष्मर्तुः, **इध्मः** - समित्वेन आसीत्, **शरत्** - शरदृतुः, **हविः** - पुरोडाशादि हविष्ट्वेन आसीत् ।।

ता. - अथ चतुर्मुखः ब्रह्मा स्वयं जगत्सृष्टिं अजानानो भगवदुपदिष्टमार्गेण भगवन्तम् आत्मसमर्पणरूपेण मानसयागेन आराध्य तत्प्रसादलब्धविज्ञानो जगत्सृष्टि-मकरोदिति वक्तुं प्रथमतः यागं प्रस्तौति - **यत्पुरुषेणेति** । यदा चतुर्मुखाख्येन पशुहविषा देवाः साध्याख्याः तदिन्द्रियाणि वा यज्ञं ध्यानमयं कृतवन्तः । तदा अस्य यज्ञस्य वसन्तकालः आज्यमासीत् । यद्यपि असृष्टानि पदार्थजातानि, तथापि कालस्य नित्यत्वात्

१. यज्ञसृष्टिं उपदिशति गीतायाम् - सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् । (भ.गी. ३-१०)

वसन्त आज्यत्वेन ध्यात आसीत् । एवं ग्रीष्मकाल इध्मत्वेन ध्यातः । तथा शरत्कालः पुरोडाशाख्यहविष्ट्वेन ध्यात इत्यर्थः ।।

सा.भा. - यत् यदा पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु **देवाः** उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासंभवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य **पुरुषेण** पुरुषाख्येन **हविषा** मानसं यज्ञम् **अतन्वत** अन्वतिष्ठन् तदानीम् **अस्य** यज्ञस्य **वसन्तः** वसन्तर्तुरेव **आज्यम् आसीत्** अभूत् । तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः । एवं **ग्रीष्म इध्मः** आसीत् । तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः । **तथा शरद्धविः** आसीत् । तामेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्त इत्यर्थः । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः । अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम् ।। ६ ।।

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजंत साध्या ऋषयश्च ये ॥ ७ ॥

प्र. - अग्रतः - भूम्यादिभूतसृष्टेः पूर्वं, **जातं** - उत्पन्नं, **तं-पुरुषं** - ब्रह्माणं पुरुषं, **यज्ञं** - यजनीयहविरूपं, **बर्हिषि** - वेद्यां निधाय, **प्रौक्षन्** - प्रोक्षणमकुर्वन्, **तेन** - ब्रह्मणा हविषा, **ये देवाः साध्याः** - ये साध्याख्याः ते देवाः, **ऋषयश्च** - मन्त्रद्रष्टारश्च, **अयजन्त** - मानसंयागं अकुर्वन्त ।।

ता. - प्रथमतः जातं पुरुषं विराडाख्यं यज्ञं हविः बर्हिषि - प्रकृतिरूपवेद्यां निधाय प्रोक्षणादिसंस्कारम् अकुर्वन् तेन ब्रह्मणा हविषा देवाः इन्द्रियाणि अयजन्त - यागम् अकुर्वन् - अनिरुद्धाग्नौ ब्रह्मा रूपं हविः प्रक्षिप्तवन्तः इत्यर्थः । साध्याः - कर्मसाधनानि वागादि इन्द्रियाणि । ऋषयः - ज्ञानसाधनानि चक्षुरादि इन्द्रियाणि । ये साध्या ऋषयश्च ते देवाः तेन अयजन्त इत्यन्वयः ।।

सा.भा. - यज्ञं यज्ञसाधनभूतं **तं** पुरुषं पशुत्वभावनया यूपे बद्धं **बर्हिषि** मानसे यज्ञे **प्रौक्षन्** प्रोक्षितवन्तः । कीदृशमित्यत्राह । **अग्रतः** सर्वं सृष्टेः पूर्वं **पुरुषं** जातं पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तं **'तस्माद्विराळजायत विराजो अधि पूरुषः'** इति । **तेन** पुरुषरूपेण पशुना **देवा अयजन्त** । मानसयागं निष्पादितवन्त इत्यर्थः । के ते देवा इत्यत्राह । **साध्याः** सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूलाः **ऋषयः** मन्त्रद्रष्टारः च **ये** सन्ति । ते सर्वेऽप्ययजन्तेत्यर्थः ।। ७ ।।

तस्मा॒द्यज्ञात्स॑र्व॒हुत॒स्संभृ॑तं [1]पृषदा॒ज्यम् ।
[2]प॒शूंस्ताँश्च॑क्रे वाय॒व्या॑नार॒ण्यान् ग्रा॒म्याश्च॒ ये ॥ ८ ॥

प्र. - सर्वहुतः - ब्रह्मणः, **तस्मात्-यज्ञात्** - पुरुषात् यागात्, **पृषदाज्यं** - दधिमिश्रं आज्यं (जगत्कारणं वीर्य), **संभृतम्** - संपादितं भवति, **वायव्यान्** - सः ब्रह्मा अन्तरिक्षचरान् पक्षीन्, **आरण्यान्** - सिंहादीन्, **ये च ग्राम्याः,** ग्रामेषु ये गवादयः सन्ति, **तान् पशून्,** - तादृशान् पशूनपि, **चक्रे** - ससर्ज ।।

ता. - सर्वं जुहोतीति - सर्वहुत् तस्मात् सर्वं भगवते समर्पितवतः ब्रह्मणः इत्यर्थः । तस्मात् एतादृशात् चतुर्मुखात् यज्ञात् यजनीयात् पृषदाज्यं दधिसंयुक्तमाज्यं दधिमिश्र आज्यस्थानीयं विचित्ररूपं सृज्यवस्तु जननहेतुभूतं वस्तु संभृतम् - उत्पन्नं भवति । **'सृज्यप्राणिजनन हेतुभूतं विचित्रवर्णवीर्यं पृषदाज्यं भवति'** इति योगरत्ने उक्तम् । अथ ब्रह्मा वायुमार्गसंचरणशीलान् पक्षिरूपान् पशून् ससर्ज । अरण्येभवान् मृगादीन् ग्रामे भवाः ताञ्च चक्रेत्यर्थः ।।

सा.भा. - सर्वहुतः । सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत् । तादृशात् **तस्मात्** पूर्वोक्तात् मानसात् **यज्ञात् पृषदाज्यं** दधिमिश्रमाज्यं **संभृतं** संपादितम् । दधि चाज्यं चेत्येवमादिभोग्यजातं सर्वं संपादितमित्यर्थः । तथा **वायव्यान्** वायुदेवताकाँल्लोक-प्रसिद्धान् **आरण्यान् पशून् चक्रे** उत्पादितवान् । आरण्या हरिणादयः । तथा **ये च ग्राम्याः** गवाश्वादयः **तानपि** चक्रे । पशूनामन्तरिक्षद्वारा वायु**देवत्यत्वं** यजुर्ब्राह्मणे समाम्नायते - **'वायवः स्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षाः । अन्तरिक्षदेवत्याः खलु वै पशवः । वायव एवैनान्परिददाति'** (तै.ब्रा.३-२-१-३) इति ।। ८ ।।

तस्मा॒द्यज्ञात्स॑र्व॒हुत॒ः [3]ऋच॒ः सामा॑नि जज्ञिरे ।
छन्दा॑ंसि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥ ९ ॥

---

१. पृषदाज्यशब्दार्थं विवृणोति श्रुत्यन्तरे - ओषध्यः पशवो वृक्षाः वीरुदाज्यं पयोदधि । हविर्भूमिर्दिशश्श्रद्धा कालश्चैतानि द्वादश ।। (म.भा.शां.प.२६०-१६) अन्नं हि पृषदाज्यम् प्राणो हि पृषदाज्यम् (श.ब्रा.३-८-४-८)

२. ग्राम्याऽरण्यादि पशुभेदान् वर्ण्यते - गौरजः पुरुषो मेषश्चाश्वातरगर्दभाः । एतान् ग्राम्यान् पशूनाहुः आरण्यांश्च निबोध मे ।। (वि.पु.१-५-५१)
श्वापदा द्विखुरा हस्ति वानराः पक्षिपञ्चमाः । औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः ।। (वि.पु.१-५-५२)

३. ऋगादि वेदानां सृष्टि अनुवर्ण्यते श्रुतिस्मृतिषु - 'ऋचः सामानि छन्दांसि पुराणं यजुषा सह । उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिवि श्रिताः ।' (अथर्व.११-७-२४)
वेदानां गायत्र्यादिछन्दोन्वितत्वात् पुनश्छन्दांसीति पदं चतुर्थस्याथर्ववेदस्योत्पत्तिं ज्ञापयतीत्यवधेयम् । (ऋ.भा.भू.)
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।। (म.स्मृ.१-२१)
अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम् ।।(म.स्मृ.१-२३)

प्र. - सर्वहुतः - ब्रह्मणः, **तस्मात् - यज्ञात्** - पूर्वोक्तयागान्, **ऋचः सामानि** - ऋक् शाखाः सामशाखाश्च, **जज्ञिरे** - उत्पन्नाः, **तस्मात् छन्दांसि जज्ञिरे** तादृशात् यागात् गायत्र्यादीनि छन्दांसि उत्पन्नानि, **तस्मात् - यजुः** - एवं अतः यजुश्शाखाः, **अजायत** - समुत्पन्नाः ।।

ता. - चतुर्मुखस्य मानसीययागात् ऋचः - ऋग्वेदस्य, एकविंशति- शाखाः सामानि - सामवेदस्य सहस्रशाखाश्च जज्ञिरे - उत्पन्नाः । तत्सर्गीयप्रथमोच्चारण- विषयत्वरूपां उत्पत्तिं प्रापुः । तस्मात् चतुर्मुखात् छन्दांसि गायत्र्यादीनि जज्ञिरे उत्पन्नानि । यजुः एकोत्तरशतयजुश्शाखाः उत्पन्नाः ।।

सा.भा. - सर्वहुतः तस्मात् पूर्वोक्तात् **यज्ञात् ऋचः सामानि** च **जज्ञिरे** उत्पन्नाः । तस्मात् यज्ञात् **छन्दांसि** गायत्र्यादीनि **जज्ञिरे** । **तस्मात्** यज्ञात् **यजुः** अपि **अजायत** ।। ९ ।।

[1]तस्मादश्वा अजायन्त ये के चोभयादतः ।।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ।। १० ।।

प्र. - तस्मात् - एतादृश ब्रह्मणः, **अश्वाः** - तुरगाः, **अजायन्त** - समुत्पन्नाः, **उभयादतः** - उभयतोदन्ताः, **ये के च** (तेप्यजायन्त) - रासभादयः ये ये सन्ति ते सर्वेऽपि अजायन्त इत्यर्थः **तस्मात्** - चतुर्मुखात्, **गावो ह** - धेनवः वृषभाश्च, **जज्ञिरे** - उत्पन्नाः, **तस्मात्** - अस्मात्, **अजावयः** - अज-मेषादयः, **जाताः** - उत्पन्नाः ।।

ता. - वेदसृष्टिकथनात् परं तत्प्रतिपाद्ययज्ञस्य उपयोगिपदार्थसृष्टिमाह - ब्रह्मणः अश्वाः, उभयतो दन्ताः - मुखस्य ऊर्ध्वाधोभागयोरपि दन्तवन्तः ये के च वानररासभादयः सन्ति तेऽपि सर्वे जाताः एवं गावः छागाः मेषाश्च समुत्पन्नाः ।।

सा.भा. - तस्मात् पूर्वोक्ताद्यज्ञात् **अश्वा अजायन्त** उत्पन्नाः । तथा **ये के च** अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च **उभयादतः** ऊर्ध्वाधोभागयोः उभयोः दन्तयुक्ताः सन्ति तेऽप्यजायन्त । तथा **तस्मात्** यज्ञात् **गावः च जज्ञिरे** । किंच **तस्मात्** यज्ञात् **अजावयः** च **जाताः** ।। १० ।।

---

१. भगवच्छरीरादेव अश्वादय उत्पन्नाः इति पुराणेऽपि स्मर्यते - 'अवयो वक्षसश्चक्रे मुखतोऽजान् स सृष्टवान् । सृष्टवानुदराद् गाश्च पार्श्वाभ्यां च प्रजापतिः' ।। (वि.पु.१-५-४८)
पद्भ्यां श्चाश्वान् स मातङ्गान् रासभान् गवयान् मृगान् । उष्ट्रानश्वतरांश्चैव न्यङ्कुनन्यांश्च जातयः ।।
(वि.पु.१-५-४८,४९)

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥ ११ ॥

प्र. - यत् - यदा, **पुरुषं -** चतुर्मुखाख्यं, **व्यदधुः -** पशुत्वेन अकल्पयन्, तदा, **कतिधा -** कतिप्रकारत्वेन, **व्यकल्पयन् -** विविधं अकल्पयन्, **अस्य -** ब्रह्मणः, **मुखं, किम् -** किंवर्णोत्पादकमासीत्, **कौ -** कीदृशवर्णोत्पादकौ, बाहू आस्ताम्, **कौ -** कीदृशवर्णोत्पादकौ, **ऊरू -** ऊरू आस्ताम्, **पादौ -** चरणौ च, **उच्येते -** उक्तमिति प्रश्नरूपम् ।।

ता. - यज्ञानुष्ठानसाधनीभूतपदार्थसृष्टिमुक्त्वा यज्ञानुष्ठायिनां ब्राह्मणादीनां सृष्टिं वक्ष्यन् ब्रह्मणः एकैक अवयवाद् एकैकवर्णोत्पत्तिः इत्यमुं अंशं प्रश्नोत्तररूपेण स्फुटीकुर्वन् अर्थात् तत्तद्वर्णानां गुणभेदादिकमपि सूचयति - यदा पुरुषं व्यदधुः पशुत्वेन अकल्पयन् तदा कतिधाव्यकल्पयन्, सृज्यमनुष्यादि उपादानभूतं चतुर्मुखशरीरं कतिविभागविशिष्टं अकल्पयन् । एकस्यैव चतुर्मुखशरीरभागस्य वर्णचतुष्टयोपादानत्वे गुणभेदानुपपत्त्या चतुर्मुखः स्वशरीरं कतिधा विभक्तवान् इति पर्यवसितार्थः । प्रत्येकं अवयवस्य एकैकवर्णोत्पत्तिस्थानत्वे कस्मात् स्थानात् कस्य वर्णस्य उत्पत्तिः इत्याह - मुखमिति अस्य चतुर्मुखस्य मुखं किंरूपमासीत् । बाहू - पाणी कौ अर्थः पूर्ववत् । पादौ - चरणौ कौ इति अनुषज्यते । अत्र च उत्तरानुसारेण मनः किं चक्षुः किमित्यादयः प्रश्नाः अभिप्रेता इत्यनुसन्धेयम् ।।

सा.भा. - प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते । प्रजापतेः प्राणरूपा देवाः **यत्** यदा पुरुषं विराड्रूपं **व्यदधुः** संकल्पेनोत्पादितवन्तः तदानीं **कतिधा** कतिभिः प्रकारैः **व्यकल्पयन्** विविधं कल्पितवन्तः । **अस्य** पुरुषस्य **मुखं किम्** आसीत् । **कौ** बाहू अभूताम् **का ऊरू** । कौ च **पादावुच्येते** । प्रथमं सामान्यरूपः प्रश्नः पश्चात् मुखं किमित्यादिना विशेषविषयाः प्रश्नाः ।। ११ ।।

[१]ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥

---

१. इतिहासपुराणेषु वर्णलक्षणं उपवर्ण्यते - 'ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं विशः । पादौ यस्याश्रिता शूद्राः तस्मै वर्णात्मने नमः' ।। (म.भा.शां.प.-४७-४३)
सद्गुणो ब्राह्मणो वर्णः क्षत्रियस्तु रजो गुणः । तमो गुणस्तथा वैश्यो गुणसाम्यात्तु शूद्रता ।। (भ.पु.२३-६८)
चातुर्वर्ण्यप्रमाणं च सत्यं च ब्रह्म चैव ह । शूद्रेष्वपि च सत्यं च दानमक्रोध एव च ।।
शूद्रे चैतद् भवेल्लक्ष्यं द्विजे तच्च न विद्यते । न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ।।
(सर्प-युधिष्ठिर संवाद) - म.भा.व.प.१७७-१८,२० । १७७-१५,३३)

प्र. - अस्य - चतुर्मुखस्य, **ब्राह्मणः** - ब्राह्मणवर्णः, **मुखम्** - मुखतः, **आसीत्** - अभूत्, **राजन्यः** - क्षत्रियवर्णः, **बाहू** - बाहुत्वेन, **कृतः** - निष्पादितः, **तत्-अस्य** - तदानीं ब्रह्मणः, **यत्** - **ऊरू** -यौ ऊरू तद्रूपः, **वैश्यः** - वैश्यवर्णः उदितः, **पद्भ्यां** - चरणाभ्यां, **शूद्रः** - शूद्रवर्णः, **अजायत** - उत्पन्नः ।।

ता. - अथ पूर्वोक्तप्रश्नानां उत्तराणि आह - **ब्राह्मणोऽस्य** इत्यादिना - ब्राह्मणः प्रजापतेः आननमासीत् । मुखात् उत्पन्नः ब्राह्मण इत्यर्थः । क्षत्रियः बाह्वोः समुत्पन्नः । अस्य ऊरुभ्यां वैश्यः उदितः पादाभ्यां शूद्रः अजायत । एवंरीत्या मनुष्याणां उत्पत्तिरपि वर्ण्यते ।।

सा.भा. - इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि दर्शयंति । **अस्य** प्रजापतेः **ब्राह्मणः** ब्राह्मणत्वजातिविशिष्टः पुरुषः **मुखमासीत्** मुखादुत्पन्न इत्यर्थः । योऽयं **राजन्यः** क्षत्रियत्वजातिमान् पुरुषः सः **बाहू कृतः** बाहुत्वेन निष्पादितः । बाहुभ्यामुत्पादित इत्यर्थः । **तत्** तदानीम् **अस्य** प्रजापतेः **यत्** यौ **ऊरू** तद्रूपः **वैश्यः** संपन्नः । ऊरुभ्यामुत्पन्न इत्यर्थः । तथास्य **पद्भ्यां** पादाभ्यां **शूद्रः** शूद्रत्वजातिमान् पुरुषः **अजायत** । इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुःसंहितायां सप्तमकाण्डे **'स मुखतस्त्रिवृतं निरमिमीत'** (तै.सं.७-१-१-४) इत्यादौ विस्पष्टमाम्नाता । अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये ।। १२ ।।

[१]चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च [२]प्राणाद्वायुरजायत ॥ १३ ॥

प्र. - मनसः - चतुर्मुखस्य मनसः, **चन्द्रमाः** - शीतांशुः चन्द्रः, **जातः** - उत्पन्नः, **चक्षोः** - चक्षुषः, **सूर्यः** - सूर्यदेवः, **अजायत** - समुदितः, **मुखात्** - वाचः, **इन्द्रश्च-अग्निश्च** - इन्द्रदेवः अग्निदेवश्च उत्पन्नौ, **प्राणात्** - अस्य प्राणद्वारात्, **वायुः** - वायुभगवान्, **अजायत** - जातः ।।

ता. - एवं यज्ञकर्तॄणां उत्पत्तिं उक्त्वा यष्टव्यदेवतोत्पत्तिमाह **चन्द्रमा मनस** इति चतुर्मुखरूपधरस्य भगवतः मनसः चन्द्रमाः जातः । तदुत्पन्नस्य चन्द्रमसः

---

१. अग्न्यादिदेवानां सृष्टिः श्रुत्यन्तरे, भारते च उपबृंहितम् - यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः । सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः ।। (म.भा.शां.प.४७-६८)
यस्य सूर्यश्चक्षुः चन्द्रमाश्च पुनर्णवः । अग्निं यश्चक्रे आस्यम्, तस्मै ज्येष्ठाय ब्रह्मणे नमः ।

२. यस्य वातः प्राणापानौ, चक्षुर्, अङ्गिरसोऽभवन् । दिशो यश्चक्रे प्रज्ञानीः; तस्मै ज्येष्ठाय ब्रह्मणे नमः; ।। (अथर्व.१०-७-३२-३४)

अतिशीतलत्वं सुखावहत्वं च उपपन्नम् । तस्य चक्षुषः सूर्यः सर्वार्थप्रकाशकरः अजायत । भगवत्कटाक्षस्य सत्वविवर्धनद्वारा सर्वार्थप्रकाशकत्वात् तदुत्पन्नस्य सूर्यस्य सर्वार्थप्रकाशकत्वं उपपन्नं भवति । भगवन्मुखात् इन्द्रः अग्निश्च उत्पन्नौ । इन्द्रः परमैश्वर्यवान्, देवता सार्वभौमः । अग्निः देवानां मुखस्थानीयः अनलश्च । भगवतः प्राणात् वायुः अजायत । प्राणात् सर्वप्राणहेतोः चतुर्मुखरूपधरस्य भगवतः प्राणात् वायु उत्पन्नः अतः वायुः सर्वप्राणहेतुभूतः ।।

सा.भा. - यथा दध्याज्यादिद्रव्याणि गवादयः पशव ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । प्रजापतेः **मनसः** सकाशात् **चन्द्रमाः जातः** । **चक्षोः** च चक्षुषः **सूर्यः** अपि **अजायत** । अस्य **मुखादिन्द्रश्चाग्निश्च** देवावुत्पन्नौ । अस्य **प्राणाद्वायुरजायत** ।। १३ ।।

[1]नाभ्या॑ आसीद॒न्तरि॑क्षं शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॒त्तथा॑ लो॒काँ अ॑कल्पयन् ॥ १४ ॥

प्र. - **नाभ्याः** - नाभिप्रदेशात्, **अन्तरिक्षं** - अन्तरिक्षलोकः, **आसीत्** - अभूत्, **शीर्ष्णः** - शिरसः, **द्यौः** - द्युलोकः, **सं अवर्तत** - सम्यक् जातः, **पद्भ्याम्** - पादाभ्यां, **भूमिः** - भूलोकः, **श्रोत्रात्** - कर्णात्, **दिशः** - प्राच्यादिदिशश्च जाताः, **तथा** - यथा पूर्वकल्पे आसन् तथा, **लोकान्** - चतुर्दशलोकान्, **अकल्पयन्** - चकार ।।

ता. - एतावता उपास्य देवतामुक्त्वा अथ उपासीनानां भोगस्थानभूतस्य अन्तरिक्षादिलोकस्य सृष्टिमाह - **नाभ्या आसीदि**त्यादिना - देहमध्यप्रदेशात् नाभिस्थानात् अन्तरिक्षं - सूर्यमण्डलभूमण्डलयोः मध्यदेशभूतः अन्तरिक्षलोकः आसीत् शीर्ष्णः सर्वावयवेषु ऊर्ध्वस्थानभूतात् शिरसः सर्वेषां लोकानां ऊर्ध्वस्थाने द्यौः देवलोकं अजायत । ब्रह्मणः चरणाभ्यां भूमिः जातः । **शीर्ष्णो द्यौ** इति उपरितनानां सप्तलोकानां

---

१. भूम्यादि सृष्टिं उपवर्णितं श्रुत्यन्तरे - यस्य भूमिः प्रमा अन्तरिक्षमुतोदरम् । दिवं यश्चक्रे मूर्धानं-तस्मै ज्येष्ठाय ब्रह्मणे नमः । (अथर्व.१०-७-३२)
पृथिव्याः गुणान् भारते एवं वर्णितं - 'भूमेः स्थैर्यं गुरुत्वं च काठिन्यं प्रसवार्थता । गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः' ।। (म.भा.शां.प.२५४-३)
पिण्डब्रह्माण्डोपनिषदि विराट्पुरुषात् चतुर्दश लोकानां सृष्टिः उपबृंहितम् - पादाधस्तात् तलं ज्ञेयं, पादोर्ध्वं वितलं, तथा । जानुनोः सुतलं विद्धि, सक्थिदेशे महातलम् ।।
सक्थिमूले तलातलं, गुह्ये देशे रसातलम् । पातालं कटिसंस्थं च सप्तलोकाः प्रकीर्तिताः ।।
भूर् लोकं नाभिमध्ये तु, भुवर् लोकं तदूर्ध्वके । स्वर् लोकं हृदयं विद्यात्, कण्ठदेशे महस्तथा ।।
जनलोकं वक्त्रदेशे, तपोलोकं ललाटके । सत्यलोकं ब्रह्मरन्ध्रे, भुवनानि चतुर्दश ।। इति ।।

उपलक्षणम् । एवं पद्भ्यां भूमिः इति अधोभागस्थितानां सप्तलोकानां उपलक्षणम् । श्रोत्रेन्द्रियात् दिशः उत्पन्नाः । इदं सप्तद्वीपानां उपलक्षणम् । यथा पूर्वस्मिन् कल्पे लोका आसन् तथैव अस्मिन् कल्पेऽपि अन्तरिक्षादिलोकान् अकल्पयत् ।।

सा.भा. - यथा चन्द्रादीन् प्रजापतेर्मनःप्रभृतिभ्योऽकल्पयन् **तथा** अन्तरिक्षादीन् **लोकान्** प्रजापतेः नाभ्यादिभ्यो देवाः **अकल्पयन्** उत्पादितवन्तः । एतदेव दर्शयति । **नाभ्याः** प्रजापतेर्नाभेः **अन्तरिक्षमासीत्** । **शीर्ष्णः** शिरसः द्यौः **समवर्तत** उत्पन्ना । अस्य **पद्भ्यां** पादाभ्यां **भूमिः** उत्पन्ना । अस्य **श्रोत्रात् दिशः** उत्पन्नाः ।। १४ ।।

[१]स॒प्तास्या॑सन् परि॒धय॒स्त्रिः स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न् पुरु॑षं प॒शुम् ॥ १५ ॥

प्र. - अस्य - सृष्टियज्ञस्य, **परिधयः -** परितोधीयन्ते इति परिधयः (अग्नेः समीपे परितः धीयमानदीर्घसमिधः) **सप्त -** सप्तसंख्याकाः परिधयः, **आसन् -** अभवन्, **त्रिः-सप्त -** त्रिगुणित सप्त संख्याकानि, **समिधः -** अग्नेः दीप्तिसाधनीय - सचर्मकाष्ठानि, **कृताः -** कृतवन्तः, **देवाः -** साध्याख्याः, **यत् -** यदा, **यज्ञं -** सृष्टियज्ञं, **तन्वानाः -** कुर्वन्तः, **पुरुषं -** चतुर्मुखाख्यं, **पशुम् -** पशुस्थानीयं, **अबध्नन् -** अमन्यन्त ।।

ता. - अस्य मानसयज्ञस्य परिधयः - आहवनीयादीनां अग्नीनां त्रिषु पार्श्वेषु प्रथममेखलाया उपरि निधीयमानानि मेखलापरिमित आयामानि काष्ठानि परिधय इत्युच्यन्ते । तादृशपरिधयः सप्त संख्याका आसन् । (अत्र उत्तरवेदि परिधयः त्रयः, आहवनीय परिधयः त्रयः । आदित्यस्सप्तमः इति) जगत्सृष्टेः पूर्वं वर्तमानानां सप्तसंख्याकानां पदार्थानामेव तेन रूपेण ध्येयत्वस्य आवश्यकत्वेन पृथिव्यप्तेजोवाय्वाकाश अहंकारबुद्धय एव परिशेषात् परिधित्वेन ध्याता आसन् इत्यवधेयम् । अस्य यज्ञस्य त्रिस्सप्त - एकविंशतिसंख्याका इत्यर्थः । समिधः - अग्नेः दीप्तिसाधनीभूतानि काष्ठानि कृताः । पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि चेति दश, एकादशं मनः, पञ्चतन्मात्राः, पञ्चमहाभूतानि चेति दश, एतत् सर्वं मिलित्वा एकविंशतिसंख्याका इन्द्रियादय एव ज्ञानभोगाद्युद्दीपनहेतुभूताः

---

१. अत्रोक्त परिधीनां सप्तसङ्ख्यानां वैशिष्ट्यं ऋग्भाष्यभूमिकायां एवं वर्णितं सायणेन - अस्य ब्रह्माण्डस्य ब्रह्माण्डान्तर्गतलोकानां वा सप्त सप्त परिधयो भवन्ति । समुद्र एकस्तदुपरि त्रसरेणुसहितो वायुः द्वितीयः । मेघमण्डलं तत्रस्थो वायुस्तृतीयः । वृष्टिजलं चतुर्थम्, तदुपरि वायुः पञ्चमः, अत्यन्तसूक्ष्मो धनञ्जयष्षष्टः । सूत्रात्मा सर्वत्र व्याप्तः सप्तमश्च (ऋ.भा.भू.)

परमात्माग्निसमुद्दीपनहेतुत्वेन ध्याता इति । देवाः - इन्द्रियाणि साध्याख्या वा यदा यज्ञं मानसं तन्वानाः - कुर्वन्तस्सन्तः चतुर्मुखं पुरुषं पशुं पशुस्थानीयं अबध्नन् - हृदयाख्ये यूपे अध्यवसायरूपया रशनया अनन्यगतिं चक्रुः ।।

सा.भा. - अस्य सांकल्पितयज्ञस्य गायत्र्यादीनि **सप्त** छन्दांसि **परिधयः आसन्** । ऐष्टिकस्याहवनीयस्य त्रयः परिधय उत्तरवेदिकास्त्रय आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः । अतः एवाम्नायते- **'न पुरस्तात्परिदधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहन्ति'** (तै.सं.२-६-६-३) इति । तत एत आदित्यसहिताः सप्त परिधययोऽत्र सप्त छन्दोरूपाः । तथा समिधः त्रिः सप्त त्रिगुणीकृतसप्तसंख्याकाः एकविंशतिः **कृताः** । **'द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः'** (तै.सं.५-१-१०-३) इति श्रुताः पदार्था एकविंशतिदारुयुक्त इध्मत्वेन भाविताः । **यत्** यः पुरुषो वैराजोऽस्ति तं **पुरुषं देवाः** प्रजापतिप्राणेन्द्रियरूपाः **यज्ञं तन्वानाः** मानसं यज्ञं **तन्वानाः** कुर्वाणाः **पशुम् अबध्नन्** विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र 'यत्पुरुषेण हविषा' इत्युक्तम् ।। १५ ।।

[1]यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह [2]नाकं महिमानस्सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

।। इति ऋग्वेदीयं पुरुषसूक्तं समाप्तम् ।।

प्र. - देवाः - इन्द्रियात्मकाः, **यज्ञेन** - सृष्टियज्ञेन, **यज्ञं** - यजनीयं परमपुरुषं, **अयजन्त** - अनुष्ठितवन्तः, **तानि-धर्माणि** - सो धर्मः, **प्रथमानि** - प्रथमतः, **आसन्** - आसीत्, **यत्र** - यस्मिन् परमपदे, **पूर्वे** - पूर्वस्मिन् कल्पे, **साध्याः-देवाः** - साध्याख्याः देवाः, **सन्ति** - वर्तन्ते (तत्रैव), **ते ह** - साध्याः देवाः, **महिमानः** - भगवन्महिमोपेताः, **नाकम्** - श्रीवैकुण्ठाख्यं परमपदं, **सचन्ते** - प्राप्नुवन् ।।

ता. - देवाः - मुमुक्षवः यज्ञेन - यजनीय देवतोद्देश्यकद्रव्यत्यागरूपेण कर्मणा यज्ञं - यजनीयदेवतारूपं परमपुरुषं अयजन्त - भगवन्तमुद्दिश्य आत्मसमर्पणरूपं यागम् अकुर्वन् इत्यर्थः । तानि धर्माणि अत्र लिङ्गवचनयोः व्यत्ययः छान्दसः । स धर्म

---

१. अस्याः मन्त्रार्थः उपबृंहितं च अन्यत्र -यागसाधनभूतेन स्वात्मना मेध्यमीश्वरम् । अयजंस्तानि धर्माणि प्रथमानीति नः श्रुतम् ।।

२. नाकं नित्यनिरतिशयानन्दैकतानं मोक्षपरमपदाक्षरपरंधामादिशब्दितं नाकाख्यं वैकुण्ठलोकम् ।

एव प्रथमानि आसन् - प्रथमतः आसीत्, कल्पान्तरेऽपि अयमेव धर्मः सर्वप्रधान आसीत् इति भावः । यत्र पूर्वे - वैकुण्ठलोके पुरातनाः साध्याख्या देवाः सर्वदा भगवत्स्तुतिपरायणाः **सन्ति** - समिन्धते ते-देवाः महिमानः भगवद्विभूति अन्तर्गततया भगवद्विभूतिभूता इत्यर्थः । नाकं श्रीमोक्षपरमपदाक्षर परंधामादिशब्दितं श्रीवैकुण्ठलोकं सचन्ते समवेता भवन्ति इत्यर्थः ।।

सा.भा.- पूर्वं प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति । **देवाः** प्रजापतिप्राणरूपाः **यज्ञेन** यथोक्तेन मानसेन संकल्पेन **यज्ञं** यथोक्तयज्ञस्वरूपं प्रजापतिम् **अयजन्त** पूजितवन्तः । तस्मात्पूजनात् **तानि** प्रसिद्धानि **धर्माणि** जगद्रूपविकाराणां धारकाणि **प्रथमानि** मुख्यानि **आसन्** । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः । अथोपासनतत्फलानु-वादकभागार्थः संगृह्यते । **यत्र** यस्मिन् विराट्प्राप्तिरूपे नाके **पूर्वे साध्याः** पुरातना विराडुपास्तिसाधकाः **देवाः** सन्ति तिष्ठन्ति तत् **नाकं** विराट्प्राप्तिरूपं स्वर्गं ते **महिमानः** तदुपासका महात्मानः **सचन्त** समवयन्ति प्राप्नुवन्ति इति ।। १६ ।।

।। ऋग्वेदीयस्य पुरुषसूक्तस्य सायणभाष्यं समाप्तम् ।।

शुक्लयजुर्वेदीयं पुरुषसूक्तम्[1]

[सायण-उवट-महीधरभाष्यसहितम्]

सा.भा. - पूर्वस्मिन् अध्याये पशूपाकरणहोमार्थाः मन्त्राः पशवश्च उक्ताः । अस्मिन् अपि पौरुषमेधिकाः मन्त्राः उच्यन्ते । कात्यायनः - **'नियुक्तान् ब्रह्माभिष्टौति होतृवदनुवाकेन सहस्रशीर्षेति'** (का.श्रौ.सू.२१-१-११) । **'सहस्रशीर्षा'** इत्यनेन षोडशर्च्चेन सूक्तेन नियुक्तान् ब्राह्मणादीन् पुरुषपशून् दक्षिणतः ब्रह्माभिष्टौति अभिष्टुयात् इत्यर्थः । तथा च ब्राह्मणम् - **'नियुक्तान् पुरुषान् ब्रह्मा दक्षिणं तान् पुरुषेण नारायणेन अभिष्टौति । सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपादित्यनेन षोडशर्चेन, षोडशकलं वा इदꣳसर्वपुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुध्या'** (श.ब्रा.का.सं.१३-६-२-१२) इति । तत्र प्रथमामाह -

स॒हस्र॑शीर्षा॒ पुरु॑षस्सहस्रा॒क्षस्स॒हस्र॑पात् ।
स भूमि॑ꣳ स॒र्वत॑स्पृ॒त्वात्य॑तिष्ठद्दशाङ्गुलम् ॥ १ ॥

सहस्रशीर्षा; सहस्रशब्दस्य उपलक्षणत्वात् अनन्तैः शिरोभिः युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयानि एवेति सहस्रशीर्षत्वम् । एवम् अक्षिषु पादेष्वपि योजनीयम् । **पुरुषः** - ब्रह्माण्डरूपे पुरे शेते इति सर्वप्राणिसमष्टिरूपः ब्रह्माण्डदेहः विराडाख्यः पुरुषः इत्यर्थः । तथा च ब्राह्मणं पुरुषशब्दं निरवोचत्, **'इमे वै लोकाः पूः । अयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते, तस्मात् पुरुषः'** (श.ब्रा.१३-६-२-१) इति । यः एवम् उक्तः पुरुषः भूमिं शोभनरूपां सर्वतः **संस्पृश्य सर्वतः** - आवृत्य **दशाङ्गुलं** दशाङ्गुलपरिमितं देशम् **अत्यतिष्ठत्** - अतिक्रम्य अवस्थितः । दशाङ्गुलमिति उपलक्षणम्, ब्रह्माण्डाद् बहिरपि सर्वतः व्याप्य अवस्थित इत्यर्थः ।। १ ।।

उ.भा. - परमात्मविज्ञानानन्दादिगुणाध्यात्मनि प्रभृतः पुरुषमेधो यज्ञः प्रजापतिः लोककालाग्न्यादिवपुः पुरुषोत्पत्तिस्थितिसंहतीनां हेतुः स्वर्गापवर्गैश्वर्यमोक्षदो

---

१. शुक्लयजुर्वेदे काण्वसंहितायां पञ्चत्रिंशेऽध्याये प्रथमानुवाकत्वेन पठितमिदं पुरुषसूक्तम् ।

ज्ञानकर्मसमुच्चयकारणं शरीरं **'यज्ञो वा अस्यात्मा भवती'**ति श्रुतिः । सहस्रशीर्षा
इत्यनुवाकेन षोडशर्चेन अनुष्टुभेन त्रिष्टुबन्त्येन ब्रह्मणे ब्राह्मणम् इत्याद्यवयवभूतपुरुष
अवयवी स्तूयते । इदानीं स्तुत्यर्थं निर्वचनद्वारेण द्रढयितुमाह । **'अथ यस्मात्पुरुषमेधो नानेमे वै लोकाः पूरयमेव पुरुषो योयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषः । तस्य यदेषु लोकेष्वन्नं तदस्यान्नं मेधस्तदस्यैतदन्नं मेधस्तस्मात्पुरुषमेधः'** । (श.ब्रा.१३-६-२-१) पुरुषसूक्तस्य नारायणऋषिः पुरुषो देवतानुष्टुप्छन्दः अन्त्या त्रिष्टुप् मोक्षे विनियोगः । अस्य भाष्यं शौनको नाम ऋषिरकरोत् । प्रथमं विच्छेदः क्रियाकारकसंबन्धः समासः प्रमेयार्थव्याख्येति सर्वमेतज्जनकाय मोक्षार्थं कथयामासेति । सः पुरुषः नारायणाख्यः सर्वतः भुवनकोशस्य भूमिं **स्पृत्वा** - व्याप्य **दशाङ्गुलम् अत्यतिष्ठत्** । दश च तानि अङ्गुलानि दशाङ्गुलानि इन्द्रियाणि । केचिदन्यथा रोचयन्ति दशाङ्गुलप्रमाणं हृदयस्थानम् । अपरे तु नासिकाग्रं दशाङ्गुलमिति । किंभूतोऽसौ सहस्रशीर्षा । अनेकपर्यायः सहस्रशब्दः । अनेकानि शिरांसि यस्य स सहस्रशीर्षा पुरुषः । **सहस्राक्षः** सहस्राणि अक्षीणि नेत्राणि यस्यासौ सहस्राक्षः । **सहस्रपात्** पादानामङ्गानां सहस्राणि यस्य स सहस्रपात् । एतद्गुणः पुरुषः तद्व्याप्य अतिक्रम्य स्थित इति ।। १ ।।

म.भा. - रमाकान्तं गिरं नत्वा हेरम्बं शिवमम्बिकाम् ।
एकत्रिंशेऽधुनाध्याये वेददीपो वितन्यते ।।

'नियुक्तान्ब्रह्माभिष्टौति होतृवदनुवाकेन सहस्रशीर्षेति' (का.श्रौ.सू.२१-१-११) । अस्यार्थः । नियुक्तान् ब्राह्मणमित्यादिपशून् सहस्रशीर्षा इत्यनुवाकेन षोडशर्चेन ब्रह्मा स्तौति होतृवदिति त्रिः प्रथमां त्रिरुत्तमाम् इत्याद्युक्तप्रकारेण इत्यर्थः । **'त्रैधातव्यन्ते समारोह्यात्मन्नग्नी सूर्यमुपस्थायाद्भ्यः संभृत इत्यनुवाकेनानपेक्षमाणोऽरण्यं गत्वा न प्रत्यवेयाद् ग्रामे वाविवत्सन्नरण्योः'** (का.श्रौ.सू.२१-१-१७,१८) । त्रैधातवी उदवसानीयेष्टिः तदन्ते अयं ते योनिरित्यग्नी आत्मनि समारोह्य तदुष्माणमास्ये प्रवेश्याद्भ्यः संभृत इति षड्चेन अनुवाकेन सूर्यमुपस्थाय पश्चादपश्यन्वनं गत्वा ग्रामं नागच्छेत् । वानप्रस्थो भवेदित्यर्थः । यद्वा ग्रामे वस्तुमिच्छन् अरण्योरग्नी समारोप्य अर्कोपस्थानानन्तरं ग्रामे गत्वा यज्ञान् कुर्यादिति सूत्रार्थः । अथ मन्त्रार्थः । नारायणपुरुषदृष्टा जगद्बीजपुरुषदेवत्याः षोडशऋचः पञ्चदशानुष्टुभः षोडशी त्रिष्टुप् । ब्रह्मणे ब्राह्मणमित्याद्याः पुरुषमेधरूपस्य परमात्मनोऽवयवाः पूर्वाध्यायान्ते प्रोक्तास्तेषामवयवी पुरुषोऽत्र स्तूयते । अव्यक्त-महदादिविलक्षणश्चेतनो यः पुरुषः **'पुरुषान्न परं किंचित्'** (क.उ.३-११) इत्यादिश्रुतिषु

प्रसिद्धः सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराजाख्योऽस्ति । कीदृशः । **सहस्रशीर्षा** सहस्रशब्दो बहुत्ववाची । संख्यावाचकत्वे सहस्राक्ष इति विरोधः स्यात् नेत्रसहस्रद्वयेन च भाव्यम् । ततः सहस्रम् असंख्यानि शीर्षाणि शिरांसि यस्य सः **'शीर्षश्छन्दसि'** (पा.सू.६-१-६०) इति शिरःशब्दस्य शीर्षन्नादेशः । शिरोग्रहणं सर्वावयवोपलक्षणम् । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तस्यैवेति सहस्रशीर्षत्वम् । एवमग्रेऽपि । **सहस्राक्षः** सहस्रमक्षीणि यस्य सः । अक्षिग्रहणं सर्वज्ञानेन्द्रियोपलक्षकम् । **सहस्रपात्** सहस्रं पादा यस्य **'संख्यासुपूर्वस्य'** (पा.सू.५-४-१४०) इति पादस्य अन्त्यलोपः । पादग्रहणं कर्मेन्द्रियोपलक्षणम् । सः पुरुषो भूमिं ब्रह्माण्डलोकरूपां **सर्वतः** तिर्यक् ऊर्ध्वमधश्च **स्पृत्वा** व्याप्य । स्पृणोतिर्व्याप्तिकर्मा । यद्वा भूमिशब्दो भूतोपलक्षकः । पञ्चभूतानि व्याप्य दशाङ्गुलपरिमितं देश**मध्यतिष्ठत्** अतिक्रम्यावस्थितः । दशाङ्गुलम् इत्युपलक्षणम् । ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः । यद्वा नाभेः सकाशात् दशाङ्गुलमतिक्रम्य हृदि स्थितः । नाभित इति कुतो लभ्यते **'कतम आत्मा'** (बृ.उ.६-३-७) इत्युपक्रम्य **'सोऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः'** (बृ.उ.६-३-७) इति श्रुतेः विज्ञानात्मनो हृद्यवस्थानं कर्मफलोपभोगाय अन्तर्यामिणो नियन्तृत्वेन । तदुक्तम्-

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' ।। (मुं.उ.३-१-१)

इति । स पुरुषोऽत्र देवता । तथा च श्रुतिः **'इमे वै लोकाः पूरयमेव पूरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषः'** (श.ब्रा. १३-६-२-१) इति ।। १ ।।

पुरु॑ष ए॒वेदꣳ सर्वं॒ँ॒ यद् भू॒तँ यच्च॒ भाव्य॒म् ।
उ॒ताम॑तत्व॒स्येशा॑नो॒ यदन्ने॑नाति॒रोह॑ति ॥ २ ॥

सा.भा. - यद् भूतम् अतीतं जगत्, **यच्च भाव्यं** भविष्यं जगत्, यत् इदं वर्तमानं जगत्, तत् सर्वं पुरुष एव । यद्यपि अस्मिन् वाक्ये वर्तमानाः प्राणिदेवाः सर्वेऽपि विराटपुरुषस्य अवयवाः तथैव अतीतागामिनोः अपि कल्पयोः द्रष्टव्यम् । **उत** अपि च **अमृतत्वस्य** देवत्वस्य अयम् **ईशानः**, यस्मात् कारणात् **अन्नेन** प्राणिनां भोगेन अन्नेन निमित्तभूतेन, स्वकीयां कारणावस्थाम् अतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति । तस्मात् प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारात् न इदं वस्तुतत्त्वम् इत्यर्थः ।। २ ।।

उ.भा. - स एव पुरुषः पूर्वपर्यायविशेषित एवशब्दो नान्यः । **इदं** वर्तमानकं **सर्वम्** यच्च भूतमतीतम् **यच्च भाव्यं** भविष्यत् तस्य कालत्रयस्य ईशानः । न केवलं कालत्रयस्य ईशानः । **उत अमृतत्वस्यापि** मोक्षस्यापि । उतशब्दोऽपिशब्दार्थे । कस्मात्कारणात् । **यत् अन्नेन** अमृतेन **अतिरोहति** अतिरोधं करोति । सर्वस्येश्वर इति ।। २ ।।

म.भा. - यत् इदं वर्तमानं जगत् तत्सर्वं पुरुष एव । **यत् भूतम**तीतं जगत् **यच्च भाव्यं** भविष्यं जगत् तदपि पुरुष एव । यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्य अवयवाः तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमिति भावः । **उत** अपि च **अमृतत्वस्य** देवस्य **ईशानः** स्वामी स पुरुषः **यत्** यस्मात् **अन्नेन** प्राणिनां भोग्येनान्नेन फलेन निमित्तभूतेन **अतिरोहति** स्वीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्पुरुष एव । प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वम् इत्यर्थः । यद्वा सर्वं पुरुषश्चेत् तर्हि परिणामीत्याशङ्क्याह । अमृततत्वस्यामरणधर्मस्य ईशानः मुक्तेरीशः । यो हि मोक्षेश्वरो नासौ म्रियत इत्यर्थः । किंच यत् जीवजातम् अन्नेनातिरोहति उत्पद्यते तस्य सर्वस्य च ईशानः ब्रह्मादिस्तम्बपर्यन्तो भूतग्राम उक्तः तस्य अन्नेनैव स्थितेः **'इतःप्रदानाद्धि देवा उपजीवन्ति'** इति श्रुतेः ।। २ ।।

एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥

सा.भा. - अतीतानागतवर्तमानरूपं जगत् यावत् अस्ति, **एतावान् अस्य** पुरुषस्य **महिमा** स्वकीयसामर्थ्यविशेषः, न तु तस्य वास्तवस्वरूपं, वास्तवस्तु पुरुषः । अतः महिम्नोऽपि **ज्यायान्** अतिशयेन अधिकः, एतच्च उभयं स्पष्टीक्रियते **विश्वा भूतानि** कालत्रयवर्तीनि प्राणिजातानि **अस्य पुरुषस्य पादः** चतुर्थांशः । अस्य अवशिष्टं **त्रिपात्** स्वरूपम् अमृतं विनाशरहितं सत् **दिवि** द्योतमानात्मके स्वप्रकाशरूपे अवतिष्ठते । यद्यपि- **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै.उ.२-१) इत्याद्यस्य आम्नातस्य परंब्रह्मणः इयत्तायाः अभावात् अंशचतुष्टयं च निरूपयितुं न शक्यं तथापि जगत् इदं ब्रह्मस्वरूपापेक्षया अत्यल्पमिति विवक्षितत्वात् पादत्वोपन्यासः ।। ३ ।।

उ.भा. - अस्य पुरुषस्य पूर्वोक्तविशेषणविशेषितस्य एतावान् महिमा एतदेव महत्त्वमस्य । अतः कारणात् ज्यायांश्च पुरुषः महानित्यर्थः । कर्मात् महत्त्वमायातम् । यस्मात्पादः एकोंऽशः अस्य पुरुषस्य । **विश्वा भूतानि** विश्वानि चतुर्दशभुवनसमूहे

यानि चतुर्धा भूतानि तानि एकोंशः । त्रिपात्पुनः त्रयोंऽशाः अस्य पुरुषस्य अमृतम् ऋग्यजुःसामलक्षणम् आदित्यलक्षणं वा दिवि द्योतते इति ।। ३ ।।

म.भा. - अतीतानागतवर्तमानकालसंबद्धं जगद्यावदस्ति एतावान्सर्वोऽपि **अस्य** पुरुषस्य **महिमा** स्वकीयसामर्थ्यविशेषो विभूतिः नतु वास्तवं स्वरूपम् । वास्तवपुरुषस्तु अतः अस्मात् महिम्ना जगज्जालात् **ज्यायांश्च** अतिशयेन अधिकः । एतदुभयं स्पष्टीक्रियते । **अस्य** पुरुषस्य **विश्वा** सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादश्चतुर्थांशः । अस्य पुरुषस्य अवशिष्टं त्रिपात्स्वरूपम् **अमृतं** विनाशरहितं तत् **दिवि** द्योतनात्मके स्वप्रकाशे स्वरूपेऽवतिष्ठत इति शेषः । यद्यपि **'सत्यं ज्ञानमनन्तं ब्रह्म'**त्याम्नातस्य परब्रह्मण इयत्ताया अभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मरूपापेक्षया अल्पमिति विवक्षिततत्वात् पादत्वोपन्यासः ।। ३ ।।

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥

सा.भा. - यः अयं **त्रिपात्** पुरुषः संसारस्पर्शरहितः ब्रह्मरूपः सः अयम् **ऊर्ध्वः उदैत्** अस्मात् अज्ञानकार्यात् संसारात् बहिर्भूतः सन् अत्रत्यैः गुणदोषैश्च अस्पृष्टः उत्कर्षणस्थितवान् । तस्य यः अयं पादलेशः सः अयम् इह मायायां पुनः अभवत् । सृष्टिसंहाराभ्यां पुनः पुनः आगच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवता अपि उक्तम् - **'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'** (भ.गी.१०-४२) इति । **ततः** मायायाम् आगत्य अनन्तरं **विष्वङ्** देवतिर्यगादिरूपेण विविधः सन् **व्यक्रामत्** व्याप्तवान् । **साशनानशने** अभिलक्ष्य **साशनं** भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम् **अनशनं** तद्रहितम् अचेतनं गिरिनद्यादिकं, तत् उभयं यथा स्यात् तथा स्वयमेव विविधः भूत्वा व्याप्तवान् इत्यर्थः ।। ४ ।।

उ.भा. - यस्मादयं पुरुषः **त्रिपात्** त्र्यंशभूतः **ऊर्ध्वः** उपरिष्टात् **उदैत्** देदीप्यमानस्तिष्ठति । **अस्य** च पुरुषस्य **पादः** एकोंऽशः **इह** त्रैलोक्ये बीजभूतं चतुर्षु भूतेषु **अभूत्** भूतम् । **ततः** तस्मात्कारणात् **विष्वङ्** भुवनकोशं **व्यक्रामत्** उत्पन्नम् इत्यर्थः । तस्मादेव पुरुषात् । **साशनानशने** अभिसाशनं स्वर्गम् **अनशनं** मोक्षम् सर्वं जगत्स्वर्गं प्रति मोक्षं प्रति च तस्मादेव उत्पन्नमित्यर्थः ।। ४ ।।

म.भा. - योऽयं त्रिपात्पुरुषः संसारस्पर्शरहितब्रह्मरूपः अयम् **ऊर्ध्वः उदैत्** अस्मात् अज्ञानकार्यात् संसाराद्बहिर्भूतोऽत्रत्यैः गुणदोषैः स्पृष्टः उत्कर्षेण स्थितवान् । तस्यास्य **पादः** लेशो जगद्रूपः **इह** मायायां **पुनः अभवत्** सृष्टिसंहाराभ्यां पुनः पुनरागच्छति । सर्वस्य जगतः परमात्मलेशत्वं भगवतापि उक्तम् **'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'** (भ.गी.१०-४२) इति । **ततो** मायायाम् आगत्यानन्तरं **विष्वङ्** विषु सर्वत्राञ्चतीति विष्वङ् देवतिर्यगादिरूपेण विविधः सन् **व्यक्रामत्** व्याप्तवान् । किंकृत्वा **साशनानशने अभि** अभिलक्ष्य अशनेन सह वर्तमानं साशनम् अशनादिव्यवहारोपेतं चेतनप्राणिजातम् अनशनं तद्रहितम् अचेतनं गिरिनद्यादिकम् ते अभिलक्ष्य स्वयमेव विविधो भूत्वा व्याप्तवान् इत्यर्थः ।। ४ ।।

ततो॑ [1]वि॒राळ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

सा.भा. - विष्वङ् व्यक्रामत् इति यदुक्तं तदेव प्रपञ्च्यते । तस्मात् आदिपुरुषात् **विराट् अजायत** ब्रह्माण्डदेहः उत्पन्नः । विविधं राजन्ते वस्तूनि अत्रेति विराट् । **विराजो अधि,** विराड्देहस्य उपरि तमेव देहम् अधिकरणं कृत्वा **पुरुषः** तद्देहाभिमानी कश्चित् पुमान् अजायत । यः अयं सर्ववेदान्तवेद्यः परमात्मा स एव स्वकीयमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवः अभवत् । एतच्च आथर्वणिका उत्तरतापनीये विस्पष्टम् आमनन्ति, **'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य अमूढो मूढ इव व्यवहरन्नास्ते माययैव'** (नृ.उ.ता.२-१-९) इति । स जातः विराट् पुरुषः **अत्यरिच्यत** अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तः देवतिर्यङ्मनुष्यादिरूपः अभूत् । **पश्चात्** देवादिदेहभावात् ऊर्ध्वं **भूमिं** ससर्ज इति शेषः । **अथो** भूमिसृष्टेः अनन्तरं तेषां जीवानां **पुरः** ससर्ज । पूर्यन्ते सप्तधातुभिः इति **पुरः** शरीराणि ।। ५ ।।

उ.भा. - तस्मादेव पुरुषात् विश्वोत्पत्तिः । तत्र पूर्वं **विराट् अजायत** । **विराजः अधिपूरुषः** प्रधानं तेजः । **स** क्षेत्रज्ञः ब्रह्मा सृष्टिकृत् जातः सन् अतिरिच्यते । सोऽभितः **पश्चात्** अस्मात् क्षेत्रज्ञात् ब्रह्मणः **भूमिः** पृथिव्यादौ जाता उत्पन्ना इति ।

---

१. माध्यन्दिनशाखायां 'विराट्' इति पाठभेदः ।

अथो अनन्तरम् **पुरः** शरीराणि पुराणि चतुर्विधानि भूतानि **अजायन्त** । पुत्रादीनि तेनैव उत्पादितानि एवमेकोंऽशः तेनैव सर्वं विश्वम् उत्पादितमिति ।। ५ ।।

म.भा. - विष्वङ् व्यक्रामदिति यदुक्तं तदेव प्रपञ्च्यते । **ततः** तस्मात् आदिपुरुषात् **विराट्** ब्रह्माण्डदेहो **अजायत** जातः । विविधं राजन्ते वस्तनि अत्रेति विराट् । विराजः **अधि** विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी एक एव पुमान् अजायत । सर्ववेदान्तवेद्यः परमात्मा स्वमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् इत्यर्थः । एतच्च अथर्वणोत्तरतापनीये स्पष्टमुक्तम् **'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वात्र प्रविष्ट प्रविश्य अमूढो मूढ इव व्यवहरन्नास्ते माययैव'** (नृ.उ.ता.२-१-९) इति । किंच **स जातो** विराट्पुरुषः **अत्यरिच्यत** अतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् पश्चात् देवादिजीवभावादूर्ध्वं **भूमिं** ससर्जेति शेषः । **अथो** भूमिसृष्टेः अनन्तरं तेषां जीवानां **पुरः** ससर्ज । पूर्यन्ते सप्तभिः धातुभिः इति पुरः शरीराणि ।। ५ ।।

तस्मा॑द्य॒ज्ञात्स॑र्व॒हु॒त॒स्सम्भृ॑तम्पृषदा॒ज्यम् ।
प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्या॑नार॒ण्या ग्रा॒म्याश्च॒ ये ॥ ६ ॥

सा.भा. - **सर्वहुतः** सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत् । वसन्तज्यादिरूपस्य बाह्यद्रव्यस्य अद्यापि अनुपपन्नत्वेन हविरन्तरासम्भवात् पुरुषस्वरूपमेव मनसा हविषा इव संकल्प्य, तेन पुरुषाख्येन हविषा देवा मानसं यज्ञम् अकार्षुः इति उत्तरत्र वक्ष्यते । **तस्मात्** मानसाद् **यज्ञात् पृषदाज्यं** दधिमिश्रम् आज्यं **सम्भृतं** सम्पादितम् । दधि च आज्यं च इत्येवम् आदि सर्वं सम्पादितमित्यर्थः । तथा **वायव्यान्** वायुदेवताकान् तान् लोकसिद्धान् **पशून् चक्रे** उत्पादितवान् । ये **आरण्याः** द्विखुरादयः, **ये च ग्राम्याः**, ग्रामे भवाः गवाश्वादयः तान् उत्पादितवान् । पशूनाम् अन्तरिक्षद्वारा वायुदेवत्यं मन्त्रान्तरव्याख्याने समाम्नातम् । **'वायवः स्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षः अन्तरिक्षदेवत्याः खलु वै पशवः वायव एवैनान्परिददाति'** (तै.ब्रा.३-२-१-३) इति ।। ६ ।।

उ.भा. - यथा अग्निष्टोमाख्यात् **तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्** तेन **वायव्यान् पशून् आरण्या ग्राम्याश्च ये** तान् कृतवन्तः । एवम् आत्मयज्ञात् सर्वहुतात्पूरितात् उत्पन्नेन योगिनः सर्वान् पशून् सर्वाणि भूतजातानि करतलवत् पश्यन्ति । पश्यन्ति किल ज्ञानतेजसा भूतजातानि ।। ६ ।।

म.भा. - सर्वं हूयते यस्मिन् स सर्वहुत् **तस्मात्** पुरुषमेधाख्यात् **यज्ञात्** **पृषदाज्यं** दधिमिश्रमाज्यं **संभृतं** संपादितम् । दध्याज्यादिभोग्यजातं संपादितमित्यर्थः । पुरुषेणेति शेषः । तथा स पुरुषः **वायव्यान्** वायुदेवताकान् तान्प्रसिद्धान् **पशून् चक्रे** उत्पादितवान् । **'अन्तरिक्षदेवत्याः खलु वै पशवः'** इति श्रुतेः । अन्तरिक्षस्य च वायुदेवत्यत्वात् पशूनां वायुदेवत्वम् । तान्कान् । **ये चारण्याः** अरण्ये भवाः हरिणादयः । ये च ग्रामभवा गवाश्वादयः तान् पशून् चक्रे ।। ६ ।।

तस्माद्यज्ञात्सर्वहुत ऋचस्सामानि जज्ञिरे ।
छन्दांꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥

सा.भा. - सर्वहुतः तस्मात् यज्ञात् ऋचः नियतबद्धाः **सामानि** गीतिप्रधानानि च **जज्ञिरे** प्रादुरभवन् । तथा तस्मात् **छन्दांसि** गायत्र्यादीनि **जज्ञिरे । तस्मात् यजुः** प्रश्लिष्टपठितम् **अजायत** ।। ७ ।।

उ.भा. - तस्मादेव यज्ञात्सर्वहुतः प्रज्वालितात् यथा **ऋचः सामानि यजूंषि** च देवा उत्पादयन्ति **छन्दांसि च** । एवम् आत्मयज्ञे प्रणवेन दीपिते स्वयमेव ज्ञानात् अधिष्ठितानि भवन्ति । एवं येन परमात्मनि ज्ञायते सर्वे जग्धा(?) सर्वं वाङ्मयं ज्ञानं भवतीति ।। ७ ।।

म.भा. - सर्वहुतः तस्माद्यज्ञात् **ऋचः सामानि च जज्ञिरे** उत्पन्नानि । **छन्दांसि** गायत्र्यादीनि **जज्ञिरे** तस्माद्यजुरपि अजायत । ऋग्यजुःसामभिश्छन्दोभिश्च विना यज्ञा न सिध्यन्ति ।। ७ ।।

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥

सा.भा. - तस्मात् यज्ञात् अश्वाः अजायन्त । ये के यज्ञे तत् उभयादतः उभयोः ऊर्ध्वाधोभागयोः दन्तयुक्ताः अश्वव्यतिरिक्ताः गर्दभाश्वतराश्च सन्ति तेऽपि अजायन्त । तस्मात् गावश्च जज्ञिरे । तस्मात् अजावयः **जाताः** उत्पन्नाः ।। ८ ।।

उ.भा. - तस्मात् यज्ञात् **अश्वाः अजायन्त** उत्पन्नाः । तथा **ये के च** अश्वातिरिक्ता गर्दभादयोऽश्वतराश्च **उभयादतः** उभयाः भागयाः दन्ता येषां ते उभयदतः । छान्दसं दीर्घत्वम् । ऊर्ध्वाधोभागयोः दन्तयुक्ताः सन्ति तेऽपि अजायन्त । तथा **ह** स्फुटं **तस्मात्**

यज्ञात् **गावः** च **जज्ञिरे** । किंच तस्मात् यज्ञात् **अजावयः** अजाः अवयश्च जाताः । नहि पशुभिर्विना यज्ञः सिध्येत् ।। ८ ।।

म.भा. - तस्मात् यज्ञात् **अश्वाः** अजायन्त उत्पन्नाः । तथा **ये के च** अश्वातिरिक्ता गर्दभादयोऽश्वतराश्च **उभयादतः** उभयाः भागयाः दन्ता येषां ते उभयदतः । छान्दसं दीर्घत्वम् । ऊर्ध्वाधोभागयाः दन्तयुक्ताः सन्ति तेऽपि अजायन्त । तथा **ह** स्फुटं **तस्मात्** यज्ञात् **गावः** च **जज्ञिरे** । किंच **तस्मात्** यज्ञात् **अजावयः** अजाः अवयश्च जाताः । न हि पशुभिर्विना यज्ञः सिध्येत् ।। ८ ।।

तँय्यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥

सा.भा. - यज्ञं यज्ञसाधनभूतम्, **अग्रतो** जातम्, सर्वसृष्टेः पूर्वम् उत्पन्नम् । एतच्च पूर्वमेव उक्तम् । **'ततो विराळजायत विराजो अधि पूरुषः'** इति । **तं** पुरुषं पुरुषपशुत्वभावनया यूपे बद्धं **बर्हिषि** मानसे **यज्ञं** यज्ञे **प्रौक्षन्, 'उक्ष सेचने'** (धा.पा.३५५) प्रोक्षितवन्तः । प्रोक्षणाख्यं संस्कारं कृतवन्तः । **तेन** प्रोक्षितेन पुरुषरूपेण पशुना **देवा अयजन्त** मानसयज्ञं निष्पादितवन्तः । के देवा इति त एव उच्यन्ते - **साध्याः** सृष्टिसाधनयोग्याः प्रजापतिप्राणरूपाः तदनुकूलाः **ऋषयः** मन्त्रद्रष्टारश्च **ये** सन्ति ते सर्वेऽपि **अयजन्त** ।। ९ ।।

उ.भा. - यथा इन्द्रेण तत्र यज्ञे अग्निष्टोमाख्ये बर्हिषा प्रोक्षितः पुरुषो जातः । तद्वत् आत्मयज्ञे बर्हिषा प्राणायामेन दीपितेन तस्मिन्पुरुषो जातः । ज्ञानमुत्पद्यते दिव्यम् । **अग्रतः** प्रथमतः । **तेन देवाः** इन्द्रादयः **साध्याश्च ऋषयश्च यथा अयजन्त** । तथा देवा योगिनः कपिलादयश्च साध्याश्चापरे ऋषयः । ऋषयश्चापि एतेनैव प्रणवाधिष्ठितेन पुरुषेण आत्मयज्ञं कृतवन्त इति ।। ९ ।।

म.भा. - यज्ञसाधने यज्ञशब्दः । **यज्ञं** यज्ञसाधनभूतं **तं पुरुषं** पशुत्वम् आभाव्य यूपे बद्धं **बर्हिषि** मानसे यज्ञे **प्रौक्षन्** प्रोक्षितवन्तः प्रोक्षणादिभिः संस्कारैः संस्कृतवन्तः । कीदृशम् । **अग्रतः** सृष्टेः पूर्वं जातं पुरुषत्वेन उत्पन्नम् । एतच्च प्रागेवोक्तम् **'तस्माद्विराडजायत विराजो अधि पूरुषः'** इति । **तेन** पुरुषरूपेण पशुना **देवा** अयजन्त मानसयागं निष्पादितवन्तः । के ते देवाः इत्यत्राह । **ये साध्याः** सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः । **ये च** तदनुकूला **ऋषयः मन्त्रद्रष्टारः** ते सर्वेऽपि अयजन्त ।। ९ ।।

**यत्पुरु॑षँव्व्यद॑धुः कति॒धा व्य॑कल्पयन् ।
मुख॒ङ्किम॑स्यासी॒त्किम्बा॒हू किमू॒रू पादा॑ उच्येते ॥ १० ॥**

सा.भा. - प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुम् अत्र ब्रह्मवादिनां प्रश्ना उच्यन्ते - प्रजापतेः प्राणरूपा देवाः **यत्** यदा **पुरुषं** विराड्रूपं **व्यदधुः** संकल्पेन उत्पादितवन्तः तदानीं **कतिधा** कतिभिः प्रकारैः **व्यकल्पयन्** विविधं कल्पितवन्तः । एषः सामान्यरूपः प्रश्नः । मुखं **किम्** इत्यादयः विशेषप्रश्नाः । अस्य एतादृग्रूपस्य पुरुषस्य **किं मुखम्** **आसीत् । किं** कौ **बाहू** स्तः । **किं** कौ **ऊरु** स्तः । कौ **पादौ** उच्येते ।। १० ।।

उ.भा. - यत्पुरुषम् देवा इन्द्रादयः तस्मिन् यज्ञे **व्यदधुः** कृतवन्तो यथा । तद्वत् योगिनः आत्मयज्ञे पुरुषं ज्ञानम् यत् ज्ञानान्तं तत्कृतवन्तः कतिप्रकारं विकल्पितवन्तः । तस्य एवंविधस्य **किं मुखम् कौ बाहू कौ ऊरु पादौ उच्येते** उच्यन्ताम् इत्यर्थः । ब्राह्मणक्षत्रियवैश्यशूद्राः स्थिता इत्यर्थः ।। १० ।।

म.भा. - प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते । प्रजापतेः प्राणरूपा देवा **यत्** यदा **पुरुषं व्यदधुः** कालेनोदपादयन् तदा **कतिधा** कतिभिः प्रकारैः **व्यकल्पयन्** विविधं कल्पितवन्तः । **अस्य** पुरुषस्य मुखं किमासीत् किं बाहू ऊरू चास्ताम् । किंच पादौ उच्येते पादावपि किमास्तामित्यर्थः ।। १० ।।

**ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीद् बा॒हू रा॑ज॒न्यः॑ कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ प॒द्भ्याᳪशू॒द्रो अ॑जायत ॥ ११ ॥**

सा.भा. - यः अयं ब्राह्मणजातिविशिष्टः पुरुषः सोऽयम् **अस्य** प्रजापतेः **मुखम्** **आसीत्,** मुखात् उत्पन्न इत्यर्थः । यः अयं **राजन्यः** क्षत्रियजातिः **सः बाहू कृतः,** बाहुभ्याम् उत्पादित इत्यर्थः । तत् तदानीं यत् यौ अस्य प्रजापतेः **ऊरू तद् वैश्यः** तद्रूपः सम्पन्नः । ऊरुभ्याम् उत्पन्न इत्यर्थः । तथा **पद्भ्यां** प्रजापतेः पादाभ्यां **शूद्रः अजायत** उत्पन्नः । इयं च मुखादिभ्यः ब्राह्मणादीनाम् उत्पत्तिः तैत्तिरीये सप्तमकाण्डे समाम्नाता - **'प्रजापतिरकामयत प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवानन्वसृज्यत गायत्रं छन्दो रथन्तरं साम ब्राह्मणो मनुष्याणाम्'** (तै.सं.१७-१-१-४) इत्यादि । अत्रत्ये प्रश्नोत्तरे उभे अपि तत् परत्वेन योज्ये ।। ११ ।।

उ.भा. - अस्य यज्ञोत्पन्नस्य पुरुषस्य ये केचिद्ब्राह्मणाः **ते मुखम् आसीत्** । ये क्षत्रियाः **ते बाहूकृताः** । ये **वैश्याः** ते अस्य **ऊरू कृताः** । ये शूद्रा ते **पद्भ्याम् अजायन्त**

इति कल्प्यन्ते तदस्य उत्पन्नत्वादिति । एवम् एतेऽवयवाः शिरःप्रभृतयः पुरुषस्य विद्यन्ते नान्ये इति ।। ११ ।।

म.भा. - पूर्वोक्तप्रश्नोत्तराण्याह । **ब्राह्मणः** ब्रह्मत्वजातिविशिष्टः पुरुषोः **अस्य** प्रजापतेः **मुःखमासीत्** । मुखादुत्पन्न इत्यर्थः । **राजन्यः** क्षत्रियत्वजातिविशिष्टो **बाहू कृतः** बाहुत्वेन निष्पादितः । तत् तदानीम् अस्य प्रजापतेः यत् यौ **ऊरू** तद्रूपो **वैश्यः** संपन्नः । ऊरूभ्याम् उत्पादित इत्यर्थः । तथास्य **पद्भ्यां** शूद्रत्वजातिमान् पुरुषोऽजायत उत्पन्नः ।। ११ ।।

चन्द्रमा मनसो जातश्चक्षोस्सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

सा.भा. - यथा दध्याज्यादिद्रव्याणि गवादिपशवः ऋगादिवेदाः ब्राह्मणादिमनुष्याश्च तस्मात् उत्पन्नाः तथा प्रजापतेः **मनसः चन्द्रमा जातः,** तस्य **चक्षोः** चक्षुषः **सूर्यः अजायत** । तस्य **श्रोत्राद् वायुः** वायुरूपः प्राणः, शरीरे प्राणापानव्यानात्मना सञ्चरन् वायुश्च जातः । **चकारौ** परस्परसमुच्चयार्थौ । तस्य **मुखात् अग्निः अजायत** ।। १२ ।।

उ.भा. - तस्य एवंविधस्य यज्ञोत्पन्नस्य पुरुषस्य । **चन्द्रमाः मनसः** चेतसः जातः अजायत इति कल्पना । मन एव चन्द्रमाः । **चक्षोः** नेत्राभ्यां सूर्यः । नेत्रे एव **सूर्यः** । यः प्राणो जीवः स एव **वायुः श्रोत्रात् अजायत** इति कल्प्यते । श्रोत्रमेव वायुः । योऽय**मग्निः स मुखात् अजायत** इति कल्प्यते मुखमेवाग्निः अंशोत्पन्नत्वादिति ।। १२ ।।

म.भा. - यथा दध्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदाः ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्नाः एवं चन्द्रादयो देवा अपि तस्मादेव उत्पन्ना इत्याह । **मनसः** सकाशाच्चन्द्रमाः जातः । **चक्षोः** चक्षुषः सकाशात्सूर्यः **अजायत** । वायुः प्राणश्च श्रोत्रात्कर्णात् अजायत । मुखादग्निः अजायत ।। १२ ।।

नाभ्या आसीदन्तरिक्षꣳशीर्ष्णो द्यौस्समवर्त्तत ।
पद्भ्याम्भूमिर्दिशश्श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १३ ॥

सा.भा. - पूर्वं देवतासृष्टिम् उक्त्वा लोकसृष्टिम् आह । तस्य प्रजापतेः **नाभ्याः** सकाशात् अन्तरिक्षम् उत्पन्नम् आसीत् । **शीर्ष्णः** शिरसः सकाशात् **द्यौः** द्युलोकः **समवर्त्तत** उत्पन्नः अभूत् । **पद्भ्यां** पादाभ्यां भूमिः, तस्य श्रोत्रात् दिशः, तथा तेन उक्तप्रकारेण **लोकान्** अन्तरिक्षादीन् प्रजापतेः नाभ्याद्यवयवान् **अकल्पयन्** उत्पादितवन्तः ।। १३ ।।

उ.भा. - तस्यैवंविधस्य पुरुषस्य या नाभिः तदेव आन्तरिक्षं नभः । या द्यौः तत् शीर्षं शिरः । समवर्तत इति कल्पितम् । पादौ भूमिरेव । श्रोत्रे श्रवणौ दिशः । श्रोत्रावयवाः यस्माद्दिशः ब्रह्मणो जाताः तथैव सर्वान् लोकान् पुरुषस्य अवयवभूतान् अकल्पयदिति ।। १३ ।।

म.भा. - यथा प्रजापतेः मनःप्रभृतयश्चन्द्रादीन् अकल्पयन् तथान्तरिक्षादिलोकान् इत्याह **नाभ्येति** । प्रजापतेः नाभेः सकाशात् अन्तरिक्षम् आसीत् । **शीर्ष्णः** शिरसः **द्यौः** स्वर्गः **समवर्तत** उत्पन्ना । अस्य **पद्भ्यां** पादाभ्यां भूमिरुत्पन्ना । श्रोत्राद्दिशः उत्पन्नाः । तथा तेन उक्तेन विधिना लोका भूरादीन् प्रजापतेः सकाशात् **अकल्पयन्** कल्पितवन्तः । फलादानोत्सुकाः काला इति शेषः ।। १३ ।।

यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत ।
व॒स॒न्तो॑ऽस्यासी॒दाज्यं॑ग्री॒ष्म इ॒ध्मश्श॒रद्ध॒विः ॥ १४ ॥

सा.भा. - पूर्वं देवाः **पुरुषेण** पुरुषरूपेण **हविषा** बाह्यद्रव्यस्य अद्यापि अनुत्पन्नत्वेन हविः अन्तरा असम्भवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्पितेन पुरुषाख्येन हविषा **देवा** मानसं यज्ञम् **अतन्वत** अकुर्वत । तत् तदानीम् **अस्य** यज्ञस्य **वसन्तर्तुः** आज्यम् आसीत् । तमेव आज्यत्वेन संकल्पितवन्तः । एवं **ग्रीष्मः इध्मत्वेन** परिकल्पितः । **शरत्** पुरोडाशादि हविष्ट्वेन संकल्पिता । पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पितम् । वसन्तादीनां तु आज्यादिविशेषरूपत्वेन इति द्रष्टव्यम् ।। १४ ।।

उ.भा. - कथम् अन्नेनाधिरोहति । **यत्** यस्मात्कारणात् पुरुषेण **हविषा** हविर्भूतेन **देवा** इन्द्रादयः यथा **यज्ञम् अतन्वत** विस्तारितवन्तः । तथा योगिनोऽपि पुरुषेणैव अमृतभूतेन दीपितेन आत्मना आत्मयज्ञं समधिकृतवन्तः । अत्र यज्ञे **वसन्तः आज्यमासीत् ग्रीष्मः इध्मः शरद्धविरिति** । इतरयागे वसन्तशब्देन सात्विको गुण उच्यते । ग्रीष्मशब्देन राजसः । शरच्छब्देन तामसः । त्रयो हि गुणास्तत्र आत्मयज्ञे योगिनो जुह्वतीति ।। १४ ।।

म.भा. - **यत्** यदा पूर्वोक्तक्रमेण देवशरीरेषु सत्सु **देवाः** उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्य अनुत्पन्नत्वेन पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य **पुरुषेण** पुरुषाख्येन **हविषा** मानसं यज्ञमतन्वत अतनिषत तदानीमस्य यज्ञस्य **वसन्तः** ऋतुरेव **आज्यमासीत्** । आज्यत्वेन संकल्पितवन्त इत्यर्थः । एवं **ग्रीष्मः इध्मः** आसीत् । ग्रीष्ममेव इध्मत्वेन संकल्पितवन्तः । तथा **शरत् हविः** आसीत् । शरदमेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्तः

पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः अनन्तरं वसन्तादीनाम् आज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम् । अत्र कण्डिकाव्युत्क्रमोऽस्ति अस्यानन्तरं तं यज्ञम् (९) ततः तस्माद्यज्ञात् इति (६) तिस्रः क्रमेणैव । ततः सप्तास्यासन्निति (१५) क्रमोऽपेक्षितः ।। १४ ।।

स॒प्तास्या॑सन्परि॒धय॒स्त्रिस्स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद्य॒ज्ञन्त॑न्वा॒ना अब॑ध्न॒न्पुरु॑षम्प॒शुम् ॥ १५ ॥

सा.भा. - अस्य परिकल्पितयज्ञस्य गायत्र्यादीनि छन्दांसि **परिधयः आसन्** । ऐष्टिकस्य आहवनीयस्य त्रयः **परिधयः** औत्तरवेदिकाः त्रयः आदित्यश्च सप्तमः **परिधिः** प्रतिनिधिरूपः । अत एव आम्नायते - **'न पुरस्तात् परिदधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहन्तीति'** (तै.सं.२-६-६-३) । तत एत आदित्यसहिताः **सप्त परिधयः** अत्र सप्त छन्दोरूपाः तथा **समिधः त्रिः सप्त,** त्रिगुणीकृतसप्तसंख्याकाः एकविंशतिः **कृताः** । **'द्वादशमासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः'** (तै.सं.५-१-१०-३) इति श्रुताः पदार्थाः एकविंशतिदारुयुक्त इध्मत्वेन भाविताः, **यत् यः** पुरुषः वैराजोऽस्ति तं पुरुषं देवाः प्रजापतिप्राणेन्द्रियरूपाः **यज्ञं तन्वानाः** मानसं यज्ञं कुर्वाणाः **पशुम् अबध्नन्** विराट्पुरुषत्वेन भावितवन्तः । एतदेव अभिप्रेत्य पूर्वत्र पुरुषेण हविषा इति उक्तम् ।। १५ ।।

उ.भा. - देवाः इन्द्रादयः यथा यज्ञं पुरुषमेधाख्यं विस्तारयन्तः **पुरुषं पशुम् अबध्नन्** हतवन्तः अस्य पुरुषमेधयज्ञस्य सप्त समुद्राः परिधयः **आसन्** । भारते हि वर्षे यागः प्रवर्तते । **त्रिःसप्त** छन्दांसि गायत्र्यादीनि समिधः कृताः आत्मयागे परिधिशब्देन पृथिव्यापस्तेजोवायुराकाशं मनोबुद्धिः इत्येते परिधयः कल्प्यन्ते । **त्रिःसप्त समिधः** । पञ्चमहाभूतानि पृथिव्यादीनि । पञ्चतन्मात्राणि रूपादीनि । पञ्च बुद्धि इन्द्रियाणि श्रोत्रादीनि । पञ्च कर्मेन्द्रियाणि पाण्यादीनि मनश्च एताः त्रिःसप्त समिधः कल्पयन्ति । तथा देवा दीप्यमाना ज्ञानेन योगिनः समाध्याख्यं यज्ञं **तन्वाना** विस्तारयन्तः । **पुरुषं** ज्ञानं पुरुषमेधपशुरूपेण अवस्थितम् **अबध्नन्** अगृह्णन् ।। १५ ।।

म.भा. - यत् यदा देवाः प्रजापतिप्राणेन्द्रियरूपाः **यज्ञं तन्वानाः** मानसं यज्ञं कुर्वाणाः पुरुषं पशुमबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वं (१४) पुरुषेण हविषा इत्युक्तम् । तदा संकल्पितस्य यज्ञस्य **सप्त** गायत्र्यादीनि छन्दांसि

परिधयः आसन् ऐष्टिकस्य आहवनीयस्य त्रयः परिधय औत्तरवेदिकाः त्रयः आदित्यः सप्तमः **परिधिः** प्रतिनिधिरूपः तथा च श्रुतिः **'गुप्त्यै वा अभितः परिधयो भवन्त्यथैतत्सूर्यमेव पुरस्ताद्गोप्तारं करोति'** इति । तत एते आदित्यसहिताः सप्त परिधयोऽत्र सप्तच्छन्दोरूपाः । **त्रिःसप्त** त्रिगुणाः **सप्त** एकविंशतिसंख्याकाः **समिधः कृताः** **'द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्यः'** (तै.सं.५-१-१०-३) एते एकविंशतिः एकविंशतिदारुयक्त इध्मत्वेन भाविताः । यद्वा **सप्त** समुद्राः क्षीरोदादयोऽस्य यज्ञस्य **परिधयः आसन्** । भारतखण्डे यागा भवन्तीति समुद्राणां परिधित्वम् । **त्रिः** त्रिगुणाः **सप्त** छन्दोवर्गाः **समिधः कृताः** गायत्र्यादीनि सप्त अतिजगत्यादीनि सप्त कृत्यादीनि सप्तेति ।। १५ ।।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानस्सचन्त यत्र पूर्वे साध्यास्सन्ति देवाः ॥ १६ ॥

सा.भा. - अथ कृत्स्नानुवाकतात्पर्यं संक्षिप्य उपन्यस्य **देवाः** प्रजापतिप्राणभूताः **यज्ञेन** यथोक्तेन मानसेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिम् **अयजन्त** पूजितवन्तः । तस्मात् पूजनात् **तानि** प्रसिद्धानि **धर्माणि** जगद्रूपविकारिणां धारकाणि **प्रथमानि** मुख्यानि भूतानि **आसन्** । एतावता सृष्टिप्रतिपादकः अयम् अनुवाकार्थः संगृहीतः ।

अथ देवानां यागसाधारणफलं दर्श्यते - **यत्र** यस्मिन् विराट् प्राप्तिरूपे यज्ञे **पूर्वे साध्याः** पुरातनाः विराडुत्पत्तिसाधका **देवाः सन्ति** तिष्ठन्ति तत् **नाकं** विराट्प्राप्तिरूपं स्वर्गं **ते महिमानः** यष्टारः महात्मानः **सचन्त** समवयन्ति प्राप्नुवन्ति इत्यर्थः । तत्र ब्राह्मणम्- **'यज्ञेन हि तं यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्'** (श.ब्रा.१०-२-२-२) इति **'ते हि धर्माः प्रथमेऽक्रियन्त ते ह नाकं महिमानः सचन्तेति स्वर्गो वै लोको नाको देवा महिमानस्ते देवाः स्वर्गं लोकँ सचन्त ये तं यज्ञमयजन्नित्येतद् यत्र पूर्वे साध्याः सन्ति देवा इति प्राणा वै साध्या देवास्त एतमग्र एवमसाधयन्'** (श.ब्रा.१०-२-२-३) इति । पूर्वशब्दः ऋषिप्रवाहः नित्यः इति एतावद् दर्शनार्थः ।। १६ ।।

।। शुक्लयजुर्वेदीयपुरुषसूक्तस्य सायणभाष्यं समाप्तम् ।।

उ.भा. - यथा इन्द्रादयो देवाः **यज्ञेन** ज्योतिष्टोमाख्येन यज्ञपुरुषं वासुदेवम् विधिना **अयजन्त** । यतः **तानि** यजनरूपाणि **धर्माणि प्रथमानि आसन् ते ह** महाभाग्ययुक्ताः **नाकं सचन्त** स्वर्गं सेवन्ते । **यत्र पूर्वे साध्याः** प्रथमे सुराः **सन्ति** विद्यन्ते **देवाः** तेजसा

देदीप्यमानाः । एवं योगिनोऽपि दीपनाद्देवा यज्ञेन समाधिना नारायणाख्यं ज्ञानरूपम् **अयजन्त** । यतः तानि समाधिरूपाणि **धर्माणि प्रथमान्यासन्** । **ते** तु **नाकं** सनकादीनां स्थानं गच्छन्ति । ये तु योगिनो महिमानः जन्मान्तरः निर्धूतगुणाः शुद्धाः ते नारायणाख्यं पुरुषम् आविशन्ति । मुक्तिं गच्छन्ति इत्यर्थः ।। १६ ।।

।। शुक्लयजुर्वेदीयपुरुषसूक्तस्य उवटभाष्यं समाप्तम् ।।

म.भा. - पूर्वप्रपञ्चेन उक्तमर्थं संक्षिप्याह । **देवाः** प्रजापतिप्राणरूपा **यज्ञेन** यथोक्तेन मानसेन संकल्पेन यज्ञेन **यज्ञं** यज्ञस्वरूपं प्रजापतिम् **अयजन्त** पूजितवन्तः । तस्मात्पूजनात् **तानि** प्रसिद्धानि **धर्माणि** जगद्रूपविकाराणां धारकाणि **प्रथमानि** मुख्यानि भूतानि **आसन्** । एतावता सृष्टिप्रतिपादकसूक्तभागार्थ उक्तः । अथ उपासनतत्फलानुवादकभागार्थः संगृह्यते । **यत्र** यस्मिन् विराट् प्राप्तिरूपे नाके **पूर्वे साध्याः** पुरातनाः विराडुपाधिसाधकाः **देवाः सन्ति** तिष्ठन्ति तं **नाकं** विराट्प्राप्तिरूपं स्वर्गं **ह** एव **ते महिमानः** तदुपासका महात्मानः **सचन्त** सचन्ते समवयन्ति प्राप्नुवन्ति । अडभाव आर्षः । सृष्टेः प्रवाहनित्यतां दर्शयति । तदुक्तम् **'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्'** (महा.ना.उ.१-९) इति ।। १६ ।।

।। शुक्लयजुर्वेदीयपुरुषसूक्तस्य महीधरभाष्यं समाप्तम् ।।

कृष्णयजुर्वेदीयं पुरुषसूक्तम्

[सायण-भट्टभास्कर-रङ्गरामानुजस्वामिभाष्यसहितम्]

स॒हस्र॑शीर्‌षा॒ पुरु॑षः । स॒ह॒स्रा॒क्षस्स॒हस्र॑पात् ।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा । अत्य॑तिष्ठद्दशांगु॒लम् ॥ १ ॥

सा.भा. - अथ नारायणनाम्ना पुरुषसूक्तनाम्ना च व्यवह्रियमाणोऽनुवाक उच्यते । तस्य विनियोगं महाग्नौ आपस्तम्ब आह । पुरस्तात् प्रतीचीं पुरुषाकृतिं चिनोति पुरुषशिरो भवति, **सहस्रशीर्षा पुरुष** इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठेत इति । ब्रह्ममेधेऽपि प्रेतदाहोपस्थाने विनियोगं भरद्वाज आह - नारायणाभ्याम् उपस्थानमिति । अयं च उत्तरश्चेति उभावनुवाकौ नारायणमन्त्रज्ञौ नारायणाख्येन केनचित् ऋषिणा दृष्टत्वात्, जगत्कारणस्य नारायणाख्यस्य पुरुषस्य प्रतिपादकत्वात् । तत्रास्मिन् द्वादशे अनुवाके प्रथमाम् ऋचामाह - **'सहस्रशीर्षा - अत्यतिष्ठद्दशाङ्गुलम्'** इति । सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः 'पुरुषः', सोऽयं 'सहस्रशीर्षा' सहस्रशब्दस्योपलक्षणत्वात् अनन्तैः शिरोभिर्युक्त इत्यर्थः, यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयान्येवेति सहस्रशीर्षत्वम् । एवमक्षिषु पादेष्वपि योजनीयम् । 'सः' पुरुषः, 'भूमिं' ब्रह्माण्डगोलकरूपां 'विश्वतो वृत्वा' सर्वतः परिवेष्ट्य, दशाङ्गुलपरिमितं देशं 'अत्यतिष्ठत्' अतिक्रम्य स्थितः । दशाङ्गुलमित्युपलक्षणं, ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ।। १ ।।

भ.भा. - अथ पुरुषानुवाकः - **सहस्रशीर्षेत्यादि** ।। आनुष्टुभस्सर्वोऽनुवाकः, विशेषो वक्ष्यते । अग्नौ पुरुषाकृतौ चीयमानायां पुरुषशिरः उपहितस्य शिरः कृत्वा पुरुषाकृतिमुपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते । पुरुषमेधे च **'पशूनुपाकृतान् दक्षिणतोऽवस्थाप्य ब्रह्मा सहस्रशीर्षा पुरुष इति पुरुषेण नारायणेन पराचा अनुशंसति । अथ नारायणाभ्यामुपस्थानं'** इत्यादिषु विनियोगः । अयम् उत्तरश्चानुवाकौ नारायणाख्यौ, नारायणाख्येन ऋषिणा दृष्टौ । आभ्यां च पुरुषाख्यो नारायणः प्रतिपाद्यते । उक्तं च - आत्मनि पुरुषावस्थे प्रपञ्चप्रविष्टः पुरुषः, उत्तीर्णः परमात्मेति । पुरुषसूक्तमिति चेन्

बह्वृचा आहुः । अथ **'सहस्रशीर्षं देवम्'** इत्यपरो नारायणानुवाको भविष्यति, यत्र परमात्मा प्रणवाख्यो नारायणः प्रतिपाद्यते । तस्य अग्न्यादिश्रौतपुरुषवत् कर्मसम्बन्धाभावात् इहानाम्नानम् । अत्र पुरुषाख्यापेक्षितावरणस्थानीयं देहविशेषं महापुरुषस्य निरूपयति - **सहस्रशीर्षा** अनेकशिरस्कः । **'शीर्षंश्छन्दसि'** (पा.सू.६-१-६०) इति शीर्षन्भावः । पुरि शेते इति **पुरुषः** । पृषोदरादिः । **सहस्राक्षः** अनेकदृष्टिः । **'बहुव्रीहौ सक्थ्यक्ष्णोः'** (पा.सू.५-४-११३) इति षच् समासान्तः । सतिशिष्टस्समासान्तस्वरः प्रवर्तते । **सहस्रपात्** अनेकचरणः । **'सङ्ख्यासुपूर्वस्य'** (पा.सू.५-४-१४०) इति पादशब्दस्य पद्भावः । सर्वत्र शिरःप्रभृतिकार्यसद्भावात् शिरः प्रभृतीनामनेकत्वम् । यद्वा - 'पुरुष एवेदं सर्वम्' इति तस्य विश्वात्मत्वात् अस्मदादिसम्बन्धिनः शिरःप्रभृतयोऽवयवाः तस्यैवावयवा इति तेषामनेकत्वोपपत्तिः । **सः** पुरुषः **भूमिं** भूम्यादीन् विकारान् **विश्वतः** सर्वतः **वृत्वा** व्याप्य मृदिव घटादीन् स्वाभेदेन छादयित्वा **अत्यतिष्ठत्** अतीत्य तिष्ठति अतिक्रम्य विकारावस्थां स्वेनैव रूपेण तिष्ठति **दशाङ्गुलं** दशाङ्गुलिप्रमाणावच्छिन्नम् । दश अङ्गुलयः प्रमाणं अस्येति अर्हीयस्य **'अध्यर्धपूर्व'** (पा.सू.५-१-२८) इति लुक्, **'तत्पुरुषस्याङ्गुलेः'** (पा.सू.५-४-८६) इत्यच् समासान्तः । अत्र सामर्थ्यात् हृदयाकाशपरिग्रहः । हृदयाकाशस्यैव दशाङ्गुलम् इत्याख्येति केचित् । हृदयं दहरं गगनं पुरुष इति पर्यायः । यद्वा - सर्गप्रकरणमिदं, अतो विकारजातं भूम्यादिकं सर्वं वृत्वा पदेनैव घनमावृत्य दशाङ्गुलम् अतितिष्ठति दशाङ्गुलादधोऽधिष्टानं न करोति, अत एव भूमेर्दशाङ्गुलात् अधोऽङ्कुरादेः अनुत्पत्तिः । सर्वगतत्वेऽपि पुरुषस्य सिसृक्षा उपधानमूलकारणात्मकत्वात् सर्वकार्य-देशव्याप्त्यैव स्वप्रयोजनसम्पादनात् तदेव तस्य सर्वगतत्वमिति दशाङ्गुलात्परतो न व्याप्नोति प्रयोजनाभावादिति केचित् ।। १ ।।

[अवतारिका]

रं.भा. - अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ।।
यतः प्रपञ्चसंभूतिविभूतिपरिभूतयः ।
पुरुषाय नमस्तस्मै परस्मै विस्मयात्मने ।।
तं प्रणम्यादिपुरुषं जगतामादिकारणम् ।
दुर्ज्ञानं पौरुषं सूक्तं व्याकरोमि यथामति ।।

श्रीपाद्मे पुराणे -

'इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ।
अतः श्रुतिभ्यः सर्वाभ्यो बलवत् समुदीरितम् ।।
इदं पुरुषसूक्तं हि यजुष्यष्टादशर्च्चकम् ।
ऋग्वेदे षोडशर्च्चं स्यात् पञ्च वाजसनेयके ।।
सामवेदे तु सप्तर्च्चं तथैवाथर्वणेऽपि च ।
वेदेषु याजुषं वेदमवलम्ब्य वदाम्यहम् ।
मदर्वाचीनतां प्रेक्ष्य नोपेक्षन्तां मनीषिणः ।।
श्रुतिषु प्रबला मन्त्रास्तेष्वप्यध्यात्मवादिनः ।
तत्रापि पौरुषं सूक्तं न तस्मात् विद्यते परम्' ।।

भगवान् शौनकः -

अस्य पुरुषसूक्तस्य ऋषिर्नारायणः स्मृतः ।
छन्द आनुष्टुभं सूक्तं तिस्रोऽन्त्यास्त्रिष्टुभो मताः ।।
परमव्योमवासी च पुरुषो देवताऽभवत् ।
प्रथमां विन्यसेत् वामे द्वितीयां दक्षिणे करे ।।
तृतीयां वामपदे च चतुर्थीं दक्षिणे तथा ।
पञ्चमीं वामजानौ तु षष्ठीं दक्षिणके तथा ।।
सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा ।
नवमीं नाभिदेशे तु दशमीं हृदये तथा ।।
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके ।
त्रयोदशीं दक्षिणे तु आस्यदेशे चतुर्दशीम् ।।
अक्ष्णोः पञ्चदशीं न्यस्य षोडशीं मूर्ध्नि विन्यसेत् ।
एवं न्यासविधिं कृत्वा पञ्चाङ्गानि समालभेत् ।। (ऋ.वि.५१६-५२०)
प्रायश्चित्ते जपे चैव विष्णोराराधने तथा ।
मोक्षे वश्येऽग्न्युपस्थाने सुपुत्रप्रापणेऽपि च ।।
सर्वकामफलावाप्तौ आरोग्ये मृत्युनाशने ।
एतेष्वर्थेष्विदं सूक्तं मुनयो विनियुञ्जते ।।

प्रायश्चित्ते तावत् वाधूलः - 'यत्रयत्र कर्मभ्रेषो यजुर्भ्रेषो वा, तत्रतत्र पुरुषं ध्यायेत् । पुरुषसूक्तमुच्चरेत् । पूर्णत्वात् पुरुष इति विज्ञायते ।

यमस्मृतौ -

'ब्रह्मयज्ञे जपेत् सूक्तं पौरुषं चिन्तयन् हरिम् ।
स सर्वान् जपते वेदान् साङ्गोपाङ्गान् द्विजोत्तम ।।
सकृज्जप्त्वास्यवामीयं शिवसङ्कल्पमेव च ।
जप्त्वा तु पौरुषं सूक्तं मुच्यते गुरुतल्पगः' ।।

विष्णुस्मृतौ - स्नातः पवित्रपाणिः यथाशक्ति जपेत् विशेषतः सावित्रीं पुरुषसूक्तं च । नैताभ्यां सदृशमस्ति इति ।

ऋग्विधाने शौनको वदति -

'पुरुषस्य हरेः सूक्तं सर्वपापप्रणाशनम् ।
वक्ष्ये पुरुषसूक्तस्य विधानं चार्चनं प्रति ।।
आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम् ।
द्वितीययाऽऽसनं दद्यात् पाद्यं चापि तृतीयया ।।
चतुर्थ्याऽर्घ्यं प्रदातव्यं पञ्चम्याऽऽचमनीयकम् ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ।।
यज्ञोपवीतमष्टम्या नवम्या गन्धमेव च ।
दशम्या पुष्पदानं स्यादेकादश्या तु धूपकम् ।।
द्वादश्या दीपदानं स्यात् त्रयोदश्या हविस्तथा ।
चतुर्दश्याऽञ्जलिं कुर्यात् पञ्चदश्या प्रदक्षिणम् ।।
षोडश्योद्वासनं कुर्यादेवमाराधयेद्धरिम् ।
स्नाने वस्त्रे निवेद्ये च दद्यादाचमनीयकम् ।।
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम्' ।। (ऋ.वि.५२१-५२६)

मोक्षे योगवासिष्ठे -

'संसारान्मोक्षमिच्छन् यः सन्त्यजेदेषणात्रयम् ।
निस्पृहः सर्वकामेभ्यः समलोष्टाश्मकाञ्चनः ।।
गुरोः पादौ तु संगृह्य स्वाचम्य प्रयतो भवेत् ।
नमश्च पावनं कृत्वा सन्त्यजेदेषणात्रयम् ।।
ततो गच्छन् हरेर्वेश्म पावनं सुमनोहरम् ।
ततो मनोगतान् कामान् सर्वान् त्यक्त्वा प्रसन्नधीः ।।

अनिकेतः स्थिरमतिरादिदेवे जनार्दने ।

येन केन चिदाच्छन्नो येन केनचिदाशितः ।। (६-१२२-१)

मेघच्छन्न इवादित्यो भस्मच्छन्न इवानलः ।

आत्मानं गूहमानस्तु सर्वभूतदयान्वितः ।।

निर्ममो निरहङ्कारः समदुःखसुखः क्षमी । (६-५३-१२)

एकान्ती यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।।

ध्यायेन्नारायणं देवं हृदयाम्भोजमध्यगम् ।

दिग्देशकालावस्थाद्यैरनवच्छेद्यवैभवम् ।

सर्वदा पौरुषं सूक्तं मनसैव जपेच्छुचिः' ।। इति । किञ्च -

योगवासिष्ठे -

'यः पौरुषस्य सूक्तस्य जानात्यर्थं यथा तथा ।

स जन्मनीह मुक्तस्स्यात् पुराणेषु च दर्शनात् ।

विष्णुः पुरुषसूक्तार्थः पुरुषोऽध्यवसीयते' ।।

उत्तरभागाध्याये -

'सर्वं वशं मम भवेदिति सञ्चिन्तयन् मुनिः ।

जपेत्तु पौरुषं सूक्तं प्रणिपत्य जनार्दनम् ।।

यद्वशे वर्तते कृत्स्नं चराचरमिदं जगत् ।

वशे भवति तस्येदं जगत् सर्वं मुनेरपि' ।। इति ।

आपस्तम्बः - 'सहस्रशीर्षा पुरुष इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते ।'

उपहिताम् - इष्टकाभिः कृतोपधानामित्यर्थः ।

वाधूलसूत्रे - नारायणदृष्टेन पुरुषदैवतेनोपहितां चितिमुपतिष्ठमान इह जन्मनि पुरुषो भवेदिति -

आयुष्मत्पुत्रावाप्तौ **ऋग्विधाने -**

'पुत्रेच्छुर्ब्राह्मणः शुद्धः सुप्रसन्नमना भवेत् ।

पौरुषेण च सूक्तेन जुहुयादाज्यमन्वहम् ।।

पायसान्नं चरुं कृत्वा तेनैव जुहुयाच्छुचिः ।

हुतशिष्टं चरुं शुद्धमश्नीयाताञ्च दम्पती ।।

एवं त्रिंशद्दिनादूर्ध्वं गर्भो भवति सुस्मितः ।

सर्वलक्षणसंपन्नः पुत्रो भवति पावनः' ।। इति ।

श्रीशास्त्रे - सर्वकामावाप्त्यादिषु पुरुषसूक्तसमाराधनेन अचिरात् सर्वान् कामान् अवाप्नोतीति ।।

[पुरुषसूक्तावतारणम्]

'एवं छन्दांस्यृषीन् देवं विनियोगं तथा फलम् ।
उक्त्वा तु पौरुषं सूक्तमवतारयितुं यते' ।।

श्रीशास्त्रे - पुरुषसूक्तसंहितायां भगवान् सनत्कुमारो नारदमुनये भगवद्ज्ञानमुपदिशन् पुरुषसूक्तम् अवतारयामास । तत्र नारदः परिपप्रच्छ, सर्वव्यापिनः पुरुषस्य किमर्थं शरीरपरिग्रह इति । तत्राह - सनत्कुमारः -

'पुरा नारायणो देवः कृपया परयाऽन्वितः ।
देवतिर्यङ्मनुष्यादीन् वीक्ष्य संसारमध्यगान् ।।
एवं सञ्चिन्तयामास संस्मरन् वैभवं स्वकम् ।
स्वतःप्रमाणवाक्यानि दुर्विज्ञानं वदन्ति माम् ।।
'अणोरणीयान् महतो महीयान्', 'निर्गुणो गुणी ।
दिग्देशकालावस्थाद्यैरनवच्छेद्यवैभवः ।।
वृद्धिक्षयविहीनश्च सत्यकामो निरञ्जनः ।
विनेन्द्रियेण सर्वज्ञो विना पादेन सर्वगः ।।
अनासोऽनुभवन् गन्धान् स्पृशन् सर्वमपाणिकः ।
शृण्वन् श्रुतिं विना शब्दमजिह्वो लेलिहन् रसम् ।।
साधनेन विना साध्यं सर्वं संसाधयेन्वहम् ।
तस्मात् सर्वप्रमाणैस्तु सुदुर्ज्ञानतरोन्वहम् ।।
मम रूपमविज्ञाय लोके मोक्षो न सिध्यति ।
तस्मात् संसारचक्रेऽस्मिन् भ्राम्यन्त्येते सुदुस्तरे ।।
उद्धरेयमिमान् सर्वान् यातायातशताकुलान् ।
इति संचिन्त्य मनसा स्वच्छन्दोपात्तविग्रहम् ।।
हित्वौपनिषदं रूपं प्रमाणानामगोचरम् ।
सर्वेषां स्तुतिभिर्योज्यं दृष्टमात्रेण मोक्षदम् ।।
सर्वकल्याणसंपूर्णं गुणराशिसमाश्रयम् ।
सहस्रावयवोपेतमाददे रूपमद्भुतम् ।।' इति ।

ब्रह्माण्डपुराणे क्षीराब्धिवर्णने -

उक्तञ्च - **'न ते रूप'**मित्यादि ।

'सहस्रकन्धरं चारुं तुङ्गोरःस्थलमुन्नतम् ।

सहस्रबाहुसंयुक्तम् इन्दिरावरमन्दिरम् ।।' इति ।

'श्रीभूमी यस्य देव्यौ सकलमुनिवराः किंकराः रक्ष्यमण्डं

सृष्ट्याद्याः शिल्पलीलाः कमलजविबुधाः पुत्रपौत्रादयोऽपि ।

वैकुण्ठं नाम धाम स्तुतिकृदुपनिषच्छासनं शास्त्रवर्गः

सोऽयं वैकुण्ठनाथः श्रियमतिशयिनीं वैष्णवीं नो ददातु' ।।

सहस्रशीर्षा पुरुषः - सहस्रशब्दः अनन्तवचनः । सहस्राणि शिरांसि, सहस्राणि अक्षीणि, सहस्रं पादाः यस्य **सहस्रशीर्षा सहस्राक्षः सहस्रपादुक्तः । शीर्षन् छन्दसीति** (पा.सू.६-१-६०) शिरश्शब्दस्य शीर्षन्नादेशः । गीयते हि **अनन्तबाहूदर-वक्त्रनेत्रमिति ।** (भ.गी.११-१६)

पादशब्द उपलक्षणार्थः । **'सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति'** (भ.गी.१३-१३) । मन्त्रान्तरं च भवति, **'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उरुत विश्वतस्पात्'** (महा.ना.उ.२-३) इति । पादादयो भगवत एव सङ्कल्पविकल्पकल्पिताप्राकृततेजोमयदेहगता उच्यन्ते । यद्वा त्रैलोक्यशरीरत्वात् अस्य सुरनरतिर्यग्गताः पादादयः तदीया इत्युपचर्यन्ते । यद्वा पादादिकार्यगमनदर्शनवचनादिलक्षणार्थः । तेन सहस्रपात्त्वेन सर्वगतत्वं सहस्राक्षत्वेन सर्वदर्शित्वं सहस्रशीर्षत्वेन सर्वाधारत्वञ्च, सर्वलोकाभिषिक्तत्वञ्च सर्वमुखप्रदानत्वञ्च सर्वरक्षणप्रतिश्रवणत्वञ्च सर्वरक्षापेक्षाश्रवणत्वञ्च, केशादिपादान्तोक्तत्वात् सर्वावयवत्वेऽपि सहस्रत्वं चोक्तम् । अक्षोपलक्षणेन पञ्चेन्द्रियत्वोक्तं सिद्धम् । तथा च श्रुतिः - **'अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः'** (श्वे.उ.३-१९) इति । **'गामाविश्य च भूतानि धारयाम्यहमोजसा'** इत्यादि च । यद्वा सर्वाधिकत्वं सर्वज्ञत्वं सर्वशक्तित्वं च सिद्धम् ।

पुराणत्वात् पुरुषः । तथा च श्रूयते - **'अन्तरतः कूर्मं भूतँ सर्पन्तं तमब्रवीत् । मम वै त्वङ्माँसा समभूत् । नेत्यब्रवीत्** - (पुनश्च भगवान् कूर्मरूपः प्रत्याह ।) - **पूर्वमेवाहम् इहासम् इति । तत् पुरुषस्य पुरुषत्वम् । स सहस्रशीर्षा पुरुषः ।**

सहस्त्राक्षः सहस्त्रपाद् भूत्वोदतिष्ठत्' (तै.आ.१-२३-९३) इति । यद्वा पूर्णत्वात् **पुरुषः** । **'तेनेदं पूर्णं पुरुषेण सर्व'** मिति श्रुतेः (महा.ना.उ.१०) । यद्वा शरीराख्ये पुरि शयनात् पुरुषः । शकारस्य षकारादेशः ।

श्रीविष्णुस्मृतौ, -

'पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः ।
तस्मात् पुरुष इत्येष प्रोच्यते तत्त्वचिन्तकैः' ।। इति ।

यद्वा पुरुशब्दो बहुपरः । **वन षण संभक्तौ** (धा.पा.४६४) । बहूनां बहुभिर्वा भजनात् **पुरुषः** । यद्वा - **षणु दाने** (धा.पा.१४६५)। बहुदानात् **पुरुषः** । एतद्गुणोपेतो भगवान् वासुदेवः; नान्य इत्यर्थः ।

पाद्मे पुराणे -

'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।
निरुपाधी च वर्तेते वासुदेवे सनातने ।।
सर्वलोकप्रतीत्या च पुरुषः प्रोच्यते हरिः ।
तं विना पुण्डरीकाक्षं नान्यः पुरुषशब्दभाक् ।। इति ।
ब्रह्माद्या देवताः सर्वा यक्षतुम्बुरुकिन्नराः ।
ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति' ।।
श्रीमदुत्तररामायणे - अगस्त्यवचनम् -
'असौ रामो महाबाहुरतिमानुषचेष्टया ।
तेजोमहत्तया वाऽपि संस्मारयति पूरुषम्' ।। इति ।

श्रीहरिवंशे -

'गोवर्धनादिधरणात् नाथ! नन्दसुतोऽपि सन् ।
पुरुषस्यांशसंभूतं त्वां वयं निरणैष्म हि' ।।

स्कन्दपुराणे -

'यथा भास्करशब्दोऽयमादित्ये प्रतितिष्ठति ।
यथा चाग्नौ बृहद्भानुर्यथा वायौ सदागतिः ।।
यथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते ।
तथा शङ्करशब्दोऽयं महादेवे व्यवस्थितः' ।। इति ।

श्रीविष्णुपुराणे -

'देवतिर्यङ्मनुष्येषु पुन्नामा भगवान् हरिः ।

श्रीनाम्नी लक्ष्मीर्मैत्रेय! नानयोर्विद्यते परम्' ।। इति । (१-८-३५)

श्रीनारसिंहे -

'स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः ।

प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद्वैष्णवादपि' ।।

वैष्णवे पुराणे -

'स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते ।

स्त्रीप्रायमितरत् सर्वं जगद्ब्रह्मपुरस्सरम्' ।। इति ।

अर्वाचीनाः कवयोऽपि -

'संहृत्य लोकान् पुरुषोऽधिशेते श्रीवत्सलक्ष्मा पुरुषश्च साक्षात्' ।

'तमसः परमं तमव्ययं पुरुषं योगसमाधिना रघुः' ।

'हरिर्यथैकः पुरुषोत्तमस्ततः?' इति ।

इत्यादिभिर्वचनैः पुरुषो वासुदेव इति सिद्धम् । योऽयं नारायणः सहस्राक्षः, स एव सहस्रपात् ।

स भूमिं विश्वतो वृत्त्वा - एवम्भूतः सः **भूमिं** भूम्यादिलोकजातं **विश्वतः** सर्वतो **वृत्त्वा** व्याप्य, यद्वा **भूमिं** जगत्कारणं प्रकृतिं **विश्वतः** कार्यवर्गैः सह वृत्त्वा **अत्यतिष्ठद्दशाङ्गुलम्** । यथाऽऽह, **'अणोरणीयान् महतो महीयानिति-'** (म.ना.उ.१०-२०)

'अणुत्वेन महत्त्वेन द्विधा तिष्ठति केशवः ।

तत्र पौरुषसूक्तेन महत्त्वमुपवर्णितम् ।।' इति ।

तस्मात् स भूतानि व्याप्य तताऽधिको भवतीत्यर्थः । एतदुक्तं भवति-योऽयं सहस्रशीर्षा पुरुषः, स पुरुषो भूम्यादिलोकजातं व्याप्य तस्माल्लोकजातात् दशाङ्गुलम् अत्यतिष्ठत् ।

अथ दशाङ्गुलशब्दस्यार्थ उच्यते । अत्र दशाङ्गुलशब्देन न दशाङ्गुलवचनम्; अपरिच्छिन्नस्य पुरुषस्य परिच्छेदप्रसङ्गात् । तर्हि कोऽर्थः? उच्यते ।

दशदशानत्यन्तयोः इत्येतस्मिन्नच् प्रत्ययः अतिकोटियोजनयोरिति । एतस्मिन् औणादिक उलच् प्रत्ययः । तस्मादनन्तयोजनम् इदमतीत्य अतिष्ठत् इत्युक्तं भवति । पाद्मपुराणे भुवनकोशाध्याये, -

'भूमेश्च ब्रह्मकोशस्याप्यन्तराळं कियद्वद ।

योजनानामनन्तत्वाद्दशाङ्गुळमिदं विदुः ।।' इति ।

सात्त्वतसंहितायां पुरुषसूक्तार्थे -

सहस्रशब्दोऽनन्तवचनः । पुरुषशब्दो वासुदेवपरः । भूमिशब्देन भूम्यादयो लोका उच्यन्ते । दशाङ्गुळशब्दोऽनन्तयोजनमाहेति ।

यद्वा अङ्गुळशब्दो गुणपरः । दशगुणवस्त्वन्तरभूतानि अतीत्य अतिष्ठत् । किं तदिति । पृथिव्या दशोत्तरा आपः । अद्भ्यो दशोत्तरो वह्निः, वह्नेः दशोत्तरो वायुः, वायोः दशोत्तरं व्योम, व्योम्नो दशोत्तरोऽहङ्कारः, अहङ्काराद् दशोत्तरो महान्, महतो दशोत्तरम् अव्यक्तम् । समस्तमिह वस्त्वतीत्य अतिष्ठत् इत्यर्थः ।

केचिदेवं व्याचक्षते - **दशाङ्गुळशब्दो** हृदयाकाशवाचकः । भूम्यादिलोकान् व्याप्य हृदयाकाशम् अत्यतिष्ठत् । दशाङ्गुळपरिमाणहृदयाकाशं अणोरणीय आकारेण अन्तरात्मतया अत्यतिष्ठत् । धकारस्य स्थाने तकारश्छान्दस इति अध्यर्थ्योऽय**मति**शब्द इति - तन्न युक्तम् । श्रूयमाणस्य अतिशब्दस्य मुख्यार्थसंभवे सति अध्यर्थवचनस्य अयुक्तत्वात् । **विश्वत** इति हृदयस्यापि कबलीकृतत्वाच्च । **'अणुत्वेन महत्त्वेन'** इत्यादिना, **'दहरादिमवाक्येन तस्याणुत्वं प्रदर्शितम्'** इति योगवासिष्ठे स्पष्टवचनाच्च । दहरशब्दः सूक्ष्मपर्यायः ।

नन्वेवं हि पूर्वमुक्तम्, अयं पुरुष इति । सर्वदेशसर्वकालापरिच्छिन्नविधं वेषं विहाय सर्वेषां दर्शनस्तुतिसमाराधनाद्यर्हं परिच्छिन्नं कञ्चन वेषमादत्त इति । प्रत्युतान्यथा वदति; अस्य परिच्छिन्नोऽपि अयं वेषः प्राप्तः पूर्ववदपरिच्छिन्न इति, कथं परिच्छिन्नत्वेन स्तूयत इति ।

अस्य चोद्यस्य परिहारः **पाद्मे**ऽभिहितः । स उच्यते -

'आदत्ते यादृशं रूपं जगत् त्रातुं परः पुमान् ।
स तादृशेन रूपेण दुर्ज्ञानो जायते हरिः ।।
तथाप्यमूर्तः पुरुषः स्तोत्रयोग्यो न जायते ।
तत्रस्थोऽप्यञ्जसानॄणां निर्वाणाय च कल्पते' ।

श्रीमात्स्ये अगस्त्यवचनम् -

'तस्यावनिगतस्येह प्रत्यक्षस्यापि ते वपुः ।
न ज्ञायते च तत्त्वेन परं रूपं कुतस्तव ।
मीनात्मा यादृशोऽसि त्वं तादृशस्त्वमसि प्रभो ।
वयं त्वामीदृश इति वेदितुं नोत्सहामहे' ।

श्रीमदुत्तररामायणे अगस्त्यवचनम् -

'शरीरे तव पश्यामि जगत् सर्वं रघूद्वह ।

तेजसा च सुदुर्दर्शो मध्याह्न इव भास्करः' ।। इति । (१-२९-१३)

अस्य परिग्रहो न कार्य इत्यर्थः । अशरीरोऽपि सन् सर्वं करोत्येव । इन्द्रियपरिग्रहो न कार्य इत्यर्थः । अनिन्द्रियोऽपि सन् तत्तदिन्द्रियकार्यं करोत्येव । **'अपाणिपादो जवनो गृहीता,'** (श्वे.उ.३-१९) **'अन्धो मणिमविन्दत्, तमनङ्गुलिरावयत् । अग्रीवः प्रत्यमुञ्चत्'** इत्यादि ।। १ ।।

पुरुष एवेदँ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥ २ ॥

सा.भा. - 'पुरुष एवेदँ - यदन्नेनातिरोहति' इति । **'यद्भूतं'** अतीतं जगत्, **'यच्च भव्यं'** भविष्यज्जगत्, यदपि **'इदं'** वर्तमानं जगत्, तत् **'सर्वं', 'पुरुष एव'** यथाऽस्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्य अवयवाः, तथा एव अतीतागामिनोरपि कल्पयोः द्रष्टव्यम् । **'उत'** अपि च, **'अमृतत्वस्य'** देवत्वस्य, अयं **'ईशानः'** स्वामी, यस्मात् कारणात् **'अन्नेन'** प्राणिनां भोग्येनान्नेन निमित्तभूतेन, **'अतिरोहति',** स्वकीयकारणावस्थाम् अतिक्रम्य परिदृश्यमानं जगदवस्थां प्राप्नोति । तस्मात् प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारात् न इदन्तस्य वस्तुतत्त्वमित्यर्थः ।। २ ।।

भ.भा. - इदानीं पुरुषस्य वैश्वरूप्यमाह - **पुरुष एवेति ।। इदं** प्रत्यक्षेण दृश्यमानं व्यक्तं स्थावरजङ्गमात्मकं यद्वर्तमानं **सर्वं यच्च भूतं** अतीतं **यच्च भव्यं** भविष्यत् एतत्सर्वं **पुरुष एव** पुरुषस्य एवायं परिणामः । **उत** अपि च अयं पुरुषः **अमृतत्वस्य** देवत्वस्यापि **ईशानः** समर्थः प्रसन्नः अमृतत्वमपि प्रापयितुं शक्नोति । देवानामपि ईश्वर इति यावत् । **यच्च अन्नेन** अदनीयेन निमित्तेन **अतिरोहति** कारणावस्थामतीत्य कार्यात्मना जायते मर्त्यादि, तस्यापीशान इत्येव अयोनिजानाम् अन्नरसपरिणामानां चेशान इति ।। २ ।।

रं.भा. - एवं देशतो व्याप्तिमुक्त्वा कालतो व्याप्तिम् ऐश्वर्यं चैवमाह **पुरुष एवेदं सर्वमिति** । यदिदं वर्तमानं कार्यजातम्, तत् सर्वं पुरुष एव । तदुपादानत्वात् सर्वस्य । न हि कार्यमुपादानेन विनाऽस्ति । **यद्भूतं** अतीतं वस्तु, तदपि पुरुष एव । **यच्च भव्यम्** - भविष्यच्च पुरुष एव । प्रपञ्चपुरुषयोः ईश्वरेशितव्यभावात् समानाधिकरणव्यपदेशः,

'ग्रामोऽयं देवदत्तः' इतिवत् । कार्यकारणभावाद्वा, 'पानीयं प्राणिनां प्राणाः' इतिवत् । एवमेव श्रुतिस्मृतीतिहासपुराणेषु सामानाधिकरण्यवादाः द्रष्टव्याः । **'वासुदेवः सर्व'मिति,** (भ.गी.७-१९) **'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।',** (छां.उ.३-१४-२)

'ज्योतींषि शुक्राणि च यानि लोके
त्रयो लोका लोकपालास्त्रयी च ।
त्रयोऽग्नयश्चाहुतयश्च पञ्च
सर्वे देवा देवकीपुत्र एव ।।
ज्योतींषि विष्णुर्भुवनानि विष्णु
र्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं
यदस्ति यन्नास्ति च विप्रवर्य' ।। इति । (वि.पु.२-१२-३८)

महाभारते -

'य एष देवकीपुत्रः पुरस्तादवतिष्ठते ।
स एव पुरुषो भूतं भव्यं चापि तथा भवत्' ।।

एवमस्य कालतो व्याप्तिमुक्त्वा अयमेव सृष्टिकार्यजातचेतनवर्गस्य सर्वदेशकालमोक्षप्रद इत्याह - **उतामृतत्वस्येशान** इति । **उत** किञ्च अयमेव पुरुषः **अमृतत्वस्य** मोक्षस्य **ईशानः** । सायुज्यादिचतुर्विधमोक्षप्रदो भवति । **'मोक्षो नित्येऽमृते देवे कीर्तितं त्वमृतं बुधैः'** इति नैघण्डुकोक्तत्वात् अमृतशब्दो मोक्षपर्यायः । मोक्षस्य ईशानो भवति । अन्नेन यदतिरोहति, तस्य शरीरवर्तिनो जीवजातस्य मोक्षं प्रति भगवानेव ईष्टे । यत् कार्यजात**मन्नेन** अदनीयेन भोग्यद्रव्येण स्वकारणमतीत्य रोहति - **'अन्नाद्भूतानि जायन्ते'** (तै.उ.२-१) इति श्रुतिः - अहरहरशितेनान्नेन पूर्वपूर्वबाल्यकौमाराद्यवस्था अतीत्य यत् जीवजातं **रोहति** वर्धते, तस्य मोक्षप्रदाने विष्णुरीशानो भवतीत्यर्थः । **मोक्षधर्मे-**

'अन्नाज्ञातस्य सर्वस्य मनुष्यादेरकारणात् ।
निर्वाणदायी भवति कृपया पुरुषोत्तमः ।' इति ।। २ ।।

ए॒तावा॑नस्य महि॒मा । अतो॒ ज्याया॑ँश्च॒ पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ । त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥ ३ ॥

सा.भा. - 'एतावानस्य - त्रिपादस्यामृतं दिवि' इति । अतीतानागतवर्तमानरूपं जगद्यावदस्ति **'एतावान्'** सर्वोऽपि, **'अस्य'** पुरुषस्य, **'महिमा'** । स्वकीयसामर्थ्यविशेषः,

न तु तस्य वास्तवं स्वरूपं वास्तववस्तुपुरुषः **'अतः'** महिम्नोऽपि, **'ज्यायान्'** अतिशयेनाधिकः । एतच्च स्पष्टीक्रियते । **'विश्वाभूतानि'** कालत्रयवर्तीनि प्राणिजातानि, **'अस्य'** पुरुषस्य, **'पादः'** चतुर्थोऽशः । **'अस्य'**, अवशिष्टं **'त्रिपात् स्वरूपं'** **'अमृतं'** विनाशरहितं सत्, **'दिवि'** द्योतनात्मके स्वप्रकाशरूपे, अवतिष्ठते । यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ.३) इत्याम्नातस्य परब्रह्मण इयत्ताया अभावात् अंशचतुष्टयं न निरूपयितुं शक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाऽत्यल्पमिति विवक्षितत्वात् पादत्वोपन्यासः ।। ३ ।।

भ. भा. - एतावानिति ।। एतावान् एतत्प्रमाणः यत् मर्त्या अमर्त्याश्च एतावान् **अस्य** पुरुषस्य **महिमा** महत्कर्म विभूतिरित्यर्थः, न तु अयमेतावान् । अयं तु **पुरुषः** अतोऽपि यथोक्तात् मर्त्यामर्त्यलक्षणात् कार्यवर्गात् **ज्यायान्** वृद्धतरः नैतावानेवेति मन्तव्यः । तत्कथमित्याह - **पादः** एकदेशः **अस्य विश्वा भूतानि** भूतजातानि अल्पांशो व्यक्तात्मना वर्तते । पादमात्रत एव सर्गप्रतिसर्गयोः प्रवृत्तिः । **अस्य** सम्बन्धि अपरं **त्रिपात्** पादत्रयात्मकं व्यक्तप्रमाणात् त्रिगुणं महाप्रमाणं एकदेशान्तरं अमृतं अविकारित्वेन चेतनरूपेण **दिवि** द्योतनवति आदित्यमण्डले परमपुरुषशरीरभूते वर्तते । उक्तं च **'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ।'** (तै.आ.८०५) इति । त्रयः पादा यस्येति **'सङ्ख्यासु पूर्वस्य'** (पा.सू.५-४-१४०) इति लोपः **'द्वित्रिभ्यां पाद्दन्'** (पा.सू.६-२-१९७) इत्युत्तरपदान्तोदात्तत्वम् । पुरुषस्य अपरिमितत्वात् न चतुर्थांशवचनः पादशब्दः ।।

रं.भा. - उक्तं सर्वेश्वर (महिमान) मुपसंहरति **एतावानस्य महिमा** । एतत्परिमाणोऽस्य महिमा विभूतिमात्रम् । **अतो ज्यायांश्च पूरुषः** । अतः ईदृशात् महिम्नः **ज्यायान्** प्रशस्यः श्रेष्ठः । यत एव पुरुषः सकलानपि लोकान् व्याप्य तिष्ठति, यतश्च समस्तवस्तुजातम् असौ सृजति, यतश्च संसारिणो मोक्षस्य अयमीष्टे, अत एतावानस्य महिमा ।

शतपथब्राह्मणे अध्यात्मखण्डे प्रतिपादितम् - **'यदाऽयं नारायणाख्यः पुरुषो महान् भवति, तदानीमेवाणुर्भवति । यदाऽयं व्याप्तो भवति, तदेव प्रादेशिको भवति । यदैव भूमौ भवति, तदैव परमव्योम्नि भवति । यदा एक एव भवति, तदा अनेकः । यदाऽयं प्राकृतो भवति, तदैवाप्राकृतो भवति । यदा विषयवशो भवति, तदैवोपरतो भवति । यदा नरको भवति, तदानीमेव स्वर्गो भवति । यदा स्त्री भवति, तदैव पुरुषो भवति । यदा मनुष्यो भवति, तदा देवो भवति । यदा सव**

भवति, तदा शून्यो भवति । यदा प्रपञ्चो भवति, तदा प्रपञ्चाद्भिन्नो भवति । यदा बद्धो भवति, तदैव मुक्तो भवति । यदा शुक्लो भवति, तदा कृष्णो भवति । यदा शरीरी भवति, तदा अशरीरी भवति । यस्मात् यानि यानि विरुद्धस्वभावानि, तानि सर्वाणि तदानीमेव अस्मिन् लीनानि भवन्ति, तस्मादयम् ईशः इति दुर्ज्ञानः, दुर्वचः, दुर्ध्यानः । तस्मात् ज्येष्ठः । वाङ्मनसोः अगोचरः' इति ।

हरिवंशे पुरुषसूक्तप्रकरणे नारदस्तुतौ –

'देशतः कालतो वाऽपि मोक्षदत्वा च वेधसः ।
हरेर्विभूतिमात्रं तु केवलं प्रतिभाषितम् ।
अतो महिम्नः स्वल्पांशात् ज्यायानेव परः पुमान् ।
ज्यायस्त्वं तस्य तत् सर्वैः सुदुर्ज्ञानतरं भवेत् इति ।
ब्राह्मणेभ्योऽखिलेभ्यश्च भूतजातेभ्य एव च ।
ब्रह्मादिभूतसंघेभ्यो ज्यायानेव परः पुमान् ।
ओजसो रूपतो वापि यशसो वीर्यतोऽपि च ।
विभुत्वातिशयाद्वापि ज्यायानेव जनार्दनः' ।

महाभारते –

'एकतो वा जगत् कृत्स्नमेकतो वा जनार्दनः ।
सारतो जगतः कृत्स्नादतिरिक्तो जनार्दनः' । (उद्यो.प.६८-७)

श्रीभगवद्गीतायाम् –

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । (१५-१६)
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः' ।। (१५-१८) इति

श्रीनारसिंहे –

'ब्रह्मादिस्तम्बपर्यन्तं जगत् स्थावरजङ्गमम् ।
सर्वमेवास्य महिमा स च ज्यायानतो हरिः' ।

अथवा - अस्य परिदृश्यमानस्य चराचरात्मकस्य प्रपञ्चस्य महिमा एतावान् परिच्छिन्नः । अतः अस्मात् प्रपञ्चात् पुरुषो **ज्यायान्** अपरिच्छिन्नप्रभावः ।

अस्य ज्यायस्त्वमेव प्रपञ्चयति **पादोऽस्य विश्वा भूतानि** । अस्य दुर्ज्ञानस्य पुरुषस्य **विश्वा भूतानि** चराचरात्मकानि **पादः** । अंशः कलामात्रम् इत्यर्थः । सृष्ट्यादिशक्तेः एकदेशः । तदीयशक्तिलेशविजृम्भितम् इदं जगद् गीयते, –

'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' ।। इति । (भ.गी.१०-४२)

श्रीविष्णुपुराणे –

'यस्यायुतायुतांशे विश्वशक्तिरियं स्थिता' ।। इति । (१-९-५३)

अत्रैव गोपीनां वचने –

'यस्याखिलं महीव्योमजलाग्निपवनात्मकम् ।
ब्रह्माण्डमल्पकांशांशे तोष्यामस्त्वां कथं वयम्' ।। (५-७-५०)

श्रीनारसिंहे –

'यदंशांशतदंशांशतल्लेशलवलेशतः ।
उत्पन्नञ्च प्रलीनञ्च जगत् सर्वं चराचरम्' ।। इति ।

त्रिपादस्यामृतं दिवि । त्रयः पादा यस्य, तत् त्रिपादुक्तम् । त्रिशब्दो बह्वर्थपरः । अस्य निरतिशयज्ञानानन्दवैराग्यैश्वर्यादिभिः अनेकैः सुगुणैः उपेतस्य रूपममृतं दिवि । **अमृतम्** अमरणधर्मकमित्यर्थः । **दिवि** परमे स्थाने । यत् परमपदवाच्यं सूरयः सदा पश्यन्ति । **'द्युशब्दः परमे व्योम्नि स्वर्गे वियति कथ्यते ।'** इति निघण्टुः ।

वैकुण्ठसंहितायाम् –

'अनन्तायामविस्तारो वैकुण्ठः संप्रकीर्तितः ।
तस्मादस्य त्रिपादांशो वैकुण्ठो भासतेतराम्' ।। इति ।

एवं सात्त्वतसंहितायां श्रीवासुदेवस्य चतुर्व्यूह अध्यायेऽपि- 'अत्र पादशब्दः चतुर्थांशवचनः । त्रिपाच्छब्दः त्रिपादवचनः' इति ।

तथा पुरुषसंहितायां वैकुण्ठसंहितायाञ्च, –

'सदादिपुरुषो विष्णुः सर्वव्यापी सनातनः ।
शरीरात् स्वाज्जगत् त्रातुं सङ्कर्षणमभावयत् ।।
स च प्रद्युम्नसंज्ञस्सन्ननिरुद्धमभावयत् ।
तस्मात् ब्रह्मा समुत्पन्नो जगत् स्रष्टुं चराचरम् ।।
एवं चतुर्धा संव्यूह्य स्वात्मानं पुरुषोत्तमः ।
अण्डे ह्यप्राकृते नित्यं त्रिपादेन विराजते ।।
इतरेण च पादेन प्राकृतेऽण्डे विराजते ।
जगत्सृष्ट्यादिकार्याणि कर्तुकामः स्वलीलया' ।। ३ ।।

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः ।
ततो विष्वङ् व्यक्रामत् । साशनानशने अभि ॥ ४ ॥

सा.भा. - 'त्रिपादूर्ध्व उदैत्पुरुषः - साशनानशने अभि' इति । योऽयं **'त्रिपात्', 'पुरुषः'** संसारस्पर्शरहितबहुलस्वरूपः । सोऽयं **'ऊर्ध्व उदैत्'** अस्मादज्ञानकार्यात् संसाराद्बहिर्भूतः सन् अत्रत्यः गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान् । तस्य योऽयं **'पादः'** लेशः, सोऽयं **'इह'** मायायां, **'पुनरभवत्'** सृष्टिसंहाराभ्यां पुनः पुनरागच्छति । अस्य सर्वस्य जगतः, परमात्मांशत्वं भगवताप्युक्तम्, **'विष्टभ्याहमिदं कृस्नमेकांशेन स्थितो जगत्'** (भ.गी.१०-४२) इति । **'ततः'** मायया आगत्यानन्तरं **'विश्वङ्'** देवतिर्यगादिरूपो विविधः सन्, **'व्यक्रामत्'** व्याप्तवान् । किं कृत्वा । **'साशनानशने अभि',** अभिलक्ष्य साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातं अनशनं तद्रहितमचेतनं गिरिनद्यादिकं तदुभयं यथा स्यात् तथा स्वयं एवंविधो भूत्वा व्याप्तवानित्यर्थः ।। ४ ।।

भ.भा. - एवम् आदित्यान्तरपुरुषरूपेण महापुरुषो विश्वस्य सर्गकारणम् इत्युक्तम् । इदानीं यज्ञपुरुषरूपेण महापुरुषस्य लोकसृष्टिकारणत्वं तदुभयात्मना च लोकस्थितिहेतुत्वं पुरुषस्याह - **त्रिपादिति ।** वेदानां प्रत्येकं त्रिभिस्त्रिभिः पादैस्सहितः पुरुषो यज्ञात्मा त्रिपात् । रूपस्वौ उक्तौ । वेदानां त्रींस्त्रीन् पादानुपादाय यज्ञो भूत्वा स **पुरुष** ऊर्ध्वं **उदैत्** ऊर्ध्वमुद्गतवान् । यथा **'गुहा त्रीणि निहिता नेङ्गयन्ति'** इति । अथ **अस्य** पुरुषस्य यज्ञात्मनः **पादः** तुरीयांशः वेदानां चतुर्थभागा आत्मा इह **आभवात्** अस्यां परिदृश्यमानायां सर्वभूतस्थितौ कारणभावेन पुनःपुनर्भवति, यथा इष्टदेवास्तुत्यादिभिः तर्पयित्वा तत्फलेन यजमानान् संयोजयति **'अग्नौ प्रास्ताहुतिः'** इति न्यायेन लोकानां स्थितिं निर्वर्तयति । आदित्यमण्डलगता चाहुतिः उदकभावेन रश्मिभिः क्रियते, रश्मिस्थं चोदकं यदा सर्वभूतानुग्रहसमर्थं भवति तदा तन्मध्यमस्थानीयवृष्टिरूपेण पातयित्वा अनेन ओषध्यादीना स्थितिहेतुर्भवति । एवमयं पुरुषस्य पादः पुनःपुनराभवति आवृत्यावृत्य स्थितिहेतुर्भवति इहत्यानाम् । लेट्याडागमः । ताभ्यां यज्ञादित्यप्रवृत्तिभ्यां समुपबृंहितपादो महापुरुषो **विष्वङ्** नानाञ्चनः **व्याक्रमत् विविधं क्रामति** कार्यवशात् विविधं सर्पति **साशनानशने अभि**लक्ष्य । साशनं अन्नाधीनस्थितिकं जरायु अण्डोद्भित् अस्वेदजं चतुर्विधं अनशनं देवजातम् । सत्यपि पारम्पर्येण अन्नाधीनस्थितिकत्वे अस्मदादीनामिव साक्षादशनाभावात् अनशनत्वं देवजातस्य । तदुभयस्थितिमभिसन्धाय **विष्वङ् व्यक्रामदिति** । विष्वगञ्चतीति ऋत्विगादिना क्विन् प्रत्ययः, **'क्विन्प्रत्ययस्य कुः'** (पा.सू.८-२-६२) इति कुत्वम् ।।

रं.भा. - उक्तमेव अर्थान्तरविवक्षयाऽनुवदति – **त्रिपादूर्ध्व उदैत्** उद्गतवान् । यद्वा स एष त्रिपादिति त्रिपादः पुरुष ऊर्ध्वं प्रकृतिमण्डलादूर्ध्वम् **उदैत्** उदगच्छत् ।

तं दुर्ज्ञानं पुरुषं विहाय तस्य चतुर्थांशम् अनिरुद्धाख्यं नारायणम् अदूरविप्रकर्षेण स्तोतुम् आरभन्ते । **पादोऽस्येहाभवात् पुनः** । अस्य **पादः** एकदेशः **इह अभवत् पुनः** संसारचक्रे भोग्यभोगायतनादिरूपेण पुनरभवत् - पुनः पुनः प्रवर्तते । **अभवात्** इत्याध्वर्यवपाठे दीर्घः छान्दसः ।

यद्वा भगवद्व्यूहाभिप्रायं **पादोऽस्य विश्वा भूतानी**त्यादि । वासुदेवसङ्कर्षण-प्रद्युम्नानिरुद्धाकारो भगवांश्चतुर्व्यूहो भवति । अत्र भगवतस्तुरीयो भागः अनिरुद्धाभिधानः विश्वानि भूतानि अधिष्ठाय सृष्ट्यादीनि करोति । पूर्ववत् कार्यकारणयोः अभेदवादः । इतरैः त्रिभिर्भागैः वासुदेवसङ्कर्षणप्रद्युम्नाख्यैरुपेतम् **अमृतम्** अविनाशि परमसुखरूपं **दिवि** नाकपृष्ठे वसति । उक्तमेव व्यनक्ति **त्रिपा**दिति । वासुदेवादिरूपैः त्रिपात् पुरुष **ऊर्ध्वः** वाङ्मनसयोः अगोचरस्सन् **उदैत्** प्रकृतिप्राकृतमयात् सुदूरम् उत्क्रान्तवान् । **इह** संसारमण्डले अस्य **पादः** अनिरुद्धाभिधानः भगवान् अभवत् । पुनः पुनः सृष्ट्यादौ प्रवर्तत इति । तथा च पुराणे तत्त्वाध्याये, –

'सर्वस्याथ जगन्नाथः सर्वात्मा भूतभावनः ।
महतः प्रळयस्यान्ते जगत् स्रष्टुं समुद्यतः ।
परमव्योमनिलयो वासुदेवः सनातनः ।
शरीरात् स्वाज्जगत् त्रातुं सङ्कर्षणमभावयत् ।
स चाण्डजातमसृजत् महाभूतानि पञ्च च ।
दशोत्तराणि सर्वाणि परस्तात् प्रकृतेर्व्यधात् ।
तत्रत्यानाञ्च भूतानाम् अन्योन्यानुभवाय च ।
प्रद्युम्नं भावयामास सदा कामरसप्रदम् ।
एवमप्राकृतान्येष बाह्यान्यण्डानि केशवः ।
सृष्ट्वा च प्राकृतं चाण्डं स्रष्टुं दध्रे स्वमानसम् ।
ततः स वासुदेवोऽयं प्रद्युम्नादुदपादयत् ।
सर्वस्य जगतः कोशमनिरुद्धाह्वयं हरिम् ।
स चानिरुद्धो भगवानादौ जलमभावयत् ।
जले तस्मिन् प्रचिक्षेप निजवीर्यं जगन्मयम् ।

तद् द्वितीयाण्डमभवदण्डात् ब्रह्मा व्यजायत ।
स भूतानां च सर्वेषामग्रे जातः पितामहः ।
जगन्निर्मातुमुद्युक्तः समन्ताद्विक्रमे तदा ।
ततः संबद्ध्यमानोऽयं सृष्टियज्ञात्मना व्यधात् ।' इत्यादि ।

संप्रति विवक्षितां प्रपञ्चसृष्टिं वक्तुम् उपक्रमते **ततो विष्वङ् व्यक्रामदिति** । समन्तादर्थे **विष्वङ्** निपातितः । **ततः** पश्चात् पुरुषः **ततः** महत्प्रळयात् पश्चात् तेन पादनारायणेन **व्यक्रामत्** उद्यमम् अकरोत् । किमुद्दिश्य । **साशनानशने अभि** । अशनेन सह वर्तत इति **साशनं** जङ्गमवस्तु । अशनमस्य नास्तीति अनशनं स्थावरं वस्तु । ते उभे प्रति, **विष्वक्** सर्वतः चराचरात्मकं समस्तं जगत् प्रति मानससङ्कल्परूपं सृष्टिव्यापारम् अकरोत् इत्यर्थः ।। ४ ।।

तस्मा॑द्वि॒राड॑जायत । वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत । प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

सा.भा. - 'तस्माद्विराडजायत - पश्चाद्भूमिमथो पुरः' इति । **विश्वङ्-व्यक्रामदिति** यदुक्तं तदेव प्रपञ्च्यते । **'तस्मात्'** आदिपुरुषात्, **'विराट् अजायत'** ब्रह्माण्डदेह उत्पन्नः, विविधं राजन्ते वस्तनि अत्रेति विराट्, **'विराजो अधि'** विराड् देहस्योपरिस्थितमेव देहमधिकरणं कृत्वा, **'पुरुषः'** तद्देहाभिमानी कश्चित् पुमान्, **'अजायत'** । योऽयं सर्ववेदान्तवेद्यः परमात्मा स एव स्वकीयया मायया विराड्देहं ब्रह्माण्डं सृष्ट्वा तत्र जीवः अभवत् । एतच्चाथर्वणिका उत्तरतापनीये समामनन्ति । **'स वा एष भूतानि इन्द्रयाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य अमूढो मूढ इव व्यवहरन्नास्ते माययैवेति'** । (नृ.उ.ता.२-१-९) **'स जातः'** विराट् पुरुषः **'अत्यरिच्यत'** अतिरिक्तेऽभूत्, विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । **'पश्चात्'** देवादिजीवभावादूर्ध्वं, **'भूमिं'** ससर्जेति शेषः । **'अथो'** भूमिसृष्टेः अनन्तरं, तेषां जीवानां **'पुरः' 'ससर्ज'**, आपूर्यन्ते सप्तभिः धातुभिरिति पुरः शरीराणि ।। ५ ।।

भ.भा. - इदानीं सृष्टिरुच्यते - **तस्मात्** प्रणवाख्यात् नारायणात् । अव्यक्तादिति केचित्, तदयुक्तं, तस्य अप्रस्तुतत्वात् । **तस्मात्** प्रकृतान्महापुरुषात् **विराडजायत** विविधं राजन्ति वस्तूनि यस्मिन् स विराट् मनस्संज्ञः प्रजापतिः । ततो **विराजो अधि** विराजमेवाधिकरणीकृत्य **पुरुषो**ऽजायत दशहोत्राख्यः प्रजापतिः पुरुषसमष्ट्यात्मना अजायत । यथोक्तं **'स मानसीन आत्मा जनानाम्'** (तै.आ.३-११-२०) इति । **स**

वैराजः पुरुषः जातः प्रादुर्भावानन्तरं **अत्यरिच्यत** (तै.आर.३-११-२०) स्वयमेव आत्मानम् अत्यरेचयत् । कर्मकर्तरि रूपम् । अनेकधाभावलक्षणं स्वरूपातिरेकम् अभजत भूतेन्द्रियादीनि असृजतेति यावत् । उक्तं च **'असतोऽधि मनोऽसृज्यत । मनः प्रजापतिमसृजत । प्रजापतिः प्रजा असृजत'** । (तै.ब्रा.२-२-९) इति । **पश्चादिति ।** भूतग्रामस्यान्ते **भूमिं** अत्यरेचयत् । सामर्थ्यात् कर्मकर्तृभावो निवर्तते । एवं आकाशादिपृथिव्यन्तानां तत्त्वानां सर्ग उक्तः । **अथो** अनन्तरं भूतसृष्टेः **पुरः** पुराणि शरीराणि सुरनरतिर्यगादीनां स्थावरादीनां च अत्यरेचयत् । पुर इत्यत्र छान्दसं विभक्त्युदात्तत्वम् । एवम् इन्द्रियसर्गः पिण्डसर्गश्च प्रतिपादितः ।। ५ ।।

रं.भा. - तस्माद्विराडजायत । तस्मादेवं व्यापारवतः पुरुषात् विराडजायत । **विराट्**छब्देन महदादिरूपेण विविधं राजतीति हिरण्मयम् अण्डमुच्यते । **विराजो अधिपूरुषः** । विराजोऽनन्तरं **पुरुषः** चतुर्मुखाख्योऽध्यजायत । तथाऽऽह - **मनुः -**

'ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत् तमोनुदः' ।। (म.स्मृ.१-६)
'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत्' ।। (म.स्मृ.१-८)
'तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः' ।। (म.स्मृ.१-९) इति ।

स जातो अत्यरिच्यत । तस्मात् ब्रह्मा अतिरिक्तोऽभवत् । **पश्चाद्भूमिमथो पुरः । अथो** शब्दः अतिरेक इत्यर्थः । विभक्तिव्यत्ययेन भूमेः पश्चात् पुरस्ताच्चोर्ध्वं चात्यन्तं प्रवृद्धो व्याप्तो बभूव इत्यर्थः । सर्वत्रातिवृद्धकायोऽभवत् ।

शाकल्यब्राह्मणे – पुरुषसूक्तसंहितायां – **'आदिश्चतसृणाम् ऋचामर्थमुक्त्वा स तस्मात् व्यापारादनन्तरम् । अथ पादनारायणात् मूलप्रकृतिरजायत । सा प्रकृतिः पादनारायणशासनात् महदहङ्कारादीन् सूक्ष्मान् पदार्थान् अजनयत् । एवं सूक्ष्मायां सृष्टौ, कृतायां स पादनारायणः स्थूलसृष्ट्यर्थं चतुर्मुखम् पुरुषम् अभिदध्यौ । तद्ध्यानानन्तरमधि विराजः प्रकृते पश्चात् पुरुषश्चतुर्मुखाख्यः अजायत । स जातो भूमेः पश्चात् पुरतश्चातिरिच्यते । अतिरेको वृद्धिः । सर्वकार्यक्षमोऽति-वृद्धकायोऽभवत् । वृद्धकायस्सन् तूष्णीमास्त तं अनिरुद्धनारायणोऽप्राक्षीत् । ब्रह्मन्! किं तूष्णीं भवसीति । अज्ञानादिति होवाच । ब्रह्मन्! तव इन्द्रियाणि**

देवान् ऋत्विजः कृत्वा त्वदीयं च कळेबरं हविः कृत्वा मां हविर्भुजं ध्यात्वा मय्यग्नौ निवेदय । मदङ्गस्पर्शमात्रेण जगत्कोशभूतः त्वत्कायो बृंहिष्यते । तस्मात् उद्भूतानि प्राणिजातानि यथापूर्वं निर्माय स्रष्टा भविष्यसि । य एव सृष्टियज्ञं जानाति, स जन्मनि इह मुक्तो भवतीति' ।

श्रीवराहपुराणे –

'सिसृक्षोरनिरुद्धाख्यादण्डे प्रथममुद्बभौ ।
अण्डाद् ब्रह्माऽध्यजायत निर्मातुं सकलं जगत् ।
स जातमात्रो भगवानवर्धत समन्ततः ।
तं प्रवृद्धमहाकायं ब्रह्माणं रचिताञ्जलिम् ।
जगत्सृष्टिमजानन्तमनिरुद्धो हरिर्जगौ ।
त्वमिन्द्रियैर्देवसंज्ञैः कुरु यज्ञं समाहितः ।
त्वच्छरीरं हविर्ध्यात्वा मां ध्यात्वा च हविर्भुजम् ।
प्रणवोच्चारणेनैव मय्यग्नौ त्वां निवेदय ।
मदङ्गस्पर्शमात्रेण स्रष्टुं योग्यो भविष्यसि' ।। ५ ।।

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥

सा.भा. - 'यत् पुरुषेण ग्रीष्म - इध्मः शरद्धविः' इति । पूर्वोक्तक्रमेण देवशरीरेषु उत्पन्नेषु ते **'देवाः'**, उत्तरसृष्टिसिध्यर्थं तत्साधनत्वेन **'यज्ञमतन्वत'** कञ्चिद्यज्ञमन्वतिष्ठन् । बाह्यद्रव्यस्यापि उनुत्पन्नत्वेन हविरन्तरासम्भवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन सङ्कल्प्य तेन **'पुरुषाख्येन'**, **'हविषा'**, **'यत्'** यदा, मानसं **'यज्ञं'**, अकुर्वत तदानीं **'अस्य'** यज्ञस्य, वसन्तर्त्तुरेव **'आज्यं'**, अभूत्, तमेवाज्यत्वेन सङ्कल्पितवन्तः, एवं **'ग्रीष्मः'**, इध्मत्वेन सङ्कल्पितः । **'शरत्'**, पुरोडाशादिहविष्ट्वेन सङ्कल्पिता । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन सङ्कल्पः । वसन्तादीनां तु आज्यादिविशेषरूपत्वेनेति द्रष्टव्यम् ।। ६ ।।

भ.भा. - इदानीं सृष्टिविशेष उच्यते - **यदिति ।। यत्** यदा **पुरुषेण** प्रजापतिना **हविषा** हविष्ट्वेन सङ्कल्पितेन हविरन्तरस्य अभावात् **देवाः** प्राणाः प्राजापत्याः इन्द्रियाणि च **यज्ञं** सङ्कल्पात्मकं **अतन्वत** यज्ञमिव अकुर्वत । सृष्टिकामः प्रजापतिरेव प्राणादिवृत्तिभेदेन उच्यते । अथ **अस्य** यज्ञस्य **वसन्त आज्यमासीत्**, तत्र गवां भूयिष्ठत्वात् तमेवर्तुं तद्विकाराज्यकार्याय समकल्पयत् । एवं ग्रीष्मशरदौ व्याख्येये ।। ६ ।।

रं.भा. - संप्रति प्रपञ्चसृष्टिं यज्ञरूपेण कथयति । **यत् पुरुषेण हविषा –** । **यत्** यदा **पुरुषेण** चतुर्मुखाख्येन पशुहविषा देवाः साध्याख्याः, तदिन्द्रियाणि वा यज्ञं सृष्ट्याख्यं सृष्ट्या (ध्या) त्मक ध्या (ज्ञा) नमय (सृष्ट्यर्थमध्यात्मज्ञानमय?) **अतन्वत** अकुर्वत । 'इन्द्रियप्राणसाध्येषु देवशब्दः समीरितः' इति योगवासिष्ठवचनात् देवशब्द इन्द्रियवाची । तदा **वसन्तो अस्यासीदाज्यम् । अस्य** अध्यात्मज्ञानयज्ञस्य वसन्तः कालः आज्यमासीत् । पाद्मे पुराणे वसन्तवर्णने,

'हिमदग्धतृणा भूमिर्वसन्ते शोभते तृणैः ।
गावश्च तृणभक्षेण दुहते सुतरां पयः' इति वचनात् । शिशिरापगमे गवां कार्श्यापगमात् बह्वाज्यहेतुत्वमुक्तं भवतीति वसन्तस्य आज्यत्वमुक्तम् । एतेन वसन्तकालसृष्टिरुक्ता । **ग्रीष्म इध्मः** । ग्रीष्मर्तुः इध्मत्वेन ध्यान आसीत् । तापातिशयहेतुत्वाद् ग्रीष्मस्य इध्मं भवतीति ।

'ग्रीष्मकाले पलाशेध्मानाहरन्ति महर्षयः ।
ये च सांवत्सरं सत्रमासते दोष शान्तये' इति ।

अनेन ग्रीष्मकालसृष्टिरुक्ता । **शरद्धविः** । शरदृतुः पुरोडाशाख्यं हविः आसीत् । श्रीरामायणे शरद्वर्णने –

'खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किञ्चिदालम्बाः शालयः कनकप्रभाः' । (३-१६-१७)

इति । अनेन शरत्कालसृष्टिरुक्ता । व्रीहिपाकहेतुत्वात् शरदो हविष्ट्ववादः ।। ६ ।।

स॒प्तास्या॑सन् परि॒धय॑: । त्रिः स॒प्त स॒मिध॑: कृ॒ता: ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः । अब॑ध्न॒न् पुरु॑षं प॒शुम् ॥ ७ ॥

स.भा. - 'सप्तास्यासन् परिधयः - अबध्नन् पुरुषं पशुं' इति । **'अस्य'** साङ्कल्पिकयज्ञस्य, गायत्र्यादीनि **'सप्त'**, **छन्दांसि 'परिधयः'**, **'आसन्'**, ऐष्टिकस्य आहवनीयस्य, त्रयः परिधयः औत्तरवेदिकास्त्रयः, आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः । अत एव आम्नायते, **'न पुरस्तात् परिदधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाँस्यपहन्ति'** इति । त एत आदित्यसहिताः सप्त परिधयोऽत्र सप्तच्छन्दोरूपाः । तथा **'समिधः'**, **'त्रिःसप्त'** त्रिगुणितसप्तसङ्ख्याकाः एकविंशतिः, **'कृताः द्वादशमासाः, पञ्चर्तवः, त्रय इमे लोकाः, असावादित्य एकविंश'** (तै.सं.५-१-१०-३) इति श्रुताः पदार्था

एकविंशतिदारुयुक्ता इध्मत्वेन भाविताः । यः पुरुषो वैराजोऽस्ति तं **'पुरुषं', 'देवाः'** प्रजापतिप्राणेन्द्रियरूपाः, **'यज्ञं तन्वानाः'** मानसयज्ञं कुर्वाणाः, **'पशुमबध्नन्'** विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र पुरुषेण हविषा इत्युक्तम् ।। ७ ।।

भ.भा. - अथ **अस्य** यज्ञस्य **सप्त** पदार्थाः छन्दांसि **परिधय आसन्** छन्दांस्येव परिधित्वेन अबुध्यन् । तत्र त्रय औत्तरवेदिकाः परिधयस्त्रयः तान्त्रिकाः आदित्यः सप्तम इति । **'आदित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहन्ति'** इति परिधित्वम् आदित्यस्य । अथास्य यज्ञस्य **त्रिस्सप्त** एकविंशतिपदार्थाः **समिधः कृताः 'द्वादश मासाः पञ्चर्तवः । त्रय इमे लोकाः । असावादित्य एकविंशः'** (तै.सं.५-१-१०-३) इति इध्मत्वेन एते कल्पिता इति । एवं इध्मावयवानां एकविंशतेः दारूणां सम्पादनेन इध्मनिरूपणं कृतम् । पूर्वं तु पृथक्त्वेन परिधानकाले परिधिनिरूपणं कृतमिति **द्रष्टव्यम् ।** एवं प्राजापत्यं सङ्कल्पयज्ञं कल्पयित्वा तत्फलं प्रपञ्चसृष्टिमाह - **देवाः** इति । **देवाः** प्राणाः प्राजापत्याः **यज्ञं** सङ्कल्पात्मकं **तन्वानाः यत्** यदा **पुरुषं** प्रजापतिं **पशुं अबध्नन्** मनसा पशुत्वेन सङ्कल्पितवन्तः नियोजनमिव कृतवन्तः ।। ७ ।।

रं.भा. - बह्वृचपाठे उपरिष्टात् पठिताऽपि याजुषं पाठम् आश्रित्य औचित्यात् **सप्तास्यासन् परिधय** इत्येषा व्याख्यायते । तस्य सृष्टियज्ञस्य सप्त परिधय आसन् । परितो निधीयत इति परिधिः । परिधीनां सप्तत्वमाह, **'उत्तरवेदिपरिधयस्त्रयः । आहवनीयस्य परिधयस्त्रयः । आदित्यः सप्तमः'** इति शतपथब्राह्मणे । अत्र के परिधित्वेन ध्याता आसन्? उच्यते । पृथिव्यप्तेजोवाय्वाकाशाहङ्कारबुद्धयः सप्तेति मैत्रावरुणि उपनिषदस्ति । **त्रिस्सप्त समिधः कृताः ।** तथा च श्रुतिः **'एकविंशतिमिध्मदारूणि भवन्ती'**ति । अत्र के समित्त्वेन कृताः । पैङ्गायनिब्राह्मणे समिध उक्ताः ।

'पृथिव्यादीनि भूतानि तन्मात्राश्चैव पञ्च च ।
कर्मेन्द्रियाणि पञ्चाथ पञ्च ज्ञानेन्द्रियाणि च ।
अन्तःकरणमित्येकविंशश्च समिधः कृताः' । इति ।

कदा परिध्यादयः कृताः? **देवा यद्यज्ञं तन्वानाः - । यत्** यदा साध्याख्या देवाः - वैकुण्ठसंहितायाम्-

'ते देवा इति कीर्त्यन्ते ये सुरालयवासिनः ।
वैकुण्ठवासिनः सर्वे साध्या देवा इतीरिताः' । इति ।।

इन्द्रियाणि वा **देवाः** सृष्टिरूपं यज्ञं कुर्वाणाः पुरुषं चतुर्मुखाख्यमबध्नन् पशुत्वेन अमन्वत - तदेत्यर्थः । **अबध्नन् पुरुषं पशुम्** । विष्णोराज्ञया रशनास्थानीयया ब्रह्माख्यं

पशुं देवाः तत्परवशानि इन्द्रियाणि मूलप्रकृतौ यूपस्थानीयायां सकललोक सृष्टियज्ञनिष्पत्तये न्ययुञ्जन् ।। ७ ।।

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥ ८ ॥

सा.भा. - अथाष्टमीमाह - **'तं यज्ञं बर्हिषि प्रौक्षन् - साध्या ऋषयश्च ये'** इति । **'यज्ञं'** यज्ञसाधनभूतं, **'तं'** पुरुषं, पशुत्वभावनया यूपे बध्नन् **'बर्हिषि'** मानसे यज्ञे, **'प्रौक्षन्'** प्रोक्षितवन्तः । कीदृशं **'अग्रतः'** सर्वसृष्टेः पूर्वं, **'पुरुषं जातं'** पुरुषत्वेनोत्पन्नम् । एतच्च पूर्वमेव उक्तम् । **तस्माद्विराडजायत विराजो अधिपूरुष** इति । **'तेन'** पुरुषरूपेण पशुना, **'देवाः' 'अयजन्त'** मानसयागं निष्पादितवन्तः । के ते देवाः इति त एवोच्यन्ते । **'साध्याः'** सृष्टिसाधनयोग्याः, प्रजापतिप्राणरूपाः तदनुकूलाः, **'ऋषयः'** मन्त्रद्रष्टारश्च, **'ये'**, सन्ति ते सर्वेपि **'अयजन्त'** ।। ८ ।।

भ.भा. - तदानीमेव **पुरुषं** प्रजापतिं अग्रे सर्वविकाराणां मुखे बन्धनानन्तरं पुरुषं **जातं** विराट्संज्ञकं पुरुषरूपेण जातं **यज्ञं** यज्ञसाधनम् । करणे नञ्प्रत्ययः । **बर्हिषि** यज्ञे यज्ञार्थं **प्रौक्षन्** प्रोक्षणमिव मनसा कृतवन्तः । कथमन्यो नियुज्यते अन्यः प्रोक्ष्यते इति चेत् - न, अभेदात् । अथ **तेन** विराजा पुरुषेण **देवाः** प्राणाः **अयजन्त** यज्ञो वर्तत इति मनसा सङ्कल्पमकुर्वत । केचिदाहुः - **अग्रतो जातं यज्ञं** यज्ञात्मानं पुरुषं यज्ञे पशुत्वेन प्रौक्षन् इति । यथोक्तं - **'यज्ञेन यज्ञमयजन्त देवाः'** इति । साध्याश्च ऋषयश्च द्विप्रकारा अपि देवा अयजन्त । **'चवायोगे प्रथमा'** (पा.सू.८-१-५९) इति निघाताभावः । साधयन्तीति **साध्याः** प्राणाः । **'कृत्यल्युटो बहुलम्'** (पा.सू.३-३-११३) इति कर्तरि **'अचो यत्'** (पा.सू.३-१-९७) इति ण्यन्ताद्यत्, उदात्तनिवृत्तिस्वरेण यत उदात्तत्वम् । **ऋषयः** द्रष्टारः इन्द्रियाणि । द्वयेऽपि देवनशीलाः देवा इत्युच्यन्ते ।। ८ ।।

रं.भा. - तं यज्ञं देवाः कुर्वन्ति इत्याह **तं यज्ञ**मिति । **तं यज्ञं बर्हिषि प्रौक्षन्** । अयं यज्ञशब्दो यज्ञसाधकवचनः यजनीयहविःपरः । **बर्हिश्शब्दो** बृंहणयोगिनि वर्तमानः । योगरत्ने, **'विराट् प्रकृतिः बर्हिरिति समाननामानि'** इति । **तमग्रतो जातं** यष्टव्यं **बर्हिषि** प्रकृतौ निधाय **साध्या** देवाः **प्रौक्षन्** । प्रोक्षणादिसंस्कारं कृत्वा ब्रह्माख्यं तत्पशुं बृंहणयोगिन्यां मूलप्रकृतौ देवाः प्रक्षिप्तवन्तः । जगदुपादानभूतया प्रकृत्या जगत्स्र ब्रह्माणं तदिन्द्रियाणि समयोजयन् इत्यर्थः । **तेन देवा अयजन्त साध्याः** । तेन

प्रकृतियुक्तेन ब्रह्माख्येन संस्कृतेन पशुहविषा **साध्या देवाः** कर्मसाधकानि वागिन्द्रियाणि सृष्टियज्ञम् अकुर्वत - अनिरुद्धाग्नौ प्रक्षिप्तवन्तः । **ऋषयश्च ये -** ज्ञानसाधनानि चक्षुरादि इन्द्रियाणि । तानि च सृष्टियज्ञम् अकुर्वत । तदुद्भावो वक्ष्यते ।

अथवा अस्य पुरुषमेधाख्यस्य मोक्षहेतुत्वात् मुमुक्षवो ये ऋषयः, तेऽपि एवमेव अयजन्तेति । आह च रत्नग्रन्थे – (योगरत्ने)

'ये मुमुक्षवः अब्भक्षा वायुभक्षा जीर्णपर्णाशना वाग्यताः प्रणवाभ्यासनिरताः सर्वभूतहिते रताः बहिष्कृतसर्वकामाः परमशान्ता जितेन्द्रियाः विरक्ताः परमात्मनि गोविन्दे सदा सन्निहितमानसा वसुरण्यमन्त्रम् उच्चारयन्त आत्मानं तेजोमयमग्नौ परमात्मनि जुह्वति, तेऽपि विमुक्ता भवन्ति । एवं जीवात्मपरमात्मनोः योगाख्यो मोक्ष इत्युक्त इति विजानीयात् । एतज्ज्ञानमात्रादेव अचिरान्मोक्षः सिद्ध इति विजानीयात्' इति ।

प्रसङ्गात् वसुरण्य इति मन्त्रार्थ उच्यते । हे प्रत्यगात्मन्! **वसु** सर्वेषां वासयिताऽसि । सर्वेषां धनमिव असीति । **रण्यः** । **'रण भाषणे च शब्दे च'** (धा.पा.?) । सर्वैः कीर्तनीयश्चासि । **विभुरसि** सङ्कल्पमात्रेण विविधं भावयिताऽसि । **प्राणे त्वमसि संधाता** । प्राणे वसन् सर्वस्य अनुसंधाताऽसि । **ब्रह्मन् त्वमसि विश्वसृक्** त्वमेवं विश्वस्रष्टा चासि । **तेजोदास्त्वमस्यग्ने** । त्वमेवाग्नौ तेजोदाश्चासि । **वर्चोदास्त्वमसि सूर्यस्य** । त्वमेव वर्चोदा असि । **वर्चो** दीप्तिः । **द्युम्नोदास्त्वमसि चन्द्रमसः** । त्वमेव द्युम्नोदा असि । **द्युम्न**शब्दो दीप्तिपरः । गीयते हि –

'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम् ।' (भ.गी.१५-१२)

उपयामगृहीतोऽसि । उपयच्छति उत्युपयामः तेन गृहीतः । हविषः अस्कन्नताहेतुभूतं मृदादिः उपयामः । तेन गृहीतोऽसि । **ब्रह्मणे त्वा महसे** । महते ब्रह्मणे त्वाम् (समर्पयामि) **ओमित्यात्मानम्** उपहारं आत्माग्नौ **युञ्जीत** (महा.ना.उ.६३-७९) । स एव जीवात्मपरमात्मयोग इति ।। ८ ।।

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः । संभृ॑तं पृषदा॒ज्यम् ।
प॒शूँस्ताँश्च॑क्रे वाय॒व्यान्॑ । आ॒र॒ण्यान् ग्रा॒म्याश्च॒ ये ।। ९ ।।

सा.भा. - 'तस्माद्यज्ञात् सर्वहुत - ग्राम्याश्च ये' इति । **'सर्वहुतः'** सर्वात्मकः पुरुषो यस्मिन् यज्ञे हूयते सोऽयं सर्वहुतः तादृशात्, पूर्वोक्तात् मानसात् **'यज्ञात्'**,

'पृषदाज्यं', **'सम्भृतं'** सम्पादितं, दधि चाज्यं चेत्येवमादिभोग्यजातं सम्पादितमित्यर्थः । तथा **'वायव्यान्'** वायुदेवताकान्, लोकप्रसिद्धान्, **'आरण्यान्'**, **'पशून्'**, **'चक्रे'** उत्पादितवान् । आरण्याः द्विखुरादयः तथा ये **'ग्राम्याः'** गवाश्वादयः, तानप्युत्पादितवान् । पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं मन्त्रान्तरव्याख्याने समाम्नातम् । **'वायवस्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षाः । अन्तरिक्षदेवत्याः खलु वै पशवः । वायव एवैनान् परिददाति'** (तै.ब्रा.३-२-१) इति ।। ९ ।।

भ.भा. - एवं यज्ञं निर्वर्तितवन्तः, अथ **तस्माद्यज्ञात् सर्वहुतः** सर्वात्मा पुरुषः पशुत्वेन हूयते अस्मिन्निति सर्वहुत् । अधिकरणे क्विप् **सम्भृतं** समुत्पन्नं **पृषदाज्यं** पृषत् विचित्रं आज्यं पश्वादिभावेन पानीयं पृषदाज्यं अपां परिणामात्माद्रव्यविशेषः । पशव्यः आज्यस्यैव अवस्थाविशेष इत्येके । अथ तत्पृषदाज्यं **पशूंश्चक्रे** प्राणेन्द्रियसमष्टिरूपः प्रजापतिः, **वायव्यान्** वायुदेवत्यान् वायव्यग्रहणं तिर्यगर्थं तद्देवत्यत्वात्तेषाम् । **ये आरण्याः** ये च **ग्राम्या**स्तान् सर्वांश्चक्रे ।। ९ ।।

रं.भा. - प्रकृतमनुसरामः । **तस्माद्यज्ञात् सर्वहुत** इति । सर्वं जुहोति त्यजतीति - अङ्गयागो न भवतीति गार्ग्यायणाः - **सर्वहुत्** पशुः । सर्वहुतो यज्ञाख्यात् ब्रह्मणः पृष्टदाज्यं संभृतमभूत् । **पृष्टदाज्यं** याज्ञिका दधिमिश्राज्यं प्रचक्षते । अत्र तु सृज्यप्राणिजननहेतुभूतं वीर्यं **पृषदाज्यं** भवतीति प्रोच्यते । तद्यथा चित्ररूपं भवति, एवमेव पशुनी (पशोःनी) लादि विचित्रभूतं वस्तु **जातं** भूतमित्यर्थः । **पशूँस्ताँश्चक्रे वायव्यान्** । वायुशब्देन वायुमताऽन्तरिक्षेण गतिर्लक्ष्यते । वायव्यान् पशून् पुरुषश्चक्रे ससर्ज । **आरण्यान्** व्याघ्रादीन् । आरण्यशब्दः पशुविशेषणम् । **ग्राम्य**शब्दश्च । ग्राम्याश्च ये पशवः मार्जारादयः, वराहादयो वा, तान् चक्रे; वायव्या ये आरण्याः, तानपि चक्रे ।। ९ ।।

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः । ऋच॒ः सामा॑नि जज्ञिरे ।
छन्दाँ॑सि जज्ञि॒रे तस्मा॑त् । यजु॒स्तस्मा॑दजायत ॥ १० ॥

सा.भा. - **'तस्माद्यज्ञात् - यजुस्तस्मादजायत'** इति । **'छन्दांसि'** गायत्र्यादीनि । स्पष्टमन्यत् ।। १० ।।

भ.भा. - अथ तत् **तस्मात्** तादृशात् यज्ञात् **ऋचस्सामानि जज्ञिरे छन्दांसि** च सर्वाणि ऋगादिमया वेदाः जज्ञिरे । यजुश्च **तस्मादजायत** । जातावेकवचनम् ।। १० ।।

रं.भा. - तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे । ऋग्वेदः सामवेदश्च प्रादुरभूताम् । **छन्दाँसि जज्ञिरे तस्मात् ।** गायत्र्यादीनि अजायन्त । **यजुस्तस्मादजायत । यजुः** यजुर्वेदश्च ।। १० ।।

तस्मादश्वा अजायन्त । ये के चोभयादतः ॥
गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥ ११ ॥

सा.भा. - 'तस्मादश्वा अजायन्त - तस्माज्जाता अजावयः' इति । अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च ये केचिदूर्ध्वाधोभागयोः उभयोर्दन्तयुक्ताः सन्ति तेप्यश्ववत् **'अजायन्त'** । तथा **'गावः'**, अजाश्चावयश्च ते सर्वेऽप्युत्पन्नाः ।। ११ ।।

भ.भा. - पुनश्च पशुसृष्टिं प्रपञ्चयति - **तस्मादेवाश्वा अजायन्त । ये के च ये** केचित् **उभयादतः** उभयोः पार्श्वयोः दन्ताः येषां ते गर्दभादयश्च अजायन्त । **'छन्दसि च'** (पा.सू.५-४-१४२) इति दतृभावः, **'अन्येषामपि दृश्यते'** (पा.सू.६-३-१३७) इति दीर्घत्वम्, नुमभावश्छान्दसः । **गावश्च अजाश्च अवयश्च** तस्माज्जाताः ।। ११ ।।

रं.भा. - तस्मादश्वा अजायन्त । यज्ञसंबन्धिनः अश्वाः । **ये के चोभयादतः गावो ह जज्ञिरे तस्मात् ।** अधरोत्तरभागयोः उभयोः दन्ताः येषाम्, ते रासभादयः । ते च गावश्च जज्ञिरे । **तस्मात् जाता अजावयः ।** अजाश्चावयश्च जज्ञिरे । केचित्तु विशब्दो बहुवचनान्त इति कृत्वा मन्यन्ते (मृगाः पक्षिणश्च जाता इति व्याकुर्वते) ।। ११ ।।

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ १२ ॥

सा.भा. - 'यत् पुरषं - कावूरू पादावुच्येते' इति । प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुमत्र ब्रह्मवादिनां प्रश्ना उच्यन्ते । प्रजापतेः प्राणरूपा देवाः **'यत्'** यदा, **'पुरुषं'** विराड्रूपं, **'व्यदधुः'** सङ्कल्पेनोत्पादितवन्तः । तदानीं **'कतिधा'** कतिभिः प्रकारैः, **'व्यकल्पयन्'** विविधं कल्पितवन्तः । एष सामान्यरूपः प्रश्नः । मुखं किमित्यादयो विशेषप्रश्नाः ।। १२ ।।

यदित्यादि ।। यदा **पुरुषं** विराजं **व्यदधुः** प्राणादयः कल्पितवन्तः, तदा **कतिधा** कतिभिः प्रकारैः विशिष्टं **व्यकल्पयन्**, कानि चास्य मुखादीन्युच्यन्ते ।। १२ ।।

रं.भा. - पुरुषस्य मुखाद्यवयवप्रकारान् पृच्छति **यत् पुरुषं व्यदधुः** । यदा पुरुष संज्ञं पशुत्वेन देवाः व्यदधुः, तदा **कतिधा व्यकल्पयन्** । किंप्रकारं मुखाद्यवयवं

कल्पितवन्त इत्यर्थः । प्रश्नार्थं व्यनक्ति **मुखं किमस्य** - मुखात् किमिति वक्तव्ये मुखम् इत्यादिप्रथमानिर्देशः कार्यकारणयोः अभेदविवक्षया । **कावूरू पादावुच्येते** । अस्य पुरुषस्य किंप्रकारं मुखम् । उत्पाद्यमानेषु ब्राह्मणादिषु वर्णेषु अस्य मुखं किमासीत् । बाहू च किंप्रकारौ । कावूरू आस्ताम् । कौ च पादावुच्येते ।। १२ ।।

ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्याँशूद्रो अजायत ॥ १३ ॥

सा.भा. - 'ब्राह्मणोस्य - अजायत' इति । योऽयं ब्राह्मणजातिविशिष्टः पुरुषः सोऽयं **'अस्य'** प्रजापतेः, **'मुखमासीत्'**, मुखादुत्पन्न इत्यर्थः । योऽयं **'राजन्यः'** क्षत्रियजातिः, स बाहुत्वेन निष्पादितः, बाहुभ्यामुत्पादित इत्यर्थः । **'तत्'** तदानीं, यौ प्रजापतेः **'ऊरू'**, तद्रूपः **'वैश्यः'**, सम्पन्नः ऊरुभ्यामुत्पन्न इत्यर्थः । तथा **'पद्भ्यां शूद्रः'**, उत्पन्नः । इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः तैत्तरीयसंहितायां सप्तमकाण्डे **स मुखतस्त्रिवृतं निरमिमीत** (तै.सं.७-१-१-४) इत्यादौ विस्पष्टमाम्नाता । अतः प्रश्नोत्तरे उभे अपि तत्परत्वेनैव योजनीये ।। १३ ।।

रं.भा. - परिहरति **ब्राह्मणोऽस्य मुखमासीत्** । ब्राह्मणजातिः अजायत । अनेन ब्राह्मणजातिकारणभावो मुखस्य प्रकार उक्तः । एवम् उत्तरत्रापि दृष्टव्यम् । **बाहू राजन्यः कृतः** । बाहुभ्यां क्षत्रियजातिः अकारीत्यर्थः । **ऊरू तस्य यद् वैश्यः** । यद्वैश्यनामा जातिर्भवति, तदस्य पुरुषस्य ऊरुभ्याम् अजायत इत्यर्थः । यत्तदोः सामान्यवचनत्वात् नपुंसकनिर्देशः । मुखादीनां ब्राह्मणादिभिः अभेदवादः कार्यकारणभावकृतः । ब्राह्मणं प्रकृत्य **मनुः -**

'तं हि स्वयंभूः स्वकादास्यात् तपस्तप्त्वाऽऽदितोऽसृजम्' ।
हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये' ।। (म.स्मृ.१-९४) इति । तथा मनुः -

'लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत्' ।। इति । (म.स्मृ.१-३१)

पद्भ्याँ शूद्रो अजायत । निसर्गसिद्धः शूद्रवर्णः ।। १३ ।।

चन्द्रमा मनसो जातः । चक्षोस्सूर्यों अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥ १४ ॥

सा.भा. - 'चन्द्रमा मनसो जातः - प्राणाद्वायुरजायत' इति । यथा दध्याज्यादिद्रव्याणि गवादिपशवः ऋगादिवेदाः ब्राह्मणादिमनुष्याश्च तस्मादुत्पन्नाः, एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्नाः । **'चक्षोः'** चक्षुषः ।। १४ ।।

रं.भा. - अथ यष्टव्यानां देवतानां सृष्टिमाह- **चन्द्रमा मनसो जातः** । सकार(रा) भावश्छान्दसः **चक्षोस्सूर्यो अजायत । चक्षु**र्भ्यामिति विभक्तिव्यत्ययं करोति । **मुखादिन्द्रश्चाग्निश्च** । अजायेताम् इति संबन्धः । **प्राणाद्वायुरजायत** । सिद्धोऽर्थः ।। १४ ।।

नाभ्या आसीदन्तरिक्षम् । शीष्णों द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाँ अकल्पयन् ॥ १५ ॥

सा.भा. - 'नाभ्या आसीदन्तरिक्षं - अकल्पयन्' इति । यथा देवास्तस्मादुत्पन्नाः । तथा लोकानप्यन्तरिक्षादीन् प्रजापतेः नाभ्याद्यवयवात् **'अकल्पयन्'** उत्पादितवन्तः ।। १५ ।।

भ.भा. - उत्तरं - **ब्राह्मणोऽस्येत्यादि ।।** ब्राह्मणादीनां मुखादिभ्य उत्पन्नत्वात् तत्तद्भावेन ते कल्पिताः । **'पद्भ्यां शूद्रो अजायत'** इति दर्शनात् सर्वेऽपि ब्राह्मणादयो मुखादिभ्य उत्पन्ना इति गम्यते । **चक्षोरिति ।** वर्णलोपश्छान्दसः । चष्टेर्वा उप्रत्ययः । **मुखात्** आस्यात् । तथा सर्वान् **लोकान् अकल्पयन् । 'दीर्घादटि समानपादे'** (पा.सू.८-३-९) इति रुत्वम् ।। (१३-१५)

रं.भा. - अनुष्ठितयज्ञानां ब्राह्मणादीनाम् उपभोगाय लोकानां सृष्टिमाह **नाभ्या आसीदन्तरिक्षम् । शीष्णों द्यौः समवर्तत । पद्भ्यां भूमि**रिति । **समवर्तत** इत्यनुषङ्गः । **दिशः श्रोत्रात्** समवर्तन्त । **तथा लोकाँ अकल्पयन् । तथा,** यथा अतीते कल्पे देवा अकल्पयन् ।

'सूर्याचन्द्रमसौ धाता यथापूर्वकमल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो सुवः' ।। इति । (महा.ना.उ.१-९)
'नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः' ।। इति ।। १५ ।। (वि.पु.१-५-६३)

[१]वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु [२]पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्
यदास्ते ॥ १६ ॥

प्रतिपदार्थः - सर्वाणि - देवमनुष्यादि, **रूपाणि** - शरीराणि, **विचित्य**, - सृष्ट्वा, **नामानि** - देव, मनुष्य, पशु, पक्षी इत्यादि, **कृत्वा** - नामानिकृत्वा, **अभिवदन्** - स्वयमेव तद्रूपेण परिनमित्वा, **यत्** - यस्मिन्, **धीरः** धीरपुरुषः, **आस्ते** - अवसन्, **महान्तं** - उत्कृष्टं, **आदित्यवर्णं** - सूर्यवत् कान्तियुतं, **तमसस्तु** - अज्ञानस्य **पारे** - बहिर्भूतं, **एतं पुरुषं** - भगवन्तं महापुरुषं, **अहं** - जीवः, **वेद** - वेद्मि ।।

तात्पर्यम् - अत्र मन्त्रद्रष्टा स्वकीयं ध्यानानुभवं प्रकटयति - एतं पुरुषं - विराजं महान्तं - सर्वगुणोपेतं आदित्यवर्णं - आदित्यवत् प्रकाशमानं वेदाहं - जानामि सर्वदाऽनुभवामि स च पुरुषः तमसः पारे - अज्ञानात् परस्तात् वर्तते । तस्मात् गुरुमुख शास्त्रोपदेशरहितैः मूढैः अनुभवितुं न शक्य इत्यर्थः । धीरः - पुरुषोत्तमः सर्वाणि - पदार्थाणि तन्नामानि च सृष्ट्वा अभिवदन् आस्ते - तैः अभिमुख्येन अस्तीत्यर्थः ।।

सा.भा. - 'वेदाहमेतं - यदास्ते' इति । यथोक्तविराट्पुरुषध्यानमत्र प्रतिपाद्यते । तत्र मन्त्रद्रष्टा स्वकीयं ध्यानानुभवं प्रकटयति । **'यत्'** यः पुरुषः, **'सर्वाणि रूपाणि'** देवमनुष्यशरीराणि, **'विचित्य'** विशेषेण निष्पाद्य, **'नामानि'** च देवोऽयं पशुः अयमित्यादीनि, **'कृत्वा', अभिवदन्** तैर्नामभिरभितो व्यवहरन्, **'आस्ते', 'एतं' 'पुरुषं' विराजं, 'महान्तं'** सर्वगुणैरधिकं, **'आदित्यवर्णं'** आदित्यवत् प्रकाशमानं, **'वेद' 'अहं',** जानामि, ध्यानेन सर्वदा अनुभवामी इत्यर्थः । स च पुरुषः **'तमसः पारे'** अज्ञानात्परस्ताद्वर्त्तते । अतोगुरुशास्त्रोपदेशरहितैः मूढैः अनुभवितुमशक्य इत्यर्थः ।। १६ ।।

भ.भा. - वेदेत्यादयः तिस्रस्त्रिष्टुभः ।। **एतं महान्तं पुरुषं** सहस्रशिरसं **अहं वेद** जानामि **आदित्यवर्णं** प्रकाशात्मानं तदेव तमसः पारे स्थितं त्रिगुणा प्रकृतिः तमः तस्य

---

१. तैत्तिरीयारण्यके द्वे ऋचौ पुरुषसूक्ते अधिके वर्तेते । तयोः प्रतिपदार्थः तात्पर्यार्थश्च -

२. तथा चोक्तं पाद्मोत्तरखण्डे सप्तविंशोत्तर शततमेऽध्याये- असंख्यप्रकृतेः स्थानं निबिडध्वान्तमव्ययम् । ऊर्ध्वं तु सीम्नि विरजा निःसीमाऽधः सनातनी ।।
प्रधानपरमव्योम्नोरन्तरे विरजानदी । वेदाङ्गस्वेदजनिततोयैः प्रस्नविता शुभा ।।
तस्याः पारे परे व्योम्नि त्रिपाद्भूतिः सनातनी । (प.पु.उ.ख.१२७)

पारं वेलां अतीत्य परत्रावस्थितं अहं वेद । स देवः **सर्वाणि रूपाणि** विकारलक्षणानर्थान् **विचित्य** पृथक्त्वेन उत्पाद्य **नामानि** च सर्वाणि **कृत्वा धीरः** धीमान् व्याकृतनामरूपः कृतकृत्यो **यदा अभिवदन्** आभिमुख्येन वदन् विश्वमनुगृह्णन् **आस्ते** तदा सर्वदा एवमेव सृष्टिर्वेदितव्येति ।। १६ ।।

रं.भा. - एवं सृष्टियज्ञं समाप्य पुनरपि त्रिपादं महान्तं पुरुषं कः साक्षाज्ज्ञानातीति प्रश्नमुखेन स्तोतुमारभते । ब्रह्मादिस्तम्बपर्यन्तस्य जगतः परमकारणं पुरुषं प्रति पुरुषसूक्तरूपं को वेत्ति? तत्राह **वेदाहमेत**मिति । सहस्रशीर्षेमि (र्षा इ) त्युक्तम् **एतं महान्तं पुरुषमहं वेद** जानामि । नान्यः कश्चित् **वेद** वेत्तीति वेदानाम् आत्मनो वचनम् अस्य सूक्तस्य ऋषेः नारायणस्य वाक्यं वा । किंस्वरूपम्? **आदित्यवर्णम्** । **'आदित्यवर्णं पुरुषं वासुदेवं विचिन्तयेत्'** इति मोक्षधर्मे । क्वावस्थितं वेत्ति? (त्सि)? **तमसस्तु पारे** । **तमश्शब्देन** प्रकृतिरुच्यते । प्रकृतेः परस्तात् स्थितं वेत्ति । तमसः परमो धाता इत्यस्ति । कियांश्चायम्? महान् पुरुषः (कदा?) । **सर्वाणि रूपाणि विचित्य धीरः** । सृष्टानां चराचरात्मकानि रूपाणि **विचित्य** समुत्पाद्य, अथवा वैविध्येन च बुध्वा तेषां **नामानि** च **कृत्वा** तैः तान्यभिवदन् **धीरः** धिया रममाणः परमविद्वान् **अभिवदन्** तैस्तैर्नामभिः आभिमुख्येन वदन् **यदा आस्ते,** तदा तं पुरुषं वेत्ति । इतश्चाहं वेद्मि ।। १६ ।।

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
[1]तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥ १७ ॥

प्रतिपदार्थः - यं - परमात्मानं, **धाता** - ब्रह्मा, **पुरस्तात्** - प्रथमतः, **उदाजहार** - प्रकाशितवान्, **शक्रः** - इन्द्रः, **चतस्रः प्रदिशः** - सर्वासु दिक्षु, **प्रविद्वान्** - ज्ञातवान्, **तं** - महापुरुषं परमात्मानं, **एवं** - ब्रह्मेन्द्रयोः उपदेशरीत्या, **विद्वान्** - ज्ञाता जीवः, **इह** - अत्रैव, **अमृतः** - मुक्तिं, **भवति** - प्राप्नोति, **अयनाय** - मोक्षस्य, **अन्यः** - इमं प्रकारं विना, **पन्थाः** - मार्गान्तरं, **न विद्यते** - न प्राप्नोति ।।

---

१. इन्द्रियादीनि यो जयते स एव सोक्षं भवितुमर्हतीति उपनिषदि, गातायां च वर्णितम् -
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ।।
महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ।। (क.उ.३-१०-११)
इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ।।
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना । जहि शत्रुं महाबाहो कामरूपं दुरासदम् ।। (भ.गी.३-४२-४३)

तात्पर्यम् - प्रथमतः चतुर्मुखः भगवन्तं परमात्मानं परमपुरुषज्ञानं ज्ञातवान् । एवं इन्द्रः वामदेवादयश्च ज्ञातवन्तः । एवं सर्वासु दिक्षु बहवः विद्वांसः परमपुरुषज्ञानं प्राप्ताः । एवं यः विद्वान् जानाति सः मुक्तो भवति । मोक्ष प्राप्तये अन्यत् मार्गान्तरं नास्त्येव ।।

सा.भा. - 'धाता - अयनाय विद्यते' इति । **'धाता'** प्रजापतिः, **'यं'** विराट्पुरुषं, **'उदाजहार'** ध्यातॄणामुपकारार्थं प्रख्यापितवान् । **'चतस्रः प्रदिशः'** चतुर्दिक्षुवर्तिनः सर्वान् प्राणिनः, **'प्रविद्वान्'** प्रकर्षेण जानन्, **'शक्रः'** इन्द्रः, तदनुग्रहार्थं प्रख्यापितवान् । धातुरिन्द्रस्योपदेशात् **'तं'** विराट्पुरुषं **'एवं'** उक्तप्रकारेण, **'विद्वान्'** साक्षात् कुर्वन्, **'इह'** अस्मिन्नेव जन्मनि, **'अमृतः'** मरणरहितः, **'भवति'** । यदा विराट्पुरुषोहमिति साक्षात् करोति तदानीं वर्त्तमानदेहस्य तत्स्वरूपत्वाभावात् तन्मरणेन अयमुपासको न म्रियते **'अयनाय'** अमृतत्वप्राप्तये, **'अन्यः पन्थाः'** यथोक्तविराट्पुरुषसाक्षात्कारमन्तरेणान्यो मार्गः, **'न विद्यते'** । न हि कर्मसहस्रैरपि अमृतत्वं सम्पादयितुं शक्यते । **न कर्मणा न प्रजया धनेन** (महा.ना.उ.१०-१४) इत्यादि शास्त्रात् ।। १७ ।।

भ.भा. - धातेत्यादि ।। यं यथोक्तमहिमानं पुरुषं **धाता** पितामहः **उदाजहार** ख्यापितवान् तद्विभूतित्वाद्धातुः । **शक्रश्च यमुदाजहार प्रविद्वान्** प्रकर्षेण जानन् **प्रदिशः** प्रधानदिशः **चतस्रः** तद्वासिनस्सर्वान् प्रविद्वान् । **तं** महापुरुषं **एवं** एवंप्रकारं **विद्वान् इह** लोके यः कश्चिदपि **अमृतो भवति ।** न त्वेतज्ज्ञानादृते **अन्यः पन्था विद्यते अयनाय** गमनाय संसारमुक्त्वा अपवर्गं गन्तुं अयमेव मार्ग इति ।। १७ ।।

रं.भा. - कोऽसौ एवंविधः पुरुषः? क्वायमास्ते? विशदं ब्रूहि (इति) चेत् अहमपि अविप्रकर्षेण जानामि; न वेद्मीत्याह **धाता पुरस्ताद्यमुदाजहारे**ति । पूर्वस्मिन् काले चतुर्मुखो यम् आत्मनः कारणभूतम् उदाजहार - **'तमब्रवीत् त्वं पूर्वं समभूः । त्वमिदं पूर्वः कुरुष्व'** (तै.आ.१-२३-९३) इत्यादिषु उदाहृतवान् । तथा **शक्रः प्रविद्वान्** प्रकृष्टज्ञानः शक्रः विग्रहवति वासुदेवेऽधिगतपुरुषोत्तमत्वज्ञानः इन्द्रो यं परमकारणत्वेन उदाहृतवान् इन्द्रप्रतर्दनसंवादे - **'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम'** (कौ.उ.३-१) इत्यादौ श्रुतौ । तथा **प्रदिशश्चतस्रः** । प्रदिशश्च यमुदाजहुः । दिक्छब्देन दिग्वर्तिनो ज्ञानवन्त उच्यन्ते । दिगधीनाः पुरुषा उपलभन्ते । तथा **श्रीरामायणे विश्वामित्रवचनम्**,

'अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् ।

वसिष्ठोऽपि महातेजाः ये चेमे तपसि स्थिताः' ।। इति । (रा.बा.कां.१९-१४)

तत्रैव रावणवधानन्तरं रामं प्रति **ब्रह्मणो वाक्यम्** । यथाह –

'भवान्नारायणो देवः श्रीमान् चक्रायुधो विभुः ।

एकशृङ्गवराहस्त्वं भूतभव्यसपत्नजित् ।

अक्षरं ब्रह्म पारं त्वं मध्ये चान्ते च राघव ।

लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ।

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः' । (रा.यु.कां.११७-१३-१५)

अत्रैव लक्ष्मणं प्रति दशरथवाक्यम्, यथा –

'एतत्तदुक्तमव्यक्तमक्षरं ब्रह्म निर्मितम् ।

देवानां हृदयं सौम्यं गुह्यं रामः परंतपः' ।। (रा.यु.कां.२२-३२)

अत्रैव मन्दोदरीवाक्यम्, यथा –

'व्यक्तमेष महायोगी परमात्मा सनातनः ।

अनादिमध्यनिधनो महतः परमो महान् ।।

तमसः परमो धाता शङ्खचक्रगदाधरः ।

श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः' ।। इति । (रा.यु.कां.१११-११,१२,१३)

वेदोऽपि स्वकण्ठेन महान्तं पुरुषं वक्तुम् अशक्नुवन् तदीयानि चिह्नानि आह इत्यवगन्तव्यम् । **तमेवं विद्वानमृत इह भवति** । श्रुतिर्वदति । **तं** परमं पुरुषं **एवं** जगताम् आदिकारणं **विद्वान्** जानन् **अमृत इह भवति** इहैव जन्मनि अमृतो भवति । संसारबन्धान्मुक्तो भवति । **नान्यः पन्था अयनाय विद्यते । अयनाय** मोक्षाय एवंविधपुरुषज्ञानादन्यः पन्था न विद्यते ।

'अयनं निलये मार्गे मुक्तौ चापि प्रकथ्यते' निघण्टुः इति । इदं पुरुषसूक्तप्रतिपाद्यपुरुषज्ञानं मोक्षोपाय इति ।। १७ ।।

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः । तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाकं॑ महि॒मान॑स्सचन्ते । यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः ॥ १८ ॥

सा.भा. - 'यज्ञेन - सन्ति देवाः' इति । अत्र कृत्स्नानुवाकतात्पर्यं सङ्क्षिप्योपन्यस्यति । **'देवाः'** प्रजापतिप्राणरूपाः, **'यज्ञेन'** यथोक्तेन मानसेन सङ्कल्पेन,

'यज्ञं' यथोक्तयज्ञस्वरूपं प्रजापतिं, **'अयजन्त'** पूजितवन्तः, तस्मात् पूजनात् **'तानि'** प्रसिद्धानि, **'धर्माणि'** जगद्रूपविकाराणां धारकाणि, **'प्रथमानि'** मुख्यानि भूतानि **'आसन्'**, एतावता सृष्टिप्रतिपादकोनुवाकभागार्थः सङ्गृहीतः । अथोपासनतत्फलरूपोनुवाकभागार्थः सङ्गृह्यते, **'यत्र'** यस्मिन् विराट्प्राप्तिरूपे, नाके, **'पूर्वे साध्याः'** पुरातना विराडुपास्ति-साधकाः, **'देवाः'**, **'सन्ति'** तदुपासकाः तिष्ठन्ति । तं **नाकं** विराट्प्राप्तिरूपं स्वर्गं **ते** महिमानः महात्मानः, **'सचन्ते'** समयन्ति प्राप्नुवन्ति इति ।। १८ ।।

।। कृष्णयजुर्वेदीयस्य पुरुषसूक्तस्य सायणभाष्यं समाप्तम् ।।

भ.भा. - यज्ञेनेत्यादि ।। व्याख्याता । **यज्ञेन** यज्ञात्मना पुरुषेण **यज्ञं** प्रजापतिं **अयजन्त देवाः** प्राणाः इन्द्रियाणि च । ततः **तानि धर्माणि** लोकानां धारकाणि भूतानि **प्रथमानि** आद्यानि सर्वविकाराणां **आसन् । ते** च **महिमानो** महात्मानो **नाकं** सुखैकरूपं स्थानं गताः **यत्र पूर्वे देवाः साध्याः** साधकाः प्राणादयः अद्यापि **सन्ति** इति ।। १८ ।।

।। कृष्णयजुर्वेदीयस्य पुरुषसूक्तस्य भट्टभास्करभाष्यं समाप्तम् ।।

रं.भा. - उपक्रान्तं सृष्टियज्ञम् उपसंहरति **यज्ञेन यज्ञमयजन्त देवाः** । यज्ञसाधन-भूतचतुर्मुखाख्यपशुहविषा **यज्ञमयजन्त** सृष्टियज्ञम् अकुर्वत - धातुः अनुवादः- **देवाः** साध्याः देवाः तदिन्द्रियाणि वा । **तानि धर्माणि प्रथमान्यासन्** । सृष्टियजनाग्निदेवानां सर्गविषया व्यवहाराः **धर्माणि प्रथमानि** मुख्यानि लोकश्रेयस्साधनानि आसन् । मोक्षहेतुतया प्रधानभूता इत्यर्थः । **ते ह नाकं महिमानः सचन्ते** । **'मह पूजायाम्'** (धा.पा.७९) । मनिन्प्रत्ययः । पूजयन्तः - भगवन्तं नारायणम् अर्चयन्तः नाकं सचन्ते । **क**मिति सुखनाम। अकं दुःखम् । तत् यत्र नास्ति, त**न्नाकं** परमव्योम प्राप्तवन्तः । भगवच्चोदितो ब्रह्मा लोकसृष्टिं तदाराधनं बुद्ध्याऽनुष्ठि (ष्ठाय त) तो वैकुण्ठाख्यं परं पदं प्राप्तवान् । **असचन्त** प्राप्तवन्तः । बह्वृचपाठे अडागमाभावश्छान्दसः । तैत्तिरीयपाठे भूतार्थे । **'नाकोऽम्बरेऽपि च स्वर्गे परमव्योम्नि च स्थितः'** (निघण्टु) इति । **'एको विष्णुर्जगत्स्वामी वासुदेवः सनातनः'** इति श्रीवाराहेऽप्यस्ति । **यत्र पूर्वे साध्याः सन्ति देवाः । यत्र** नाके **पूर्वे** पूर्वस्मिन् **साध्या** नाम देवाः सूरयो वर्तन्ते ।। १८ ।।

श्रीशास्त्रे पुरुषसंहितायाम् -

'सहस्रशीर्षा इत्यत्र सहस्रोऽनन्तवाचकः ।
अनन्तयोजनं प्राह दशाङ्गुलवचस्त्विदम् ।।

अत्र प्रथमया विष्णोर्देशतो व्याप्तिरुच्यते ।
द्वितीययाऽस्य विष्णोश्च कालतो व्याप्तिरीरिता ।।
विष्णोर्मोक्षप्रदातृत्वकथनं च तृतीयया ।
एतावानितिमन्त्रेण वैभवं कथितं हरेः ।।
एतेनैव च मन्त्रेण चतुर्व्यूहोऽपि भाषितः ।
त्रिपादित्यनया प्रोक्तमनिरुद्धस्य वैभवम् ।।
तस्माद्विराडित्यनया पादनारायणाद्धरेः ।
प्रकृतेः पुरुषस्यापि समुत्पत्तिः प्रदर्शिता ।।
यत्पुरुषेणेत्यनया सृष्टियज्ञः समीरितः ।
सप्ते परिधयश्चापि समिधश्च समीरिताः ।।
तं यज्ञमिति मन्त्रेण सृष्टियज्ञः समीरितः ।
अनेनैव च मन्त्रेण मोक्षश्च समुदीरितः ।।
तस्मादिति च सप्तर्चा जगत्सृष्टिः समीरिता ।
वेदाहमिति मन्त्राभ्यां वैभवं कथितं हरेः ।।
यज्ञेनेत्युपसंहारः सृष्टेर्मोक्षस्य चेरितः ।
य एवं तु विजानाति स हि मुक्तो भवेदिति' ।।

तथा मुद्गलोपनिषदि पुरुषसूक्तस्य वैभवं विस्तरेण प्रतिपादितम् । सेयम् उपनिषदुच्यते वामदेव आङ्गिरसः स्वपूर्वप्रज्ञासमन्वारब्धः अत्रिपत्न्या अनसूयाया गर्भ एव शयानो ब्रह्म वेदयाञ्चक्रे । स हि गर्भं पुरो हित्वा ब्रह्मलोकम् उपचक्राम । मध्ये ध्यानम् उपनिषद्युवाच । भगवांस्तु गर्भपञ्जरमेव अभिनिविशमानो विज्ञानब्रह्म जानासितोपायः । अकस्मात् किञ्चिद्विगतासंगस्सर्वैः वन्द्यमानोऽध्वनः पारमुपगच्छसि । तदेतदिह आश्चर्यम्, यद् बालस्य गुरुम् अनुपेयुषोऽधिगन्तुश्च भगवतोऽकस्मात् विशब्दो ब्रह्मप्रत्ययः; विपरीतस्य विपरीतम् । **सोऽहं भगव उप त्वा सेदिवांश्च अस्मी**त्यादिभिः चतुर्भिः खण्डैः इन्द्राय भगवान् ज्ञानमुपदिशन् पुनरपि सूक्ष्मश्रवणाय प्रणताय इन्द्राय परमरहस्यभूतं पुरुषसूक्तार्थं द्वाभ्यां खण्डाभ्याम् उपादिशत् । तौ खण्डौ उच्येते –

योऽयमुक्तः, स पुरुषो नामरूपज्ञानागोचरं संसारिणाम् अतिदुर्ज्ञानं वेषं विहाय क्लेशादिसंसृष्टान् देवादीन् उज्जिहीर्षुतया सहस्रावयवकल्याणं दृष्टिमात्रेण मोक्षदं वेषमाददे । तेन रूपेण भूम्यादिलोकजातं व्याप्य अनन्तयोजनम् अत्यतिष्ठत् । स पुरुषो नारायणो

भूतं भव्यं भविष्यञ्चासीत् । स एव सर्वेषां मोक्षदश्चासीत् । स च सर्वस्मात् महिम्नो ज्यायानासीत् । स च ज्यायान् महापुरुषः आत्मानं चतुर्धा कृत्वा त्रिपादेन परमव्योम्नि भासते; इतरेण चतुर्थेन अनिरुद्धेन नारायणाख्येन विश्वानि आसन् । स च पादनारायणो जगत् स्रष्टुं प्रकृतिम् अजनयत् । सा च प्रकृतिः ब्रह्माण्डभूता, यत्र स ब्रह्माणमजनयत् । स समृद्धकायस्सन् सृष्टिकर्म न जज्ञिवान् । सोऽनिरुद्धनारायणः तस्मै सृष्टिम् उपादिशत्, 'ब्रह्मन्! तवेन्द्रियाणि याजकानि ध्यात्वा जगत्कोशभूतं दृढग्रन्थिकळेबरं हविर्ध्यात्वा मां हविर्भुजं ध्यात्वा वसन्तमाज्यं ध्यात्वा ग्रीष्ममिध्मं ध्यात्वा शरदृतुं पुरोडाशं ध्यात्वा पृथिव्यप्तेजोवाय्वाकाशाहङ्कारबुद्धिं परिधिं ध्यात्वा पञ्चभूतानि तन्मात्राणि ज्ञानकर्मेन्द्रियाणि अन्तःकरणं चैकविंशतिं समिधं ध्यात्वा मय्येवाग्नौ त्वां योजय । मदङ्गस्पर्शनात् त्वत्कळेबरं बृंहिष्यति । ततः त्वत्कायात् सूक्ष्मसृष्टिहेतुभूतं पृषदाज्यं भविष्यति । सर्वाणि निबिडाः पश्वाद्याः प्रादुर्भविष्यन्ति । ततश्चराचरं जगद्भविष्यति । एतेन जीवात्मनो योगेन मोक्षप्रकारोऽपि कथ्यत इत्यनुसंधेयम् - इति प्रथमः ।

य इमं सृष्टियज्ञं जानाति मोक्षप्रकारञ्च, सर्वम् आयुरेति; अरोगश्च भवति; श्रीमांश्च भवति; पुत्रपौत्रादिसमृद्धो भवति । विद्वांश्च भवति । महापातकात् पूतो भवति । सर्वगमनात् पूतो भवति । कामक्रोधादिभिः अबाधो भवति । सर्वेभ्यः पापेभ्यः पूतो भवति । इहैव जन्मनि पुरुषो भवति । तमेवं पुरषसूक्तार्थम् अतिरहस्यं राजगुह्यं देवगुह्यं गुह्यादपि गुह्यतरं नादीक्षिताय उपदिशेत्; नाप्रियवादिने; नायज्ञशीलाय; नासंवत्सरवासिने; नासंतुष्टाय; नानधीतवेदाय । गुरुरप्येवम्भूतः शुचौ देशे पुण्ये नक्षत्रे प्राणानायम्य पुरुषं ध्यायन् उपसन्नाय शिष्याय दक्षिणे कर्णे सकृत् पुरुषसूक्तार्थमुपदिशेत् । न बहुशो वदेत् । यातयामो भवतीत्यसकृत्कर्णमुपदिशेत् । एवं कुर्वाणोऽध्येताऽध्यापकश्च इह जन्मनि पुरुषो भवति - इति द्वितीयः खण्डः ।।

क्षेमाय यः करुणया क्षितिनिर्जराणां भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो रामानुजः स मुनिराद्रियतां मदुक्तिम् ।।
येनोपनिषदां भाष्यं रामानुजमतानुगम् ।
रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम् ।।

।। कृष्णयजुर्वेदीयस्य पुरुषसूक्तस्य रंगरामानुजभाष्यं समाप्तम् ।।

सामवेदीयं पुरुषसूक्तम्

[सायणभाष्योपेतम्]

३ १ २   ३ १ २   ३ २ ३ १ २

सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।

१र २र ३ १ २ ३ १ २   ३ २

स भूमिँ सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।। १ ।।

सर्व-प्राणि-समष्टि-रूपो ब्रह्माण्ड-देहो विराडाख्यो यः पुरुषः सोऽयं **'सहस्रशीर्षाः'** सहस्रशब्दस्य उपलक्षणत्वात् । अनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयान्येवेति सहस्र-शीर्षत्वम् । एवं सहस्राक्षत्वं सहस्रपादत्वं च । स पुरुषो **'भूमिं'** ब्रह्माण्ड-गोलक-रूपां सर्वतः **'आ'** समन्तात् **'वृत्वा'**परिवेष्ट्य दशाङ्गुलपरिमितं देशम् **'अत्यतिष्ठत्'** अतिक्रम्य व्यवस्थितः । दशाङ्गुलम् इत्युपलक्षणम् । ब्रह्माण्डात् बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ।। १ ।।

३ २ ३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १ २

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।

२ ३ २ ३क २र   ३ २ ३ २

तथा विष्वङ् व्यक्रामदशनानशने अभि ।। २ ।।

योऽयं **'त्रिपात् पुरुषः'** संसारस्पर्शरहितः बहुलस्वरूपः सोऽयम् **'ऊर्ध्व उदैत्'** अस्मादज्ञान-कार्यात्संसारात् बहिर्भूतः सन् तत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान् । **'अस्य'** योऽयं **'पादः'** लेशः सोऽयमिह मायायां प्रादुरभवत् । सृष्टि-संहाराभ्यां **पुनः** पुनरागच्छदिति (अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तम्- **'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति' तथा** मायायामागत्यानन्तरं **'विष्वङ्'** देव-तिर्यगादि-रूपेण विविधः सन् **'व्यक्रामत्'** व्याप्तवान् । किं कृत्वा? **'अशनानशने' अभि**लक्ष्य अशनं भोजनादि-व्यवहारोपेतं चेतनं प्राणि-जातम्, अनशनं तद्रहितमचेतनं गिरि-नद्यादिकम् । तदुभयथा यथा स्यात्तथा । यमेव विविधो भूत्वा व्याप्तवानित्यर्थः ।। २ ।।

१ २ ३२उ ३ २ ३ २उ ३ १ २
पुरुष एवेदँ सर्वं यद्भूतंय्यच्च भाव्यम् ।
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ।। ३ ।।

यत् '**इदं**' वर्त्तमानं जगत् तत् '**सर्वं**' '**पुरुषएव**' । '**यद्भूतम्**' उत्पन्नं जगत् '**यच्च भाव्यं**' भविष्यज्जगत् तदपि पुरुष एव यथास्मिन् काले वर्त्तमानाः प्राणिनः सर्वेऽपि चराचरात्मकपुरुषस्यावयवाः तथैव गतागामिनोरपि कल्पयोर्द्रष्टव्यं इत्यभिप्रायः । एतदेवोभयं स्पष्टीक्रियते- '**अस्य**' पुरुषस्य '**सर्वाणि भूतानि**' काल-त्रय-वर्तीनि प्राणि-जातानि '**पादः**' चतुर्थोऽशः । '**अस्य**' पुरुषस्यावशिष्टं '**त्रिपात्**' स्वरूपम् '**अमृतं**' 'विनाश-रहितं' सत् '**दिवि**' द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेषः । यद्यपि '**सत्यं ज्ञानमनन्तं ब्रह्म**' - इत्यनन्तस्य परब्रह्मणो हीयदन्तत्वाभावात् पादचतुष्टयं निरूपयितुमशक्यं, तथापि जगदिदं ब्रह्म-स्वरूपापेक्षया अल्पमिति विवक्षिततत्वात् पादत्वोपचारः ।। ३ ।।

१ २ ३ १उ ३ १ २ ३ १ २
तावानस्य महिमा ततो ज्यायाँश्च पूरुषः ।
३ १ २ ३ १ २र ३ १र २र ३ १ २
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।। ४ ।।

अतीतानागतवर्तमान-रूप-जगदाद्याधारो योऽस्ति '**तावान्**' सर्वोऽपि '**अस्य**' पुरुषस्य '**महिमा**' स्वकीय-सामर्थ्य-विशेषः । न तु तस्य वास्तवं स्वरूपम् । वास्तवस्त '**पुरुषः**' '**ततः**' महिम्नोऽपि '**ज्यायान्**' अतिशयेनाधिक इत्यर्थः । '**उत**' अपिच '**अमृतत्वस्य**' देवत्वस्य '**अयम् ईशानः**' स्वमायया '**यत्**' यस्मात् कारणात् '**अन्नेन**' प्राणिनां भोग्येन अन्नेन निमित्तभूतेन '**अतिरोहति**' स्वकीयां काराणावस्थां अनतिक्रम्य परिदृश्यमानजगदवस्थां प्राप्नोति । तस्मात् प्राणिनां कर्म-फल-भोगाय जगदवस्थास्वीकारात् नेदन्तस्य वस्तु-तत्वमित्यर्थः ।। ४ ।।

१ २ ३ १ २ ३ २ ३ २ ३ १ २
ततो विराडजायत विराजो अधि पुरुषः ।
१ ३ १ २र ३ २उ ३ १ २ ३२
स जातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः ।। ५ ।।

'विष्वङ् व्यक्रामत्'– इति यदुक्तं तदेवात्र प्रपञ्च्यते– **'ततः'** तस्मात् आदि-पुरुषात् **'विराट्'** ब्रह्माण्ड-देहः **'अजायत'** उत्पन्नः । (विविधानि राजन्ते वस्तून्यत्रेति विराट्) **'विराजो अधि'** विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा **'पुरुषः'** तद्देहाभिमानी कश्चित् पुमानजायत । योऽयं सर्व-वेदान्त-वेद्यः परमात्मा स एव रूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् (एतच्चाथर्वणिक उत्तरतापनीये विस्पष्टमामनन्ति- **'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य अमूढो मूढ इव व्यवहरन्नास्ते माययैवेति'** । (नृ.उ.ता.२-१-९) **'स जातः'** विराट् पुरुषः **'अत्यरिच्यत'** अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देवतिर्य्यङ्मनुष्यादिरूपोऽभवत् । पश्चाद्देवादि-जीव-भावादूर्ध्वं भूमिं ससर्जेति शेषः । **'अथो'** भूमि-सृष्टेरनन्तरं तेषां जीवानां **'पुरः'** ससर्ज (पूर्य्यन्ते सप्तभिर्धातुभिरिति पुरः) शरीराणि ।। ५ ।।

१ २ ३ १ २र ३ २ ३ १ २ ३ १ २
[1]कयानश्चित्र आभुवदूती सदावृधः सखा ।
२ ३ १ २ ३ २
कया शचिष्ठया वृता ।। ६ ।।

प्रतिपदार्थः - कया - (कः) प्रजापतिः, **चित्रः** - चायनीयः, **सदावृधः** - सदा वर्धयिता, **सखा** - समानख्यानः, **नः** - अस्मान्, **ऊती** - रक्षणेन, **आभुवत्** - आभजतु, **कया** - कः, **शचिष्ठया** - शक्ततमया, **आवृता** - क्रियया (आभुवत्) ।।

तात्पर्यार्थः - सर्वदा वर्धमानः पूजार्हः मित्रभूतः हिरण्यगर्भरूपो भगवान् प्रज्ञया अनुष्ठीयमानेन कर्मणा सन्तुष्टः अस्मान् अभिमुखो भवतु ।।

सा.भा. - सदावृधः - सर्वदा वर्द्धमानः **चित्रः** - चायनीयः सखामित्रभूतः **कया** (कः) इन्द्रः **ऊती** - ऊत्या तर्पणेन **नः** - अस्मान् आभुवत् - आभिमुख्येन भवेत् **शचिष्ठया** - प्रज्ञावत्तमया प्रज्ञासहितमनुष्ठीयमानेन **कयावृता** केन वर्त्तनेन कर्मणा च अभिमुखोभवेत् ।।

।। सामवेदीयं पुरुषसूक्तस्य सायणभाष्यं समाप्तम् ।।

---

१. सामवेदे कौथुमशाखायां एकं ऋगन्तरं विद्यते । तस्य प्रतिपदार्थः, तात्पर्यार्थश्च

अथर्वणवेदीयं पुरुषसूक्तम्

[सायणभाष्योपेतम्]

'सहस्रबाहुः पुरुषः' इति सूक्तद्वयं पुरुषमेधे क्रतौ पुरुषपश्वनुमन्त्रणे विनियुक्तम् । **'पुरुषमेधोश्वमेधवच्चैत्र्याः पुरस्तात्'** इति प्रक्रम्य वैताने सूत्रितम् । **'स्नातम् अलंकृतम् उत्सृज्यमानं सहस्रबाहुः पुरुषः** (१९-६) **केन पार्ष्णी** (१०-२) **इत्यनुमन्त्रयते'** इति (वै.७-२) ।।

तथा एतस्य सूक्तद्वयस्य शनैश्चरग्रहदेवत्यहविराज्यहोमे समिदाधानोपस्थानयोश्च विनियोगः । **'अथाज्यभागान्ते विषासहिम्** (१७-१) **इत्यादित्याय हविषो हुत्वाज्यं जुहुयात् समिध आधायोपतिष्ठते'** इति प्रक्रम्य शान्तिकल्पे सूत्रितम् । **'सहस्रबाहुः पुरुषः** (१९-६) **केन पार्ष्णी** (१०-२) **प्राणाय नमः** (११-४) **इति शनैश्चराय'** इति (शां.क.१५) ।

सौवर्णभूमिदानेऽपि एतत् सूक्तद्वयम् आज्यहोमे विनियुक्तम् । **'अथ रोहिण्याम् उपोषितो ब्रह्मा'**(अ.प.१०-२)इति प्रक्रम्य परिशिष्टेऽभिहितम् । **'अन्वारभ्याथ जुहुयात् कामसूक्तं कालसूक्तं पुरुषसूक्तम् इत्यथ सुवर्णमयीं भूमिम् इत्यादि'** (अ.प.१०-१) ।

सर्वातिशायित्वसर्वभूतात्मकत्वकामेन नारायणाख्येन पुरुषेण अनुष्ठितस्य पुरुषमेधक्रतोः प्रतिपादकत्वात् जगत्कारणस्य आदिनारायणपुरुषस्य प्रतिपादकत्वाद् वा एतत् पुरुषसूक्तम् इति उच्यते । अतः अस्य सूक्तस्य द्विविधोऽर्थः आधियज्ञिक एकः आध्यात्मिकोपरः । पुरुषमेधविधायकं वाजसनेयकब्राह्मण एवम् आम्नायते । **'पुरुषो ह वै नारायणोकामयत । अतितिष्ठेयं सर्वाणि भूतानि अहमेवेदं सर्वं स्याम् इति । स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुम् अपश्यत् । तम् आहरत् । तेनायजत । तेनेष्ट्वात्यतिष्ठत् सर्वाणि भूतानि । इदं सर्वम् अभवत्'** इति (श.ब्रा.१३-६-१-१) ।

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम् ॥ १ ॥

पुरुषसंज्ञापेक्षितावरणस्थानीयो देहविशेषो यज्ञानुष्ठातुः नारायणपुरुषस्य रूप्यते । यथा परोक्षस्य अग्नेः प्रत्यक्षैः अग्निभिः स्तवः तद्वत् परोक्षस्य आदिपुरुषस्य लौकिकैः

सहस्रबाहुत्वं बह्वक्षिपादत्वं च उच्यते । **सहस्रबाहुः** सहस्रशब्दस्य उपलक्षणत्वात् अनन्तैर् बाहुभिर् युक्तः **सहस्राक्षः** बहुभिः अक्षिभिरुपेतः । **'बहुव्रीहौ सक्थ्यक्ष्णोः'** (पा.सू.५-४-११३) इति षच् समासान्तः । सति शिष्टः समासान्तः स्वरः प्रवर्तते । **सहस्रपात्** अनेकचरणः । **'संख्यासुपूर्वस्य'** (पा.सू.५-४-१४०) इति पादस्य लोपः समासान्तः । एवंरूपो यः **पुरुषः** यज्ञानुष्ठाता नारायणाख्यः पुरुषो वर्तते **स** पुरुषः **भूमिम्** सप्तसमुद्रद्वीपां **विश्वतः** सर्वतो **वृत्वा** महिम्ना व्याप्य **दशाङ्गुलम्** दशाङ्गुलिप्रमाणं यस्येति । **'आर्हीयस्य ठकः'** (पा.सू.५-४-८६) **'अध्यर्धपूर्वद्विगोः'** (पा.सू.५-२-२८) इति लुक् । **'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः'** (पा.सू.५-४-८६) इति अच् समासान्तः । अत्र दशाङ्गुलशब्देन हृदयाकाशम् उच्यते । तद् **अत्यतिष्ठत्** । पूर्वं हृदयाकाशे परिच्छिन्नस्वरूपः सन् स्वानुष्ठितक्रतुसामर्थ्यात् परिच्छिन्नाकारतां परित्यज्य सर्वातिशायिस्वरूपोऽभवद् इत्यर्थः । आध्यात्मपक्षे सर्वप्राणिसमष्टिरूपः सूत्रात्मा प्रतिपाद्यते । सहस्रबाहुः ये व्यष्टिभूतसर्वप्राणिनां बाहवस्ते सर्वे सूत्रात्मदेहान्तःपातित्वात् तदीया एवेति सहस्रबाहुत्वम् । एवम् अक्षिषु पादेष्वपि योजनीयम् । यद्वा सर्वत्र बाह्वादिसाध्यबहुकार्यसंभवात् तेषां सहस्रत्वव्यपदेशः । अत एव इमम् अर्थम् अभिप्रेत्य अन्यत्र आम्नायते । **'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्'** इति (ऋ.सं.१०-८-१-३)। पुरुषः पुरि देहे. शेत इति पुरुषः । पृषोदरादिः ।

सर्वप्राणिदेहावस्थितः पूर्णो वा सहस्राक्षः सहस्रपात् । एवंरूपो यो वर्तते स पुरुषः भूमिम् । उपलक्षणम् एतद् अबादीना भूतानाम् । सकलभूतकार्यब्रह्माण्डं तदन्तर्गतान् भूम्यादीन् विकारान् वा विश्वतः सर्वतो वृत्वा मृदिव घटादीन् व्याप्य दशाङ्गुलम् दशाङ्गुलिप्रमाणं देशम् अत्यतिष्ठत् अतिक्रम्य अवस्थितः । दशाङ्गुलम् इति उपलक्षणम् । ब्रह्माण्डाद् बहिरपि सर्वतो व्याप्य अवस्थितः । एकेनांशेन ब्रह्माण्डं व्याप्य दशभिरंशैः कार्यप्रपञ्चासंस्पृष्टः स्वप्रतिष्ठो वर्तत इत्यर्थः ।। १ ।।

त्रिभिः पुद्भिर्द्यामरोहुत् पादस्येहाभवत् पुनः ।
तथा व्य् क्रामुद् विष्वङ्शनानशुने अनु ॥ २ ॥

सोऽयं यज्ञानुष्ठाता नारायणपुरुषः **त्रिभिः पद्भिः** पादैः । **'पद्दन्नोमास् हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस् प्रभृतिषु'** । (पा.सू.६-१-६३) इत्यादिना पादशब्दस्य पद्भावः । **द्याम्** दिवं स्वर्गलोकम् **आरोहत्** आरूढवान् आक्रान्तवान् ।

(अस्य) पुरुषस्य **पादः** चतुर्थः इह भूलोके पुनर**भवत्** । **पुनः**पुनराविर्भवति प्रकाशते । पादचतुष्टयेन सर्वलोकव्याप्तिमेव दर्शयति । तथा तेन उक्तेन प्रकारेण **अशनानशने** अश्नातीति अशनम् । **'कृत्यल्युटो बहुलम्'** (पा.सू.३-३-११३) इति कर्तरि ल्युट् । अनशनम् अनश्नत् अशनानशने वस्तुनी **अनु** । **'लक्षणार्थे अनुः कर्मप्रवचनीयः'** । अशना मनुष्यतिर्यगादयः । अनशना देववृक्षादयः । तान् अभिलक्ष्य **विष्वङ्** सर्वतोञ्चनः विश्वव्यापनः **व्यक्रामत्** विक्रान्तवान् ।। अध्यात्मपक्षे सोऽयम् उदीरितस्वरूप आदिपुरुषः त्रिभिः पद्भिः पादैः अंशैः संसारस्पर्शरहितैः द्याम् दिवं द्योतनात्मकं स्वप्रकाशस्वरूपम् आरोहत् आरूढवान् आस्थितवान् । यद्यपि **'सत्यं ज्ञानम् अनन्तं ब्रह्म'** (तै.उ.२-१) इत्याम्नातस्य परब्रह्मणः इयत्ताया अभावाद् अंशचतुष्टयं न निरूपयितुं शक्यं तथापि जगद् इदं ब्रह्मस्वरूपापेक्षया अत्यल्पम् इति विवक्षितुं पादत्वोपन्यासः । स पुरुषः संसारस्पर्शरहितः ज्ञानबहुलस्वरूपो द्याम् आरोहत् अज्ञानकार्यात् संसाराद् बहिर्भूतः सन् अत्रत्यैः गुणदोषैर् अस्पृष्टः स्वस्वरूपे वर्तत इत्यर्थः । अस्य पुरुषस्य योऽयं पादः लेशश्चतुर्थः सोऽयं इह जगति पुनरभवत् सृष्टिसंहारभ्यां पुनःपुनराविर्भवति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तम् । **विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्** । इति (भ.गी.१०-४२) ।

तथा तेन प्रकारेण तुरीयेण पादेन स पुरुषो विष्वङ् विष्वगञ्चनः अशनानशने अनु स्थावरजङ्गमात्मकं जगद् अभिलक्ष्य व्यक्रामत् । अथ वा चेतनाचेतनात्मकम् उभयविधं जगद् यथा स्यात् तथा पुरुषः स्वयमेव द्विविधो भूत्वा व्याप्तवान् इति । यद्येकस्मिन् कल्पे एकस्य पादस्य जननमरणयुक्तसर्वभूतात्मकत्वं तर्हि कल्पान्तरेषु पादत्रयमध्ये एकैकस्य सर्वभूतात्मकत्वं संभवति । तथा च सति अंशचतुष्टयात्मकस्य परब्रह्मणः सर्वजगदात्मकत्वसंभवेन सांसारिकसुखदुःखादिद्वन्द्वसंस्पर्शो भविष्यति इत्येषा शङ्का अंशत्रयेण द्याम् आरोहत् इह पुनरभवत् इत्यनेन अपाक्रियते । तथा हि अंशत्रयात्मकं ब्रह्म सर्वदा स्वप्रतिष्ठं संसारस्पर्शरहितं सच्चित्सुखलक्षणं वर्तते । एकोंऽशस्तु पुनःपुनः जगदात्मना विवर्तत इति । यः पूर्वकल्पे जगदात्मा विवृत्तः स एव कल्पान्तरेऽपि सर्वभूतात्मना विवर्तते नान्योंऽश इति ।। २ ।।

तावन्तो अस्य महिमानस्ततो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

यद् इदं देवतिर्यङ्मनुष्यात्मकं जगद् यावद् अस्ति तावान् सर्वोऽपि **अस्य** यज्ञानुष्ठातुः पुरुषस्य महिमा महत् कर्म स्वकीयसामर्थ्यविशेषः । **तावन्तो महिमान**

इति पूजायां बहुवचनम् सृष्टिभेदापेक्षया वा । **ततो** महिम्नोऽपि महिमाधारः **पुरुषः ज्यायान्** प्रवृद्धः अतिशयितः । **अस्य पाद**श्चतुर्थः **विश्वा** विश्वानि **भूतानि** भवनवन्ति स्थावरजङ्गमात्मकानि । व्यावर्तत इति शेषः । **अस्य त्रिपात्** पादत्रयम् **अमृतम्** अमरणधर्मकं सत् (**दिवि**) द्युलोके स्वर्गलोके वर्तते । अध्यात्मपक्षे यद् इदं देवतिर्यङ्मनुष्यात्मकम् अतीतानागतवर्तमानम् अस्तिरूपं जगद् यावत् अस्ति तावान् सर्वोऽपि अस्य पुरुषस्य महिमा । इदं तु तस्य न वास्तवं स्वरूपम् । वास्तवस्तु पुरुषः । अतो महिम्नो यथोक्तात् मर्त्यामर्त्यलक्षणात् कार्यवर्गात ज्यायान् वृद्धतरः । 'वृद्धशब्दस्य ईयसुनि ज्यादेशः' । नैतावान् इति मन्तव्यं कथम् इत्यत आह । **विश्वा** विश्वानि **सर्वाणि भूतानि** भवनवन्ति कालत्रयवर्तीनि प्राण्यप्राणिजातानि अस्य पुरुषस्य पादः चतुर्थोऽशः । अस्य अवशिष्टं त्रिपात् अंशत्रयात्मकं स्वरूपम् अमृतम् अमरणधर्मकं विनाशरहितं सत् दिवि द्योतनात्मके स्वप्रकाशे स्वरूपे अवतिष्ठते । तुरीय एव पादो जननमरणयुक्तः । तथा च तैत्तिरीया उत्तरनारायणे समामनन्ति । **'अजायमानो बहुधा विजायत तस्य धीराः परिजानन्ति योनिम्'** इति (तै.आ.३-१३-१) । यद्यपि परब्रह्मणः परिच्छेदाभावाद् अंशचतुष्टयं न निर्देष्टुं शक्यं तथापि विश्वम् इदं ब्रह्मरूपापेक्षया अत्यल्पम् इति विवक्षित्वा पादत्वोपन्यासः । त्रिपादिति । त्रयः पादाः अस्य **'संख्यासुपूर्वस्य'** (पा.सू.५-४-१४०) इति लोपे **'द्वित्रिभ्यां पाद्दन्'** (पा.सू.६-२-१९७) इति उत्तरपदान्तोदात्तत्वम् ।। ३ ।।

पुरु॑ष ए॒वेदं सर्व॒ं यद् भू॒तं यच्च॒ भा॒व्य॑म् ।
उ॒ताम॑ृत॒त्वस्येश्व॑रो यद॒न्येना॒भव॑त् स॒ह ॥ ४ ॥

यद् भूतम् अतीतं जगत् **यच्च भव्यम्** भविष्यद् यदपि **इदं** प्रत्यक्षेण दृश्यमानं व्यक्तं स्थावरजङ्गमात्मकं वर्तमानं जगत् तत् **सर्वं पुरुष एव** । यथा अस्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि पुरुषस्य अवयवाः तथैव अतीतागामिनोः कल्पयोः इति द्रष्टव्यम् । अथ वा एतत् सर्वं पुरुष एव पुरुषस्यैवायं विवर्तः । **उत** अपि च अयं पुरुषः **अमृतत्वस्य** देवत्वस्यापि **ईश्वरः** स्वामी । देवानामपि ईश्वर इति यावत् । **यत्** किंचिद् भूतम् **अन्नेन** अदनीयेन भोग्येन **सहाभवत्** भवति तस्यापीश्वरः । अयोनिजानां देवानाम् अन्नरसपरिणामानां मर्त्यादीनां च ईश्वर इति यावत् । यज्ञानुष्ठातुः नारायणस्य यज्ञनिर्वर्त्यं सार्वात्म्यम् । जगत्कारणस्य सूत्रात्मनस्तु स्वाभाविकम् इति इयान् विशेषः । शिष्टं समानम् ।। ४ ।।

यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य किं बाहू किमूरू पादा उच्येते ॥ ५ ॥

'विराड् अग्रे समभवद् विराजो अधि पूरुषः' (९) इति पुरुष सृष्टिः आम्नास्यते । **'यत् पुरुषेण हविषा देवा यज्ञम् अतन्वत'** (१०) इति पुरुषेण साधनेन यज्ञसृष्टिश्च आम्नास्यते । तं पुरुषं निमित्तीकृत्य प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुम् अत्र ब्रह्मवादिनां प्रश्ना उच्यन्ते । **यत्** यदा **पुरुषम्** यज्ञं **व्यदधुः** विशेषेण अकुर्वन् साध्या नाम देवाः वसवश्च तदा तं पुरुषं **कतिधा** कतिभिः प्रकारैः **व्यकल्पयन्** विविधं कल्पितवन्तः । एष सामान्यरूपः प्रश्नः । **'इति च'** (पा.सू.१-१-२५) इति संख्यासंज्ञकात् कतिशब्दात् **'संख्याया विधार्थे धा'** (पा.सू.५-३-४२) इति धा प्रत्ययः । **मुखं किम्** इत्यादयो विशेषप्रश्नाः । **अस्य** यज्ञात्मनः पुरुषस्य किं वस्तु **मुखम्** आसीत् । **किं** वस्तु **बाहू** । **किं** वस्तु (**ऊरू** । किं वस्तु) **पादा उच्येते** । बाहूरुपादद्वयात्मना किं वस्तु कथ्यते । **'लोपः शाकल्यस्य'** (पा.सू.८-३-१९) इति वकारलोपः । किम् इति सामान्यरूपत्वाद् नपुंसकलिङ्गता एकवचनता च अध्यात्मपक्षे यत् यदा पुरुषम् वैराजं व्यदधुः मनःसंज्ञकप्रजापतेः विराजः प्राणरूपा देवाः संकल्पेन उत्पादितवन्तः तदानीं कतिधा व्यकल्पयन् इत्यादि पूर्वेण समानम् ।। ५ ।।

'ब्राह्मणोऽस्य मुखम् आसीद्' इति सूक्तस्य पुरुषमेधे उत्सृज्यमानपुरुषपशु अनुमन्त्रणे शनैश्चरग्रहदेवत्यहविराज्यहोमे च पूर्वसूक्तेन सह उक्तो विनियोगः ।

ब्राह्मणोस्य मुखमासीद् बाहू राजन्योभवत् ।
मध्यं तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥ ६ ॥

'कतिधा व्यकल्पयन्' इति सामान्यप्रश्नस्य **'चन्द्रमा मनसो जातः'** इत्यादिना उत्तरं भविष्यति । मुखादिविशेषप्रश्नानाम् उत्तरम् अनया उच्यते । **अस्य** यज्ञात्मनः पुरुषस्य **ब्राह्मणो मुखम् आसीत्** । ब्राह्मणजातिविशिष्टः पुरुषः अस्य मुखाद् उत्पन्न इत्यर्थः । योऽयं राजन्यः क्षत्रियजातिविशिष्टः पुरुषः (स तस्य यज्ञपुरुषस्य **बाहू** बाहुद्वयम् **अभवत्**) । (**यद् वैश्यः** वैश्यजातम्) इति यद् अस्ति (**तद् अस्य** यज्ञपुरुषस्य **मध्यम्** मध्याङ्गम् अभवत्) । मध्यभागाद् वैश्य उत्पन्न इत्यर्थः । **पद्भ्याम्** पादाभ्यां शूद्रः अजायत उत्पन्नः ।। इत्थं च मुखादिभ्यो ब्राह्मणादीनाम् उत्पत्तिं तैत्तिरीयाः समामनन्ति । **'स मुखतस्त्रिवृतं निरमिमीत । ब्राह्मणो मनुष्याणाम्'**

इति । **'उरसो बाहुभ्यां पञ्चदशं निरमिमीत । राजन्यो मनुष्याणाम्'** इति । **'मध्यतः सप्तदशं निरमिमीत । वैश्यो मनुष्याणाम्'** इति । तत्र **'अन्नधानाद्ध्यसृज्यन्त'** इति वाक्यशेषेण शरीरस्य मध्यभाग एव विवक्षितः । मध्यभागः ऊर्वोर् उपलक्षकः । अत एव प्रश्नः किम् ऊरु इति युज्यते । तत्रैव प्रश्ने **'एकविंशं निरमिमीत । शूद्रो मनुष्याणाम्'** (तै.सं.७-१-१-५) इति च । अतः प्रश्नोत्तरे उभे अपि तत्परत्वेन योजनीये । अध्यात्मपक्षेऽपि एषोऽर्थः समानः ।। ६ ।।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ॥ ७ ॥

अस्मिन् उत्तरस्मिन्नपि मन्त्रे उत्तरकथनेन तदनुसारिणः प्रश्ना ऊहनीयाः । अत एव कतिधा व्यकल्पयन्निति सामान्यप्रश्नो ब्रह्मवादिभिः कृतः । यज्ञात्मनः पुरुषस्य **मनसः** सकाशात् **चन्द्रमाः** (चन्द्रम् आ) ह्लादं माति निर्मिमीत इति चन्द्रमाः सोमो **जातः** । **'चन्द्रमा मनो भूत्वा हृदयं प्राविशत्'** (ऐ.आ.२-४-२) इति हि श्रुत्यन्तरम् । चक्षोः चक्षुषः । 'अन्त्यलोपश्छान्दसः' । **सूर्यः अजायत** । **'आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्'** (ऐ.आ.२-४-२) इति हि श्रुतिः । **इन्द्रश्च अग्निश्च** । परस्परसमुच्चयार्थौ चकारौ । तौ देवौ **मुखात्** जातौ । अत्र मुखशब्देन वागिन्द्रियम् उच्यते । **'ब्राह्मणोऽस्य मुखमासित्'** इत्यत्र सर्वं मुखमण्डलं विवक्षितम् । **'अग्निर्वाग् भूत्वा मुखं प्राविशत्'** (ऐ.आ.२-४-२) इति ऐतरेयकश्रुतिः । वाचः इन्द्रसंबन्धं तैत्तिरीयाः समामनन्ति । **'वाग् वै पराच्यव्याकृतावदत् । ते देवा इन्द्रम् अब्रुवन् । इमां ना वाचं व्याकुर्विति । ताम् इन्द्रो मध्यतोवक्रम्य व्याकरोत् । तस्माद् इयं व्याकृता वाग् उद्यते'** (तै.सं.६-४-७-३) इति । अस्य पुरुषस्य **प्राणात्** । अत्र प्राणशब्देन घ्राणेन्द्रियं विवक्ष्यते । तस्माद् **वायुरजायत** । **'वायुः प्राणो भूत्वा नासिके प्राविशत्'** (ऐ.आ.२-४-२) इति हि श्रुत्यन्तरम् । अत्र सर्वत्र स्वस्वकारणप्रवेशेन तस्माद् उत्पत्तिर्विवक्षिता इति मन्तव्यम् ।। अध्यात्मपक्षेऽपि अयम् अर्थः समानः ।। ७ ।।

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ॥ ८ ॥

अत्रापि उत्तरानुसारिणः प्रश्ना ऊह्याः । अस्य यज्ञपुरुषस्य नाभिशिरःपादेभ्यः अन्तरिक्षद्युभूमयस्त्रयो लोकाः समभवन् । (शीर्ष्णः) । **'शीर्षश्छन्दसि'** (पा.सू.६-१-६०)

इति शिरसः शीर्षन् आदेशः । **'अल्लोपोऽनः'** (पा.सू.६-४-१३४) इति अकारलोपः । **पद्भ्याम्** इति । **'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ् छकन्नुदन्नासञ्छस् प्रभृतिषु'** (पा.सू.६-१-६३) इति पद्भावः । **श्रोत्रात्** अस्य पुरुषस्य श्रोत्रेन्द्रियाद् **दिशः** प्राच्यादय आसन् । **'दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्'** (ऐ.आ.२-४-२) इति हि श्रुत्यन्तरम् । उक्तार्थोपसंहारश्चतुर्थश्चरणः । **तथा** उक्तेन प्रकारेण उक्तरीत्या **लोकान्** अन्तरिक्षादीन् । उपलक्षणम् एतत् । ब्राह्मणक्षत्रियादीन् **अकल्पयन्** अस्माद [illegible] कल्पितवन्तः उत्पादितवन्तः साध्या नाम देवाः ।। [illegible] प्रजापतेः प्राणरूपा देवा इति इयान् विशेषः ।। [illegible]

[illegible] समभवद् विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥ ९ ॥

पूर्वं यस्मात् पुरुषाद् ब्राह्मणादिसृष्टिरुक्ता [illegible] अत्रोच्यते । **अग्रे** सृष्ट्यादौ **विराट्** विविधं राजन्ति [illegible] नाम पुरुषः **समभवत्** । 'सहस्रबाहुः [illegible] अजायत [illegible] समाम्नायते [illegible] तथा [illegible] विराट्संज्ञकः पुरुषोऽजायत । 'तस्माद् [illegible] इति शाखान्तरे विराजः आदिपुरुषाद् उत्पत्तिः [illegible] सर्वे [illegible] पुरुषोऽभवत्' इति (म.स्मृ.१-३२) । [illegible] विराजम् असृजत् प्रभुः' [illegible] अन् [illegible] **अधि** । अधिशब्दः पञ्चम्यर्थानुवादी । तस्माद् विराजः **पुरुषः** अन्यः [illegible] वाजसनेयकम् । **'विराजो अधि पूरुष इत्येषा वै सा विराट् । तस्या एवैतद् विराजो यज्ञं पुरुषं जनयति'** (श.ब्रा.१३-६-१-२) इति । स च तृतीयः पुरुषः यज्ञात्मा **जातः** उत्पन्नमात्र एव **अत्यरिच्यत** अतिरिक्त आसीत् । **भूमिम्** भूम्यादीन् सर्वान् लोकान् **पश्चात्** पश्चाद्भागे **अथो** अपि च **पुरः** पुरस्तात् । **'पूर्वाधरावराणाम् असि पुरधरवश्चैषाम्'** (पा.सू.५-३-३९) इति असि प्रत्ययः । तत्संनियोगेन पूर्वशब्दस्य पुर् आदेशः । स पुरुषो जातमात्र एव भूम्यादीन् लोकान् पश्चात् पुरस्ताच्च व्याप्य अतिक्रान्तवान् । अध्यात्मपक्षे । अग्रे सृष्ट्यादौ विराट् विविधं राजन्ति वस्तूनि यस्मिन्निति स विराट् मनःसंज्ञकः प्रजापतिः सहस्रबाहुः पुरुष इति प्रकृताद् महापुरुषाद् अजायत । ततो विराजः अधि विराजमेव अधिकरणीकृत्य पुरुषः अन्यः प्रजापतिः सर्वभूतेन्द्रिय-पुरुषसमष्ट्यात्माभवत् निष्पन्नः । श्रूयते हि । **'स मानसीन आत्मा जनानाम्'**

(तै.आ.३-११-१) इति । मानसीनः मनसा निष्पन्न इत्यर्थः । स वैराजः पुरुषो जातः प्रादुर्भूतमात्रः अत्यरिच्यत स्वयमेव आत्मानम् अत्यरेचयत् । 'कर्मकर्तरि रूपम्' । अनेकधा भावलक्षणं स्वरूपातिरेकम् अभजत । भूतेन्द्रियादीनि असृजद् इत्यर्थः । श्रूयते हि - **'असतोऽधि मनोसृज्यत । मनः प्रजापतिम् असृजत । प्रजापतिः प्रजा असृजत'** (तै.ब्रा.२-२-९-१०) इति । पश्चात् भूतग्रामसृष्टेरन्ते भूमिम् अत्यरेचयत् । सामर्थ्यात् कर्मकर्तृभावोऽत्र निवर्तते । एवम् आकाशादिपृथिव्यन्तानां तत्त्वानां सृष्टिरुक्ता भवति । **अथो** भूमेरनन्तरं पुरः पूर्यन्ते सप्तभिर् धातुभिर् इति **पुरः** शरीराणि सुरनरतिर्यगादीनां स्थावराणां च **अत्यरेचयत्** अतिरिक्तान्यकरोत् । पुर इति । द्वितीयाबहुवचनं शस् । छान्दसं विभक्त्युदात्तत्वम् । अध्यात्मपक्ष एव अन्योऽर्थः । अग्रे विराट् ब्रह्माण्डरूपो देहः तस्माद् आदिपुरुषाद् उत्पन्नः । विराजः अधि विराड्देहस्य उपरि तमेव देहम् अधिकरणं कृत्वा पुरुषः तद्देहाभिमानी कश्चित् पुमान् अजायत । योऽयं सर्ववेदान्तवेद्यः परमात्मा स एव स्वकीयमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानि-देवतात्मा जीवोऽभवत् । एतच्च आथर्वणिका उत्तरतापनीये स्पष्टम् आमनन्ति । **'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य अमूढो मूढ इव व्यवहरन्नास्ते माययैव'** (नृ.उ.ता.२-१-९) इति । स जातः विराट्पुरुषः अत्यरिच्यत अतिरिक्तोभूत् । देवतिर्यङ्मनुष्यादि-रूपोभूत् । पश्चात् देवादिजीवभावाद् ऊर्ध्वं भूमिं ससर्जेति क्रियाध्याहारः । अथो भूमिसृष्टेः अनन्तरं तेषां जीवानां पुरः शरीराणि ससर्ज । एवं भूतसृष्टिः पिण्डसृष्टिश्च प्रतिपादिता ।। ९ ।।

यत् पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत ।
व॒स॒न्तो अ॑स्यासी॒दाज्यं॑ ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः ॥ १० ॥

'उषा वा अश्वस्य मेध्यस्य' (बृ.उ.१-१-१) इत्यादिना पुरुषस्य अश्वत्वेन उपासना आम्नायते । अतोऽत्र पुरुषस्य अश्वत्वात् हविष्ट्वम् । अश्वमेधे हि अश्वः पशुः । अथ वा मुख्यः पुरुष एव पुरुषमेधे पशुः । तस्माद् अयम् अर्थः । **यत्** यदा **पुरुषेण** अश्वरूपेण पुरुषरूपेण वा **हविषा देवाः** साध्यनामका **यज्ञम् अतन्वत** अकुर्वत तदानीम् **अस्य** यज्ञस्य **वसन्तः** रसानाम् उत्पादक ऋतुः स्वमहिम्ना **आज्यम्** होम्यम् **आसीत्** । ग्रीष्मः शोषकऋतुः इध्मः अग्निसमिन्धनसाधनभूतैकविंशतिदारुमयात्मकः पदार्थ आसीत् । **शरत्** शीर्यन्ते पच्यन्ते अस्याम् ओषधय इति शरद् ऋतुः **हविः** यज्ञियचरुपुरोडाशादिहवीरूपोऽभवत् । अध्यात्मपक्षे यत् यदा पुरुषेण प्रजापतिना

हविषा हविष्ट्वेन संकल्पितेन हविरन्तरस्य अभावाद् देवाः प्राणाः प्राजापत्या इन्द्रियाणि च यज्ञम् संकल्पात्मकम् अतन्वत अकुर्वत । यद्वा यज्ञमेव अन्वतिष्ठन् । स्रष्टृकामः प्रजापतिर्देवः देवशब्दवाच्यप्राणादिभेदेन उच्यते । अथ वा पूर्वोक्तक्रमेण देवशरीरेषु उत्पन्नेषु ते देवा उत्तरसृष्टिसिद्ध्यर्थं तत्साधनत्वेन यज्ञम् अतन्वत । कंचिद् यज्ञम् अन्वतिष्ठन् । द्रव्यस्य अद्यापि अनुत्पन्नत्वेन हविरन्तराभावात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य तेन पुरुषाख्येन हविषा यत् यदा मानसं यज्ञम् अकुर्वत तदानीम् अस्य यज्ञस्य वसन्तर्तुरेव आज्यम् अभूत् । तमेव आज्यत्वेन संकल्पितवन्तः । एवं ग्रीष्मः इध्मत्वेन संकल्पितः । शरत् पुरोडाशादिहविष्ट्वेन संकल्पिता । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः वसन्तादीनां तु आज्यादिषु विशेषरूपत्वेन इति द्रष्टव्यम् ।। १० ।।

तं य॒ज्ञं प्रा॒वृषा॒ प्रौक्ष॒न् पुरु॑षं जा॒तम॑ग्र॒शः ।
तेन॑ दे॒वा अ॑यजन्त सा॒ध्या वस॑वश्च॒ ये ॥ ११ ॥

तं यज्ञम् यष्टव्यं **पुरुषम् अग्रशः** अग्रे सृष्ट्यादौ **जातम्** अश्वभूतं वा **प्रावृषा** वर्षकेण प्रावृडाख्येन ऋतुना **प्रौक्षन्** प्रोक्षितवन्तः । **'उक्ष सेचने'** (धा.पा.६५७) प्रावृट्कालं प्रोक्षणसाधनोदकरूपत्वेन संकल्पितवन्त इत्यर्थः । **तेन** पुरुषेण **देवा अयजन्त** इष्टवन्तः । (के) देवाः तान् आह । **ये साध्या वसवश्च** एतत्संज्ञका देवाः । अध्यात्मपक्षे । **यज्ञम्** यज्ञसाधनभूतम् । 'करणे नङ् प्रत्ययः' । तं पुरुषं पशुत्वभावनया यूपे बद्धम् **अग्रशः** अग्रतः अग्रे सर्वविकारसृष्टेः पूर्वं जातम् पुरुषत्वेन उत्पन्नं संकल्पात्मके यज्ञे **प्रावृषा प्रौक्षन्** प्रावृट्कालेन प्रोक्षितमिव मनसा कृतवन्त इत्यर्थः । **तेन** पुरुषरूपेण पशुना **देवाः अयजन्त** मानसं यागं निष्पादितवन्तः । के ते देवा इति त उच्यन्ते । **साध्याः** सृष्टिसाधनयोग्याः साधयन्तीति साध्याः । **'कृत्यल्युटो बहुलम्'** (पा.सू.३-३-११३) इति कर्तरि **'अचो यत्'** (पा.सू.३-२-९७) इति यत् प्रत्ययः । **वसवः** वासकाः प्राणाः इन्द्रियाणि च । द्वयेपि देवनशीलत्वाद् देवा इत्युच्यन्ते ।। ११ ।।

तस्मा॒दश्वा॑ अजायन्त॒ ये च॒ के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॒त् तस्मा॑ज्जा॒ता अ॑जा॒वय॑ः ॥ १२ ॥

पशुसृष्टिरुच्यते । **तस्मात्** यज्ञात्मनः पुरुषाद् **अश्वा अजायन्त** । **ये के च** अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च ये के **च (उभयादतः)** ऊर्ध्वाधोभागयोः उभयोः दन्तयुक्ताः सन्ति ते अजायन्त । **'छन्दसि च'** (पा.सू.५-४-१४२) इति दन्तस्य दतृभावः ।

'अन्येषामपि दृश्यते' (पा.सू.६-३-१३७) इति दीर्घः । **'अनित्यम् आगमशासनम्'** इति नुमभावः । **तस्मादेव** पुरुषाद् गावश्च **जज्ञिरे । जनी प्रादुर्भावे** (धा.पा.११४९) । हशब्दश्चार्थे । **तस्मादेव** यज्ञपुरुषाद् **अजावयः** अजाश्च अवयश्च **जाताः** । अध्यात्मपक्षेऽपि अयम् अर्थः समानः ।। १२ ।।

तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दो ह जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥ १३ ॥

सर्वहुतः । **'सुपां सुलुक्'** (पा.सू.७-१-३९) इति पञ्चम्येकवचनस्य सुः । सर्वहुतात् । आश्वमेधिकोऽश्वः **सर्वहुतः** । पुरुषस्य अश्वमेधत्वम् उक्तम् । यद्वा सर्वः सर्वाङ्गः सन् पशुर्हूयते (स) सर्वहुत् । कर्मणि व्यत्ययेन क्विप् प्रत्ययः । सर्वहुतः अश्वभूतात् **तस्माद् यज्ञात्** पुरुषाद् **ऋचः** पादबद्धा मन्त्राः **सामानि** गीत्यात्मकानि **जज्ञिरे** । **तस्मात्** यज्ञात् पुरुषात् **छन्दः** । जसो लुक् । छन्दांसि । हशब्दश्चार्थे । छन्दांसि च ऋगाद्यधिष्ठानानि **जज्ञिरे** । **तस्मा**देव पुरुषाद् **यजुः** प्रश्लिष्टपाठात्मको मन्त्रः **अजायत** । ऋगादीनां लक्षणं जैमिनिना सूत्रितम् । **'तच्चोदकेषु मन्त्राख्या'** (जै.सू.२-१-३२) । **'तेषाम् ऋग् यत्रार्थवशेन पादव्यवस्था'** (जै.सू.२-१-३५) । **'गीतिषु सामाख्या'** (जै.सू.२-१-३६) । **'शेषे यजुःशब्दः'** (जै.सू.२-१-३७) इति । अध्यात्मपक्षे सर्वहुतः सर्वात्मा पुरुषः पशुत्वेन हूयतेऽस्मिन्निति सोऽयं सर्वहुत् तस्मात् पूर्वोक्ताद् मानसाद् यज्ञात् । शिष्टं समानम् ।। १३ ।।

तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्य म् ।
पशूँस्तांश्चक्रे वायव्या नारण्या ग्राम्याश्च ये ॥ १४ ॥

सर्वहुतस्तस्माद् यज्ञात् - यज्ञात् अश्वभूताद् यज्ञपुरुषात् **संभृतम्** संपादितं यत् किंचिद् द्रव्यजातं तत् **पृषदाज्यम्** । दधिमिश्रम् आज्यं पृषदाज्यम् इत्युच्यते । तद् आसीत् । अथ तत् पृषदाज्यम् कर्म ते देवाः साध्यनामकाः **वायव्यान्** वायुदेवत्यान् **आरण्यान्** अरण्योद्भवान् द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनादेयाख्यान् सप्तसंख्याकान् एवमादिकान् अन्यान् आरण्यान् **पशूंश्चक्रे** चक्रिरे । **'तिङां तिङो भवन्ति'** (पा.सू.) इति झस्य तादेशः । ये च **ग्राम्याः** ग्रामोद्भवा गोऽश्वाजाविपुरुषगर्दभोष्ट्रा एवमादिका अन्ये **ग्राम्याश्च ये** सन्ति **तान्** पशूंश्चक्रिरे । अरण्ये भवा आरण्याः । **'तत्र भवः'** (पा.सू.४-३-५३) इति अण् प्रत्ययः । **'ग्रामाद् यखञौ'** (पा.सू.४-२-९४) इति ग्रामशब्दात् शैषिको यञ्

प्रत्ययः । आरण्यपशुविशेषणे तच्छब्दस्य प्रसिद्धिवाचकत्वम् । ग्राम्यविशेषणे यच्छब्दयोगात् तच्छब्दस्य प्रतिनिर्देशः । पशूनाम् अन्तरिक्षद्वारा वायुदेवत्यत्वं मन्त्रान्तरव्याख्याने तैत्तिरीयाः समामनन्ति । **'वायवः स्थेत्याह । वायुर्वा अन्तरिक्षस्याध्यक्षाः । अन्तरिक्षदेवत्याः खलु वै पशवः । वायव एवैनान् परिददाति'** इति (तै.ब्रा.३-२-१-४) । आरण्यानामेव वायुरधिपतिरिति केचित् । अध्यात्मपक्षे । सर्वहुतस्तस्माद् यज्ञात् पूर्वोक्ताद् मानसाद् यज्ञात् संभृतम् समुत्पन्नं पृषदाज्यं पृषत् विचित्रं बिन्दुमद् आज्यम् । अथ तत् पृषदाज्यम् कर्म आरण्यान् ग्राम्यांश्च द्विविधान् पशूंश्चक्रे प्राणेन्द्रियसमष्टिरूपः प्रजापतिः । तत्रैव अर्थान्तरम् । पृषदाज्यम् दधिमिश्रम् आज्यं संभृतम् संपादितम् । दधि च आज्यं च इत्येवमादि भोग्यजातं सर्वं संपादितम् इत्यर्थः । तथा द्विविधान् पशूंश्चक्रे प्राणेन्द्रियसमष्टिरूपः प्रजापतिरेवेति ।। १४ ।।

स॒प्तास्या॑सन् परि॒धय॒स्त्रिः स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद् य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न् पुरु॑षं प॒शुम् ॥ १५ ॥

यत् यदा यज्ञम् अश्वमेधं पुरुषमेधं वा तन्वानाः कुर्वाणाः साध्या देवाः स्वस्मिन् यज्ञे पुरुषं पशुम् अश्वभूतं मुख्यं पुरुषं वा अबध्नन् यूपे बद्धवन्तः तदानीम् **अस्य** यज्ञस्य **सप्त** सप्तसंख्याकानि गायत्र्यादीनिच्छन्दांसि **त्रिः सप्त** एकविंशतिसंख्यायुक्ताः **परिधयः** समिधश्च **कृताः** संपादिता **आसन्** । ऐष्टिक्यः पञ्चदशभिः सामिधेनीभिर् ऋग्भिः आधीयमानाः पञ्चदश **समिधः** एका अनुयाजसमित् द्वे आघारसमिधौ त्रयः परिधयः इति एकविंशतेर् दारूणां संपादनेन इध्मरूपं कृतम् । अथ वा अस्य सांकल्पिकयज्ञस्य गायत्र्यादीनि सप्त च्छन्दांसि परिधय आसन् । ऐष्टिकस्य आहवनीयस्य त्रयः परिधयः । औत्तरवेदिकास्त्रयः । आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः । अत एवाम्नायते । **'न पुरस्तात् परिदधाति । आदित्यो ह्येवोद्यन् पुरस्ताद् रक्षांस्यपहन्ति'** इति (तै.सं.२-६-६-३) । त एत आदित्यसहिताः सप्तपरिधयः अत्र सप्तच्छन्दोरूपाः । तथा समिधः त्रिः सप्त त्रिगुणितसप्तसंख्याका एकविंशतिः कृताः । **'द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः'** इति (ऐ.ब्रा.१-३०) श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः । एवम् इध्मानाम् एकविंशतेर्दारूणां संपादनेन इध्मरूपं कृतम् पूर्वं तु पृथक्त्वेन परिधानकाले परिधिनिरूपणं कृतम् इति द्रष्टव्यम् । **यत्** यदा **देवाः** प्रजापतिप्राणेन्द्रियरूपा **यज्ञं तन्वानाः** मानसं यज्ञं कुर्वाणाः **पुरुषं** वैराजं **पशुम् अबध्नन्** तं पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र पुरुषेण हविषा इत्युक्तम् ।। १५ ।।

[१]मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः ।
राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ॥ १६ ॥

प्रतिपदार्थः - पुरुषात् अधि - भगवतः सकाशात्, **जातस्य -** उत्पन्नस्य, **सोमस्य राज्ञः -** सोमद्रव्यसाध्यकयज्ञतनोः, **सप्त सप्ततीः -** सप्तगुणित सप्तति संख्याकाः, **अंशवः -** किरणाः, **बृहतः -** महतः, **देवस्य -** द्योतनात्मकस्य पुरुषस्य, **मूर्ध्नः -** शिरसः, **अजायन्त -** उद्भूताः ।।

तात्पर्यार्थः - सर्वेषु यज्ञेषु सोमसंबन्धसत्वात् सोमं अत्र प्रशंसति -सोमलतासाध्याः अग्निष्ठोमादयः नवत्यधिकचतुश्शतसंख्यादयः यागाः महतो देवस्य भगवतः यज्ञात्मनः शीर्षात् समुत्पन्नाः ।।

सा.भा. - सर्वस्य यज्ञस्य सोमसाध्यत्वाद् अत्रापि यज्ञे परंपरया सोमसंबन्धं दर्शयितुं सोमः अनया प्रस्तूयते । **पुरुषात्** यज्ञात्मनः वैराजाद् वा । **अधिशब्दः** पञ्चम्यर्थानुवादी । **जातस्य** निष्पन्नस्य **सोमस्य राज्ञः सप्त** सप्तगुणिताः **सप्ततीः** सप्ततयः सप्तगुणितसप्ततिसंख्याका **अंशवः** किरणाः **बृहतः** महतो **देवस्य** द्योतनात्मकस्य **'सहस्रबाहुः पुरुषः'** इत्यादिना निरूपितस्य आदिपुरुषस्य **मूर्ध्नः** सकाशाद् **अजायन्त** उद्भूताः । अयम् अर्थः द्विविधो हि सोमः वल्लीरूपो देवतारूपश्चेति । तत्र लतारूपस्य सोमस्य स्वसाध्याः प्रकृतिविकृत्यादिभेदेन नानासंख्याकाः प्रकृतिरूपाः अग्निष्ठोमादिसप्तसंस्थाः नानासंख्याका विकृतिभेदेन (च क्रतवः) पुरुषमेधक्रतुनिर्वर्तकनारायणपुरुषस्य शिरसः सकाशाद् उद्भूता इति । कलारूपस्य तु सोमस्य द्युलोके सप्तगुणितसप्ततिसंख्याकाः किरणा निष्पन्नाः । सूर्यस्य तु सहस्रकिरणाः सोमस्य तु दशोनपञ्चशतसंख्याकाः किरणा देवस्य मूर्ध्नोजायन्त इति ।। १६ ।।

।। अथर्वणवेदीयस्य पुरुषसूक्तस्य सायणभाष्यं समाप्तम् ।।

---

१. अथर्ववेदे पुरुषसूक्ते एकं ऋगन्तरमस्ति । तस्य प्रतिपदार्थः, तात्पर्यार्थश्च -

अनुबन्धाः

१. प्रमाणानां अकारादिसूचनी ।

२. पुरुषसूक्तार्थ सङ्ग्रहकारिका ।

३. ग्रन्थान्तरेषु पुरुषसूक्तार्थविचारः ।

अ. श्रीभाष्ये पुरुषसूक्तार्थविचारः ।

आ. मुद्गलोपनिषदि पुरुषसूक्तार्थः ।

इ. श्रीपाञ्चरात्रे पराशरसंहितायां पुरुषसूक्तस्य विनियोगः ।

ई. अहिर्बुध्न्यसंहितायां पुरुषसूक्तस्य विशेषार्थः ।

उ. महार्णवकर्मविभागे ऋग्विधानोक्तपुरुषसूक्तप्रयोगः ।

४. मन्त्रगताः विशेषशब्दार्थः ।

५. सङ्केताक्षरसूचनी ।

६. ग्रन्थसूचनी ।

१. प्रमाणानाम् अकारादिसूचनी

प्रमाणानि	आकरः	पु.सं
अक्षरं ब्रह्म पारं	रा.यु.कां.११७-१४	79
अग्निर्वाग् भूत्वा	ऐ.आ.२-४-२	91
अचो यत्	पा.सू.३-२-९७	94
अजायमानो बहुधा	तै.आ.३-१३-१	89
अणुत्वेन महत्त्वेन	यो.वा.५६-५७	56-57
अणोरणीयान्	महा.ना.उ.१२	56
अथ यस्मात्पुरुषमेधो	नि.व.	34
अथाज्यभागान्ते	शां.क.२५	86
अथ रोहिण्यां	अ.प.१०-१	86
अध्यर्धपूर्वद्विगोः	पा.सू.५-१-२८	87
अनन्तायाम् विस्तारो	वै.सं.	63
अनादिमध्यनिधनो	रा.यु.कां.१११-१२	79
अनित्यं आगमशासनम्	धा.पा.१२४९	95
अन्तरिक्षदेवत्याः	श्रु.वां	40
अनन्तबाहूदरवक्त्रनेत्रम्	भ.गी.११-१६	54
अन्नाज्ञातस्य	म.भा.मो.ध.	59
अन्येषामपि दृश्यते	पा.सू.६-३-१३७	73,95
अन्वारभ्याथ जुहुयात्	अ.प.१०-१	86
अपाणिपादो जवनो गृहीता	श्वे.उ.३-१९	54,58
अयनं निलये मार्गे	निघं.	80
अल्लोपोऽनः	पा.सू.६-४-१३४	92
असतोऽधि मनोऽसृज्यत	तै.ब्रा.२-२-९	66
असौ रामो	रा.उत्तर	55
अस्य पुरुषसूक्तस्य	ऋ.वि.५१६-५२०	50
अहं वेद्मि महात्मानं	रा.बा.कां.१९-१४	79
आदत्ते यादृशं रूपं.....	पाद्म.पु.	57

आदित्यश्चक्षुर्भूत्वा	ऐ.आ. २-४-२	91
आदित्यवर्णं पुरुषम्	मो.ध.	77
इतः प्रदानाद्धि		36
इत्यनुमन्त्रयते	वै.सू.७-२	86
इदं पुरुषसूक्तं हि.....	पाद्म.पु	49,50
इमे वै लोकाः	श.ब्रा.१३-६-२-१	35
उक्ष सेचने	धा.पा.६५७	41,94
उषा वा अश्वस्य मेध्यस्य	बृ.उ.१-१-१	93
एकतो वा जगत्	उद्यो.प.६८-७	61
एकशृङ्गवराहस्त्वं	रा.यु.कां.११७-१३	79
एतत् तदुक्तमव्यक्तमक्षरम्	रा.यु.कां.१२२-३२	79
ओमित्यात्मानं	महा.ना.उ.६३-७९	73
कतम आत्मा	बृ.उ.६-३-७	35
कृत्यल्युटो बहुलम्	पा.सू.३-३-११३	71,88,94
केन पार्ष्णी	शां.क.१५	86
क्विन्प्रत्ययस्य कुः	पा.सू.८-२-६२	63
खर्जूरपुष्पाकृतिभिः	रा.अर.कां.१६-१७	67
गीतिषु सामाख्या	जै.सू.२-१-३६	95
गुप्त्यै वा अभितः		46
गोवर्धनादिधरणात्	ह.वं	55
ग्रामाद्यखञौ	पा.सू.४-२-९४	95
चन्द्रमा मनो भूत्वा	ऐ.आ.२-४-२	91
छन्दसि च	पा.सू.५-४-१४२	73,94
डति च	पा.सू.१-१-२५	90
ज्योतींषि विष्णुर्भुवनानि	वि.पु.२-१२-३८	59
तच्चोदकेषु मन्त्राख्या	जै.सू.२-१-३२	95
ततः स्वयंभूः	म.स्मृ.१-६	66
तत्पुरुषस्याङ्गुलेः	पा.सू.५-४-८६	49,87

तत्र भवः	पा.सू.४-३-७३	95
तथाप्यमूर्तः पुरुषः	पाद्म.पु.	57
तदण्डमभवद्धैमं	म.स्मृ.११-९	66
ते देवा इति कीर्त्यन्ते	वै.सं.	69
तमब्रवीत्	तै.आ.१-२३-९३	78
तं हि स्वयंभूः	म.स्मृ.१-९४	74
तस्यावनिगतस्येह	म.पु.	57
तेनेदं पूर्णं	महा.ना.उ.१०	54
तेषाम् ऋग् यत्र	जै.सू.२-१-३५	95
ते हि धर्माः	श.ब्रा.१०-२-२-३	46
त्रैधातव्यन्ते	का.श्रौ.सू.२१-१-१७-१८	34
दहरादिमवाक्येन	यो.वा.	57
दिशः श्रोत्रं भूत्वा	ऐ.आ.२-४-२	93
दीर्घाददटि समानपादे	पा.सू.८-३-९	75
देवतिर्यङ्मनुष्येषु	वि.पु.	55
देशतः कालतो	ह.वं.	61
द्वादशमासाः पञ्चर्तवस्त्रय	ऐ.ब्रा.१-३०	96
द्वादशमासाः पञ्चर्तवस्त्रय	तै.सं.५-१-१०-३	31,45
द्वाविमौ पुरुषौ	भ.गी.१५-१६	61
द्वा सुपर्णा सयुजा	मुं.उ.३-१-१	35
द्वित्रिभ्यां पाद्दन्	पा.सू.६-२-१९७	60,89
द्विधा कृत्वात्मनो	म.स्मृ.१-३२	92
न कर्मणा न प्रजया	महा.ना.उ.१०-२४	78
न पुरस्तात् परिदधाति	तै.सं.२-६-६-३	31,45,96
नाकोऽम्बरेपि च	निघ.	80
नामरूपं च	वि.पु.१-५-६३	76
नियुक्तान् पुरुषान्	श.ब्रा.१३-६-२-१२	33
नियुक्तान् ब्रह्माभिष्टौति	का.श्रौ.सू.२१-१-११	33,34

पद्दन्नोमासहृन्निश	पा.सू.६-१-६३	87,92
पशूनुपाकृतान्	पुरुषमेध	48
पृथिव्यादीनि	पैं.ब्रा.	68
पुत्रेच्छुर्ब्राह्मणः	ऋ.वि.	52
पुरुषस्य हरेः सूक्तम् सर्वं सचराचरम्	ऋ.वि.५२१-५२६	51
पुरुषान्न परं किञ्चित्	क.उ.३-११	19
पुरुषो ह वै	श.ब्रा.१३-६-१-१	86
पूर्वाधरावराणाम्	पा.सू.५-३-३९	92
प्रजापतिरकामयत	तै.सं.७-१-१-४	42
प्रतर्दनो ह वै दैवोदासिः	कौ.उ.३-१	79
प्राणाय नमः	शां.क.१५	86
बहुव्रीहौ सक्थ्यक्ष्णोः	पा.सू.५-४-११३	49,87
ब्रह्मयज्ञे जपेत्	यम.स्मृ.	50,51
भगवानिति शब्दोऽयम्	पा.पु.	55
भवान्नारायणो देवः	रा.यु.कां.११७-१३	79
भूमेश्च	पा.पु.	56
महपूजायाम्	धा.पा.७९	80
मेघच्छन्न इवादित्यो समदुःखसुखः क्षमी	यो.वा.६-५३-१२	52
य एष देवकीपुत्र	म.भा.	59
यज्ञेन हि तं यज्ञमयजन्त	श.ब्रा.१०-२-२-२	46
यथाभास्करशब्दोऽयम् महादेवे व्यवस्थितः	स्कं.पु.	55
यदादित्यगतं तेजो	भ.गी.१५-१२	73
यः पौरुषस्य सूत्रस्य	यो.वा.	52
यस्याखिलं महीव्योम	वि.पु.५-७-५०	62
यस्यायुतायुतांशे	वि.पु.१-९-५३	62

लोकानां तु विवृद्ध्यर्थं	म.स्मृ.१-३१	75
लोकानां त्वं परो धर्मो	रा.यु.कां.११७-१४	79
लोपः शाकल्यस्य	पा.सू.८-३-१९	90
वन षण संभक्तौ	धा.पा.४६४	55
वाग् व	तै.सं.६-४-७-३	91
वायवः स्थेत्याह	तै.ब्रा.३-२-१-३	25,39,72,96
वायुः प्राणो भूत्वा	ऐ.आ.२-४-२	91
वासुदेवः सर्वम्	भ.गी.७-१९	58
विराजो अधि	श.ब्रा.१३-६-१-२	92
विष्टभ्याहमिदं कृत्स्नम्	भ.गी.१०-४२	22,37,38,73,88
विश्वतश्चक्षुरुत विश्वतोमुखो	ऋ.सं.१०-८१-३	78
विश्वतश्चक्षुरुत विश्वतोमुखो	महा.ना.उ.१-३	54
व्यक्तमेष महायोगी	रा.यु.कां.१११-११	79
शरीरे तव पश्यामि	रा.बा.कां.२९-१३	57
शार्ङ्गधन्वा हृषीकेशः	रा.यु.कां.११७-१५	79
शीर्षंश्छन्दसि	पा.सू.६-१-६०	35,49,54,91
शेषे यजुःशब्दः	जै.सू.२-१-३७	95
श्रीवत्सवक्षा नित्यश्रीः	रा.यु.कां.१११-१३	79
षणु दाने	धा.पा.१४६५	55
स एव वासुदेवोऽयं	ना.पु.	55
स एव वासुदेवोऽयं	वि.पु.	56
संख्याया विधार्थे धा	पा.सू.५-३-४२	90
संख्यासुपूर्वस्य	पा.सू.५-४-१४०	35,49,60,87,89
सत्यं ज्ञानमनन्तं ब्रह्म	तै.उ.२-२-१	21,36,37,62,66,84,88
स्नातं अलंकृतम्	वै.सू.२९-६	86
संसारान्मोक्षमिच्छन्	यो.वा.६-१२२-१	51
स यश्चायं पुरुषे	तै.उ.आ.८-५	60

सर्वतः पाणिपादं	भ.गी.१३-१३	54
सर्वं खल्विदं ब्रह्म	छां.उ.३-१४-१	59
सर्वं वशं मम	यो.वा.उत्तरभागे	52
स वा एष भूतानीन्द्रियाणि	नृ.उ.ता.२-१-९	23,38,39,65,85,93
सर्वस्याथ जगन्नाथः	पु.त.	64,65
सहस्रबाहुः पुरुषः	शा.क.१५	86
सहस्रशीर्षा इत्यत्र	श्री.शा.	80
सिसृक्षोरनिरुद्धाख्या	व.पु.	67
सुपां सुलुक्	पा.सू.७-१-३९	95
सूर्याचन्द्रमसौ धाता	महा.ना.उ.१-९	47,76
सोऽभिध्याय शरीरात्	म.स्मृ.१-८	66

२. पुरुषसूक्तार्थसङ्ग्रहकारिकाः

[उत्तमूर् श्रीवीरराघवाचार्यकृताः]

सूक्तं तत् सर्ववेदेष्वपि परिपठितं पौरुषं यस्य हि त्व-
व्यैकान्त्यं स्पष्टघुष्टं स्मृतिषु, तव मितं वैभवं यत्र सर्वम् ।
एतत् नारायणाख्याप्रथितमपि यथाऽम्भस्यपारे तथाऽद्य-
स्संभूतश्चेति भागौ पुरुष उपनिषत्स्वस्तु लक्ष्मीश! कोऽन्यः ।। १ ।।
शक्तिर्मस्तिष्कसाध्या जगति भवति या ज्ञानकर्माक्षजैवं
लक्ष्मीकान्त! ह्यनन्ता त्वयि धुतकरणापेक्षणे सा सदैव ।
इच्छायां विश्वरूपं कलयसि च भवत्यादिसर्गेऽप्यनन्ते
शीर्षादेस्ते द्युमुख्यम्, तत इह गदितोऽनन्तशीर्षाक्षिपात् त्वम् ।। २ ।।
व्याप्य ब्रह्माण्डभूमिं दशगुणितजलाद्याविभक्तं तमो यत्
क्रान्तो द्रव्यं तदन्तं दशविधमसि तद् विश्वमेतत् त्वमेव ।
श्रीश! त्वं षड्गुणान्नप्रतिकलकलितर्द्धेश्च मुक्तेः प्रदाता
बद्धास्ते पादमात्रं दिवि तु तव सदा सन्ति नित्यास्त्रिपादः ।। ३ ।।
तस्माद् दिव्यात्मरूपे दिवि तव भवति त्र्यंशमीदृग्विघस्त्वं
किं चित्रं भोक्तृभोग्ये यदिह परिगतोऽस्यञ्जनेशानिरुद्धात् ।
त्वत्तोऽसौ पद्मयोनिर्जनिमधित विराट् तत्त एवं मनुर्यः
पश्चाद् भूमौ पुरस्तादपि लसति निजैः सर्वतः सृष्टिभेदैः ।। ४ ।।
ब्रह्माण्डं चेद् विराट् स्यात्, अधिकृतपुरुषस्तत्र जातोऽस्तु धाता
त्वत्तो जातोऽनिरुद्धस्त्वमसि यदि विराट्, स्यात् तदाऽप्येष एषः ।
ब्रह्मा श्रीमन्! विराट् चेत्, मनुवचनबलात् तज्जनिः स्यान्मनुः सः
व्यूहान् संकर्षणाद्यान् क्रमत उपगतश्चाण्डसृष्टिं तनोषि ।। ५ ।।
अग्नीन्द्रादीन् वृषाद्रीश्वर! सृजति भवान् यज्ञक्लृप्तेः परस्तात्
देवाः साध्यादयश्च व्यदधुरिह मखं प्रागितीदं विमृश्यम् ।
अक्षाद्यं देवशब्दाद्यभिहितमजसंबन्धि मन्यन्त एके
मन्ये पूर्वेऽपि केचित् कतिचन कथिताः स्युश्च यज्ञात् परस्तात् ।। ६ ।।
इन्द्रो देवा मनुश्चर्षय इह मनुपुत्रादयो ये विभिन्नाः
तत्तन्मन्वन्तरेऽत्र प्रथममभिहितास्तत्र केचिद् भवेयुः ।

स्रष्टा पूर्वं प्रयस्य स्वयमपि विहितानेकसर्गः स्वशक्तेः
वैकल्यं वीक्ष्य खिन्नस्तव यजनविधौ व्यापृतः श्रीश! यत् स्यात् ।। ७ ।।
यद्वा नानास्त्रभूषे त्वयि वृषशिखरिद्योतिरूप! प्रथन्ते
ये ते तत्त्वाभिमानात् ऋषय इति सदाप्राप्यभावाच्च साध्याः ।
नित्या देवास्त्वदीयाः त इह विधिमुखाशक्तिदृष्ट्या तदर्थं
साक्षाद्वा तन्मुखाद्वा व्यदधत मखमित्यस्तु कस्तत्र दोषः ।। ८ ।।
आदावाज्याद्यभावात् सुदलतरुमुखः क्लृप्त आज्यं वसन्तः
ग्रीष्मश्चेध्मोऽतिशोषी हविरपि नवधान्यागमार्हा शरत् सा ।
चत्वार्यक्षाणि चान्तः दश च महदहङ्कारभूतानि देह-
स्थानि त्रिःसप्त मन्ये बहिरपि महदादीनि लक्ष्मीश! सप्त ।। ९ ।।
ब्रह्मादिः पूर्वजातः पुरुष इह हविः कल्पितः तत्प्रसन्नो
भूयो यष्टुं व्यधास्त्वं श्रितरम! पृषदाज्यादि यज्ञोपयुक्तम् ।
तेनाप्याराधितस्त्वं तदनु निजशरीरांशदेशाद् व्यतानीः
वेदान् अश्वादिकान् नॄन् विधिमुखकरणाद्याधिदेवांश्च लोकान् ।। १० ।।
अज्ञातानेकसर्गोचितपथमखिलाम्नायहीनं कथञ्चित्
यज्ञेनाराध्य लक्ष्मीहयवदन ! वृषाद्रीश ! संपन्नवेदम् ।
तं त्वं त्वच्चित्तनाभ्यादित इव बहुधा स्वाङ्गतोऽन्यानि सृष्ट्वा
नानासर्गे नियुङ्क्षे स्वयमपि विशसि ज्येष्ठपुत्रं तथाऽन्यान् ।। ११ ।।
संज्ञामूर्ती त्रिवृत्कृत् त्वमिह पुरुष इत्येष निष्कम्पितोऽर्थः
किन्तु ब्रह्मान्तरात्मा पुरुष इति विधेः स्रष्टृतार्थेऽभ्यधायि ।
विस्पष्टे त्वत्कृतत्वे किमिति विधिरिह स्यात् प्रवेश्यस्तदेष
श्रीश! त्वत्सृष्टभिन्नं सृजतु निजनिशान्तेषु चाङ्गादशेषम् ।। १२ ।।
वेधाः श्रीधामवक्षः! प्रभवति भवता नाभिनालीकसुप्तः
कल्पारम्भे महाम्भस्युपरि हि धरणौ स्थापितायां कृते च ।
तत्तल्लोके विधातुम्, तदुपकृतिरियं युज्यतेऽस्याऽऽदिसर्गे
यद्वा तद्द्वारतस्त्वं सृज सकलमिदं सोऽपि ते शक्तिभूमा ।। १३ ।।
प्रारम्भे प्रब्रुवंस्त्वां पुरुष इति विराट्सृष्टिमुक्त्वाऽऽह जीवं-
श्रीधामन् ! ब्रह्ममुख्यं पुरुषमथ मनुष्यादिदेहं यदेवम् ।

तस्मादन्ते महान्तं पुरुषमिति विशिष्याऽऽह पुंसूक्तमेवं
त्वत्तो ब्रह्माऽश्ववक्त्रादधिगतमहिमेत्यादिमेध्याऽश्वसृष्टिः ।। १४ ।।
पुंसूक्तं मुद्गलाख्योपनिषदि विवृतम्, तेन ते श्रीश ! भूमा
चातुर्व्यूह्यं चतुष्पात् प्रकृतिपुरुषयोरुद्धवश्चानिरुद्धात् ।
ध्यानात्मा सृष्टियज्ञो विधिकृत इदमक्षाणि यष्टार एव
सृष्टेस्तस्थोपदेष्टा यजनभुगनिरुद्धोऽयमित्यादिरुक्तः ।। १५ ।।
ईदृशं त्वां सहान्तं दिवि पुरुष ! तमःपारदेशे विभान्तं
सूर्याभं नामरूपे विदधतमवयन् श्रीश ! यज्ञैर्विशुद्धैः ।
इष्ट्वा सर्वान्तरं त्वाममृत इह भवद्वेदनादेव देशं
नित्यैर्जुष्टं तमेति त्वदनुभवरतब्रह्मशक्रादितुल्यः ।। १६ ।।
यज्ञं विष्णुं भवन्तं कृतयुगकलिता ये त्वदेकार्थयज्ञाः
तत्तच्छब्दोदितं तैरयजत परमैकान्तिधर्मैः सुरौघः ।
शीर्षाद्यानन्त्यशाली श्रितरम! भुवनात्मा चतुष्पात् विराडा-
द्याधाता धातुरर्थे कृतजगत् अनघज्योतिरत्रासि वेद्यः ।। १७ ।।
कालेऽर्चिर्घस्रशुक्लोत्तरगमनसमावायुसूर्याब्जविद्यु-
त्पाथोनाथेन्द्रवेधोगमितम् अनुगतं वैद्युतामानवेन ।
अव्यक्ते त्यक्तसूक्ष्मं व्यतिगतविरजं ब्रह्मदेहं विभूष्य
श्रीमन् ! आनाय्य भक्तं श्रितपदमथ संभाष्य सायुज्यदोऽसि ।। १८ ।।
छान्दोग्ये शाख्य शुभ्राश्वतरवरशिखामुण्डकप्रश्नमुख्ये
प्रायः पुंसूक्तवत् त्वं पुरुष इति समस्तेऽथ विष्णुः कठादौ ।
सौबाले तैत्तिरीयादिषु च महति च श्रीश! नारायणाख्यः
ख्यातोऽसि ब्रह्मबिन्दौ वृषशिखरिपते! वासुदेवः सुदेवः ।। १९ ।।
द्वात्रिंशत् सन्ति विद्यास्तव पदभजनेऽत्रेति भूयान् प्रवादः
वेदेऽनन्ते तदर्थे त्वयि बहुजननेऽनन्तकल्याणपूर्णे ।
संख्याने कः समर्थः स्वयमिह नतरामद्य निष्कर्षशक्तिः
भीष्मान्तो भक्तियोगो भुवि बत यदि वा श्रीश! नाथान्त एषः ।। २० ।।
एकैवाऽऽद्यन्तमेकं प्रकरणमिति या नाचिकेताख्यविद्या
तन्मध्ये केचिदत्तृप्रमितमुखवचस्स्वाहुरन्यान्यविद्याम् ।
यां विद्यां चीर्णशीर्षव्रतनियमविधिनैव भिन्तेऽक्षराख्यां
ताञ्चान्या केऽपि गार्ग्यक्षरमतित इति श्रीश! किं ग्राह्यमत्र? ।। २१ ।।

ज्योतिर्ज्योतिष्ट्वमन्त्रं महितरमः! ततः पाञ्चजन्याश्रयोक्ति
प्राणादिप्राणतादेर्वचनमपि विभिन्नार्थताभ्रान्तियोग्यम् ।
मत्वा व्यासोऽसुसूत्रद् विनिगमकमुशन् एकवाक्यत्वरूपं
यं ह्यर्थम्, तं तदन्यं त्वपि वदति तव ज्योतिषांज्योतिरुक्तिः ।। २२ ।।
विद्या देवादिजुष्टा प्रकृतविसदृशी ज्योतिषां ज्योतिराख्या
ब्रह्मप्रावण्यसिद्ध्यै श्रितरम! कथिता मध्य इत्याशयीरन् ।
पुंविद्या तैत्तिरीये कथमपि न पृथग्भावमाप्नोति काम्या-
स्त्वादित्याकाशमुख्यास्तदिह न गणनं तत्तत् अत्यन्तहृद्यम् ।। २३ ।।
काम्याऽकाम्यात्मिका वा त्वयि भवतु मतिर्दृष्टयदृष्ट्यात्मिका वा
या इष्टाः ब्रह्मसूत्रेष्विह तत इतराश्चापि विद्यास्त्रयीष्टाः ।
शङ्के शारीरकोदाहृतविषयवचोमात्रमाद्यन्तमालो-
ड्यैता द्वात्रिंशदुक्ताः कथमपि बृहदारण्यकान्तश्रुतीर्वा ।। २४ ।।
इत्थं पुंसूक्तविद्याद्यनवधिनिगमोपज्ञविद्यैकलभ्यं
विख्याते ताण्डिकौषीतकितलवकराद्युक्तनानाविशेषैः ।
दिव्ये धामन्यनन्ते सह सरसिजया भ्राजमानं भवन्तं
सन्तोऽद्य श्रीश! गन्तुं द्वयकरणभरन्यासविद्यां गृणन्ति ।। २५ ।।
पूर्णस्त्वं नित्यवन्द्यः पर इह निखिलानुग्रहेदम्परस्सन्
व्यूहं यातोऽवतारं विभवमपि हृदन्तःस्थमर्चामयञ्च ।
कारुण्यैकान्तधामन्! कलिकलुषहृदो वेङ्कटाद्रौ स्थितोऽस्मिन्
पासि प्रख्यापितात्मा शरणमुपयतः श्रीश! विश्राणितेष्टः ।। २६ ।।
प्रज्ञा चर्या विरक्तिः परमतनिकृतिः स्वात्मसिद्धान्तरक्षा
निर्दुष्टस्पष्टहृद्यव्यवहृतिरपि यं ह्यञ्जसोपाद्ययन्ति ।
सोऽयं श्रीरङ्गरामानुजमुनिरनघस्तद्गुरुस्तद्गुरूद्धाः
सन्तोऽन्ये च त्वदङ्घ्रिप्रवणधियि मयि श्रीश! सन्तु प्रसन्नाः ।। २७ ।।
यो यं तर्कार्णवाख्यां बिरुदमनुपमं पूर्वतन्त्रादिकेऽपि
प्रापथ्य प्रौढनानाकृतिकरणयशश्चासि हृष्टोऽद्य स त्वम् ।
वीरश्रीराघवं श्रीपरिबृढ! कृपया प्रेर्य तं भ्राजसे माम्
इत्थं वेदान्तपुष्पाञ्जलिविहितनिजप्रीतिभूमाभिरामः ।। २८ ।।

श्रीरस्तु

३. ग्रन्थान्तरेषु पुरुषसूक्तार्थविचारः

अ. [श्रीभाष्ये पुरुषसूक्तार्थविचारः]

ज्योतिरधिकरणं - (१-१-१०)

एवं प्राप्ते प्रचक्ष्महे - 'ज्योतिश्चरणाभिधानात्' । द्युसंबन्धितया निर्दिष्टं निरतिशयदीप्तियुक्तं ज्योतिः परमपुरुष एव । कुतः । 'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इत्यस्यैव द्युसंबन्धिनश्चरणत्वेन सर्वभूताभिधानात् ।। (श्री.भा.)

एवं प्राप्त इति - चरणत्वेन सर्वभूताभिधानं कारणस्य जीववैलक्षण्यनिश्चायकम्; जीवमात्रस्य सर्वभूतपादवत्त्वानुपपत्तेः । तत एव पुरुषसूक्तप्रत्यभिज्ञापकतया देवताविशेष निश्चयः । तद्द्वारा, दीप्तियोगस्य भौतिकज्योतिष्ट्वे हेतुतापरिहारश्च भवति । पुरुषसूक्तं कस्मात् सूत्रकारेण न निरूपितम् । संशयहेत्वभावादिति ब्रूमः । सन्दिग्धे न्यायः प्रवर्त्तते । पुरुषसूक्ते च ज्योतिश्शब्दः छन्दोभिधानादिकं प्रधानक्षेत्रज्ञासाधारणलिङ्गान्तरं वा क्वचिन्न दृश्यते । सर्वभूतपादवत्त्वादिधर्माश्च तयोरसंभाविताः । तर्हि चिदचिद्विलक्षणकारण अस्तित्वविषयस्य प्रथमपादस्यानारम्भः स्यादिति चेन्न; बहूनां वेदान्तवाक्यानां प्रकृतिपुरुषकारणमात्रवादित्वे तद्विरोधेनात्रापि संशयप्रसङ्गात्, तेषां भूयसां बलीयस्तया विपरीतनिश्चयप्रसङ्गाच्च तद्व्युदासायारम्भणीयत्वात् । तेषु च प्रकृतिपुरुषविलक्षणविषयतया न्यायतो निश्चितेषु संशयविपर्ययाभावात् पुरुषसूक्तस्य चिदचिद्विलक्षणे परे ब्रह्मणि प्रामाण्यम् अप्रतिभटमवतिष्ठते । अतो न तत्र निरूपणीयम् । तस्य च तत्त्वपरत्वं (पुरुषसूक्तस्य भगवत्परत्वम्) तत्रापि महापुरुषसंज्ञदेवताविशेषविषयत्वमपि अविगीतम्; अनेकोपपत्तिसिद्धञ्च ।

'इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते । ऋतं सत्यं च विख्यातं ऋषिसिंहेन चिन्तितम्' इति मोक्षधर्मे तत्त्वनिष्कर्षकतया व्यासेनोदाहृतम् । अत्र च सर्वेषु वेदेषु पठिततया संनिहितत्वात् तत्तच्छाखागतानां तत्त्वपरवाक्यानाम् आकाङ्क्षितयोग्य-विशेषसमर्पकतया अनुरोद्धव्यमिदम् इत्यवगम्यते ।

एवं तत्त्वपरस्यास्य सूक्तस्य देवताविशेषपरत्वं दुरपह्नवम् । 'पुरुषो ह वै नारायणोऽकामयत' इति बृहदारण्यके पुरुषशब्दस्य नारायणपरत्वदर्शनात् । किञ्च छान्दोग्ये 'एषा वैष्णवी नाम संहिता एतां प्रयुञ्जन् विष्णुं प्रीणाति' इत्युक्तम् । आथर्वणे अष्टादशमहाशान्तिप्रकरणे तत्तद्दैवत्यशान्तिषु तत्तद्दैवत्यमन्त्रविनियोगावसरे, 'वैष्णव्यां

पुरुषसूक्तम्' इति वैष्णव्यां शान्तौ पुरुषसूक्तं विनियुज्यते । तथा 'आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम्' इत्यादिना शौनकेन भगवत्समाराधने, 'जितं ते' इत्यादिमन्त्रतुल्यं विनियुज्यते । महापुरुषशब्दाश्च कल्पसूत्रकारैः देवताविशेष एव प्रयुक्तः, 'महादेवं वा महापुरुषं वाऽर्चयेत्' इति । इह च, 'वेदाहमेतं पुरुषं महान्तम्' इत्युच्यते ।

अतश्च भगवदसाधारण्यम् । तथा 'पुरुषस्य हरेस्सूक्तं स्वर्ग्यं धन्यं यशस्करम्' इति च स्मर्यते । तथा 'योऽनूचानं द्विजं मर्त्यो हतवान् अर्थलोभतः ।

स पठेत् पौरुषं सूक्तं स्मरन् विष्णुं जले सकृत्' इति यमस्मृतौ रहस्यप्रायश्चित्तेषूक्तम् । तथा योगवासिष्ठे,

'आसीनः प्राङ्मुखः शुद्धः चिन्तयन् मनसा हरिम् ।

पौरुषेणैव सूक्तेन जुहुयाद्धव्यवाहनम्' ।। इत्युक्तम् । लक्ष्मीपतिप्रतिपादकोत्तर-नारायणसमानप्रकरणं चेदम् । 'सहस्रशीर्षापुरुषः' 'पुरुष एवेदं सर्वम्' इति नारायणानुवाकैकार्थ्यञ्च प्रतीयते । 'पुरुष एवेदं सर्वम्' इति वाक्येन सुबालोपनिषदैकार्थ्यञ्च प्रतीयते । तत्र हि, 'दिव्यो देव एको नारायणः' इति नारायणपरत्वमवगम्यते । तत्र च, 'पुरुष एवेदं सर्वम्' इत्युपसंहतम् ।

तथा पाद्मे पुराणे -

'ब्रह्महत्यादिपापानां सर्वेषामपनुत्तये ।

पठेत्तु पौरुषं सूक्तमेकान्ते संस्मरन् हरिम्' ।। इत्युच्यते ।

तथा स्कान्दे -

'यथा भास्करशब्दोऽयमादित्ये प्रतितिष्ठते ।

यथा चाग्नौ बृहद्भानुर्यथा वायौ सदागतिः ।।

यथा पुरुषशब्दोऽयं वासुदेवे प्रतिष्ठते (प्रतिष्ठितः?) ।

तथा शङ्करशब्दोऽयं महादेवे प्रयुज्यते' इति शंकरशब्ददृष्टान्तत्वेन पुरुषशब्दस्य भगवदसाधारणत्वकथनाच्च पुरुषसूक्तस्य तदसाधारण्यं प्रतीयते । पाद्मे पुराणे नामनिर्वचनाध्याये,

'पूस्सञ्ज्ञे तु शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।

शकारस्य षकारोऽयं व्यत्यासेन प्रयुज्यते ।।

यद्वा पुरे शरीरेऽस्मिन् आस्ते स पुरुषो हरिः ।

यदि वा पुरि वासीति पुरुषः प्रोच्यते हरिः ।।

यदि वा पूर्वमेवासमिहेति पुरुषं विदुः ।
यदि वा बहुदानाद्वै विष्णुः पुरुष उच्यते ।।
पूर्णत्वात् पुरुषो विष्णुः पुराणत्वाच्च शार्ङ्गिणः ।
पुराणभजनाच्चापि विष्णुः पुरुष ईर्यते ।।

यद्वा पुरुषशब्दोऽयं रूढ्या वक्ति जनार्दनम्' इति च योगरूढत्वमवगम्यते । अतः पुरुषप्रतिपादकं सूक्तं भगवदसाधारणमिति 'चरणाभिधानात्' इति वदता सूत्रकारेण देवताविशेषनिष्कर्षः कृतः । सारे चैवं विशदतममुक्तं भगवता भाष्यकारेण । अतो यथोक्तार्थ उपपन्नः ।।

अत्र 'पादोऽस्येति मन्त्रे' 'त्रिपादस्यामृतं दिवि' इति द्युशब्देन द्योतमानसंविदात्मस्वरूपमुच्यत इति केचिदाहुः । तदानीमस्य दिवीति व्यतिरेकनिर्देशस्य क्लिष्टता स्पष्टा । किञ्च द्युसम्बन्धिप्रत्यभिज्ञापकतया तदेकार्थत्वेन सूत्रकारोदाहृते, 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इति वाक्ये पञ्चम्यन्ततया श्रूयमाणेन द्युशब्देन विरोधश्च स्यात् । न हि द्योतमानम् आत्मस्वरूपं स्वस्वरूपात्परं भवति । दिवि हृदयाकाशे स्थितमिति भास्करः । तदयुक्तम्; 'अतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु' इति श्रुतिविरोधात् । न हि हृदयाकाशो दिव उपरितनेषु लोकेषु वर्तते ।। परमात्मन आदित्यमण्डलेऽपि अवस्थानात् तद्विषयं तद्वाक्यमिति चेन्न; रविमण्डलस्य भूमेर्योजनलक्षेऽवस्थितस्य विश्वप्रपञ्चबहिर्भावाभावात्; विश्वसर्वशब्दयोः भूम्यन्तरिक्षमात्रपरत्वे स्वारस्यभङ्गाच्च । किञ्च सप्तम्यन्तपञ्चम्यन्तयोः द्युशब्दयोः अविरोधेन अर्थैकत्वं चतुर्थसूत्रे समर्थितम्; तच्च तयोः हृदयाकाशरविमण्डलपरत्वेऽनुपपन्नम् । विश्वसर्वशब्दस्वारस्यभङ्गप्रसङ्गादेव द्युशब्दस्य प्रसिद्धद्युपरत्वं चायुक्तम् ।।

जाग्रत्स्वप्नसुषुप्त्यवस्थासु जीवसञ्चारभूमितया त्रेधा विभक्ताः कार्याकाशप्रदेशविशेषास्त्रयः पादाः, तदुपलक्षणं कारणब्रह्मस्वरूपं त्रिपादमृतमुच्यते इति चायुक्तम्; अस्य त्रिपादिति व्यतिरेकनिर्देशस्य अमुख्यत्वात् । जीवस्य जाग्रदवस्थायां बाह्याकाशः सञ्चारभूमिरिति चायुक्तम्; तदानीमपि शरीरान्तर्वर्तित्वात् । स्वप्ने शरीराकाशवर्तित्वमपि अयुक्तम्; ईश्वरसृष्टशरीरैर्बहिरपि अवस्थानात्; तदनभ्युपगमेऽपि पूर्वसंस्कारसहकृतमनोव्यापारमात्रेण हृदयावस्थानेऽपि जीवस्य स्वाप्नभ्रमोपपत्तेः स्वप्ने जीवस्य

हृदयान्निष्क्रमणस्य निष्प्रमाणकत्वाच्च । 'हृदि ह्ययमात्मा' इति जीवस्य स्वतो हृद्यवस्थानं श्रूयमाणं स्वप्नावस्थायां कथं वचनेन विनाऽपोद्यते ।

तस्माद्दचोऽयमर्थः- सर्वा भूतानीति कार्यजगदन्तर्गताचित्संसृष्टचेतना उच्यन्ते । द्युशब्दस्तु समस्तव्यष्टिसमष्टितत्त्वबहिर्भूतस्थानविशेषपरः, 'विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु' इति श्रवणात् । विश्वशब्दविवरणं सर्वशब्द इति गत्यभावलिङ्गम् । 'तथाऽक्षरात्संभवतीह विश्वम्' इति जगदन्तर्वर्तिव्यष्टिजाते विश्वशब्दप्रयोगात् विश्वशब्दो व्यष्टिपरः । सर्वशब्दः परिशेषात् समष्टितत्त्वपरः । अत एव गद्येऽपि गदितं भाष्यकारैः, 'समस्तं कार्यकारणजातमतीत्य वर्तमाने' इति । पुरुषसूक्ते 'ते ह नाकं महिमानः सचन्ते' इति मुक्तप्राप्यदेशस्य नाकशब्देनोक्तत्वात्, मुक्तस्य च दुःखमिश्रकार्यलोकानां हेयत्वात् नास्मा अकं भवतीत्यवयवार्तपौष्कल्योपपत्तेः, तत्रैव 'तमसः परस्तात्' इति विशेषितत्वात्, 'क्षयन्तमस्य रजसः पराके' इति निवासशब्दात् 'तदक्षरे परमे व्योमन्', 'विश्वं पुराणं तमसः परस्तात्' इति तमसः परस्य स्थानस्य स्थानिनो ब्रह्मणश्च व्यतिरेकनिर्देशात्, तस्य तमसः परत्वविशेषणेन पुरुषसूक्तप्रत्यभिज्ञानाच्च दिवीत्यप्राकृतं स्थानमुच्यते । त्रिपात्त्वञ्च अप्राकृतैः भोग्यभोगोपकरणभोगस्थानविशेषैः वा भूषणास्त्रादिरूपेण जगदन्तर्गतवस्त्वभिमानिभिः नित्यैः, भगवदनुभवमात्रपरैश्च नित्यसिद्धैः, मुक्तैश्चात्मभिर्वा संभवति । एवञ्चास्य दिवीति व्यतिरेकनिर्देशोऽमृतत्वं च मुख्यं भवतीति ।। (श्रुतप्रकाशिका)

❀❀ ❀❀ ❀❀

आ. मुद्गलोपनिषदि पुरुषसूक्तार्थः

श्रीमत्पुरुषसूक्तार्थं पूर्णानन्दकलेवरम् ।
पुरुषोत्तमविख्यातं पूर्णं ब्रह्म भवाम्यहम् ।।

वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि । वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारमवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ।।

पुरुषसूक्तार्थनिर्णयं व्याख्यास्यामः । पुरुषसंहितायां पुरुषसूक्तार्थः संग्रहेण प्रोच्यते -

सहस्रशीर्षेत्यत्र सशब्दोऽनन्तवाचकः ।
अनन्तयोजनं प्राह दशाङ्गुलवचस्तथा ।। १ ।।
तस्य प्रथमया विष्णोर्देशतो व्याप्तिरीरिता ।
द्वितीयया चास्य विष्णोः कालतो व्याप्तिरुच्यते ।। २ ।।
विष्णोर्मोक्षप्रदत्वं च कथितं तु तृतीयया ।
एतावानिति मन्त्रेण वैभवं कथितं हरेः ।। ३ ।।
एतेनैव च मन्त्रेण चतुर्व्यूहो विभाषितः ।
त्रिपादित्यनया प्रोक्तमनिरुद्धस्य वैभवम् ।। ४ ।।
तस्माद्विराडित्यनया पादनारायणाद्धरेः ।
प्रकृतेः पुरुषस्यापि समुत्पत्तिः प्रदर्शिता ।। ५ ।।
यत्पुरुषेणेत्यनया सृष्टियज्ञः समीरितः ।
सप्तास्यासन्परिधयः समिधश्च समीरिताः ।। ६ ।।
तं यज्ञमिति मन्त्रेण सृष्टियज्ञः समीरितः ।
अनेनैव च मन्त्रेण मोक्षश्च समुदीरितः ।। ७ ।।
तस्मादिति च मन्त्रेण जगत्सृष्टिः समीरिता ।
वेदाहमिति मन्त्राभ्यां वैभवं कथितं हरेः ।। ८ ।।
यज्ञेनेत्युपसंहारः सृष्टेर्मोक्षस्य चेरितः ।
य एवमेतज्जानाति स हि मुक्तो भवेदिति ।। ९ ।। १ ।।

अथ तथा मुद्गलोपनिषदि पुरुषसूक्तस्य वैभवं विस्तरेण प्रतिपादितम् । वासुदेव इन्द्राय भगवज्ज्ञानमुपदिश्य पुनरपि सूक्ष्मश्रवणाय प्रणताय इन्द्राय परमरहस्यभूतं

पुरुषसूक्ताभ्यां खण्डद्वयाभ्याम् उपादिशत् । द्वौ खण्डौ उच्येते । योऽयमुक्तः स पुरुषो नामरूपज्ञानागोचरं संसारिणाम् अतिदुर्ज्ञेयं विषयं विहाय क्लेशादिभिः संक्लिष्टदेवादिजिहीर्षया सहस्रकलावयवकल्याणं दृष्टमात्रेण मोक्षदं वेषमाददे । तेन वेषेण भूम्यादिलोकं व्याप्यानन्तयोजनमत्यतिष्ठत् । पुरुषो नारायणो भूतं भव्यं भविष्यच्चासीत् । स एष सर्वेषां मोक्षदश्चासीत् । स च सर्वस्मान्महिम्नो ज्यायान् । तस्मान्न कोऽपि ज्यायान् । महापुरुष आत्मानं चतुर्धा कृत्वा त्रिपादेन परमे व्योम्नि चासीत् । इतरेण चतुर्थेन अनिरुद्धनारायणेन विश्वानि आसन् । स च पादनारायणो जगत्स्रष्टुं प्रकृतिम् अजनयत् । स समृद्धकामःसन् सृष्टिकर्म न जज्ञिवान् । सोऽनिरुद्धनारायणस्तस्मै सृष्टिम् उपादिशत् । ब्रह्मन् तव इन्द्रियाणि याजकानि ध्यात्वा कोशभूतं दृढं ग्रन्थिकलेवरं हविर्ध्यात्वा मां हविर्भुजं ध्यात्वा वसन्तकालम् आज्यं ध्यात्वा ग्रीष्मम् इध्मं ध्यात्वा शरदृतुं रसं ध्यात्वा एवमग्नौ हुत्व अङ्गस्पर्शात्कलेवरो वज्रं हीष्यते । ततः स्वकार्यान् सर्वप्राणिजीवान् सृष्ट्वा पश्चाद्याः प्रादुर्भविष्यन्ति । ततः स्थावरजङ्गमात्मकं जगद्भविष्यति । एतेन जीवात्मनोर्योगेन मोक्षप्रकारश्च कथित इत्यनुसंधेयम् । य इमं सृष्टियज्ञं जानाति मोक्षप्रकारं च सर्वमायुरेति ।। २ ।।

एको देवो बहुधा निविष्ट अजायमानो बहुधा विजायते । तमेतम् अग्निर् इत्यध्वर्यव उपासते । यजुर् इत्येष हीदं सर्वं युनक्ति । साम इति छन्दोगाः । एतस्मिन् हीदं सर्वं प्रतिष्ठितम् । विषमिति सर्पाः । सर्प इति सर्पविदः । ऊर्गिति देवाः । रयिरिति मनुष्याः । मायेत्यसुराः । स्वधेति पितरः । देवजन इति देवजनविदः । रूपमिति गन्धर्वाः गन्धर्व इत्यप्सरसः । तं यथा यथोपासते तथैव भवति । तस्माद् ब्राह्मणः पुरुषरूपं परंब्रह्मैव अहमिति भावयेत् । तद्रूपो भवति । य एवं वेद ।। ३ ।।

तद्ब्रह्म तापत्रयातीतं षट्कोशविनिर्मुक्तं षडूर्मिवर्जितं पञ्चकोशातीतं षड्भावविकार-शून्यम् एवमादिसर्वविलक्षणं भवति । तापत्रयं तु आध्यात्मिक आधिभौतिक आधिदैविकं कर्तृकर्मकार्य-ज्ञातृज्ञानज्ञेय-भोक्तृभोगभोग्यम् इति त्रिविधम् । त्वङ्मांसशोणिता-स्थिस्नायुमज्जाः षट्कोशाः । कामक्रोधलोभमोहमदमात्सर्यम् इति अरिषड्वर्गः । अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया इति पञ्च कोशाः । प्रियात्मजननवर्धन-परिणामक्षयनाशाः षड्भावाः । अशनायापिपासाशोकमोहजरामरणानीति षडूर्मयः । कुलगोत्रजातिवर्णाश्रमरूपाणि षड्भ्रमाः । एतद्योगेन परमपुरुषो जीवो भवति नान्यः । य एतदुपनिषदं नित्यमधीते सोऽग्निपूतो भवति । स वायुपूतो भवति । स आदित्यपूतो

भवति । अरोगी भवति । श्रीमांश्च भवति । पुत्रपौत्रादिभिः समृद्धो भवति । विद्वांश्च भवति । महापातकात्पूतो भवति । सुरापानात्पूतो भवति । अगम्यागमनात्पूतो भवति । स्वर्णस्तेयात्पूतो भवति । वेदिजन्महानात्पूतो भवति । गुरोः अशुश्रूषणात्पूतो भवति । अयाज्ययाजनात्पूतो भवति । अभक्ष्यभक्षणात्पूतो भवति । उग्रप्रतिग्रहात्पूतो भवति । परदारगमनात्पूतो भवति । कामक्रोधलोभमोहेर्ष्यादिभिः अबाधितो भवति । सर्वेभ्यः पापेभ्यो मुक्तो भवति । इह जन्मनि पुरुषो भवति । तस्मात् एतत्पुरुषसूक्तार्थम् अतिरहस्यं राजगुह्यं देवगुह्यं गुह्यादपि गुह्यतरं नादीक्षिताय उपदिशेत् । नानूचानाय नायज्ञशीलाय नावैष्णवाय नायोगिने न बहुभाषिणे नाप्रियवादिने नासंवत्सरवेदिने नातुष्टाय नानधीतवेदाय उपदिशेत् । गुरुरपि एवंविच्छुचौ देशे पुण्यनक्षत्रे प्राणानायम्य पुरुषं ध्यायन् उपसन्नाय शिष्याय दक्षिणकर्णे पुरुषसूक्तार्थम् उपदिशेत् विद्वान् । न बहुशो वदेत् । यातयामो भवति । असकृत्कर्णमुपदिशेत् । एतत्कुर्वाणोऽध्येताऽध्यापकश्च इह जन्मनि पुरुषो भवति इत्युपनिषत् ।। ४ ।।

वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि । वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारमवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ।।

।। इति मुद्गलोपनिषदि पुरुषसूक्तार्थः समाप्तः ।।

इ. श्रीपाञ्चरात्रे पराशरसंहितायां पुरुषसूक्तस्य विनियोगः

[विशिष्टपरमधर्मशास्त्रे सप्तमोऽध्यायः]

श्रीभगवानुवाच -

अथ वक्ष्ये विधानेन पुंसूक्तस्य चतुर्मुख ।
न्यासध्यानादिकं सम्यक् विष्णुपूजादिसिद्धये ।। १ ।।

पुरुषसूक्तस्य ऋष्यादिलक्षणम् -

अस्य श्रीपुरुषसूक्तस्य ऋषिर्ब्रह्मेति कथ्यते ।
अनुष्टुप् छन्दः इत्युक्तः पुरुषोदेवता सदा ।। २ ।।
परब्रह्मपदं चोक्त्वा रूपे नारायणेति च ।
प्रणवादि ततो ब्रह्मन् वदेत् ध्यायन् हरिं तथा ।। ३ ।।
सहस्रशीर्षापुरुष इति बीजं ततः परम् ।
साध्या स्सन्ति परं चोक्त्वा वेदर्चेति क्रमात् द्विजः ।। ४ ।।
ह्रीं बीजमिति देहादे क्लीं शक्तिरिति च क्रमात् ।
अं कीलकं रं कवचं लमस्त्रमिति चोच्चरेत् ।। ५ ।।

ऋग्भिः अङ्गन्यासः -

श्यामो वर्ण इति प्रोक्तं ऋचा न्यासं इमं वदेत् ।
प्रणवेन करन्यासं षट्पदैस्सह विन्यसेत् ।। ६ ।।
तान्त्रिकेन षडंगं तु न्यासं कुर्याच्च षट्स्वरैः ।
व्याप्यं तद्व्यापकं कुर्यात् तारबीजेन स द्विजः ।। ७ ।।
प्रथमां विन्यसेत् वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा ।। ८ ।।
पञ्चमीं वामजानौ तु षष्टिं दक्षिणतस्तथा ।
सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा ।। ९ ।।
नवमीं नाभिमध्ये तु दशमीं हृदये तथा ।
एकादशीं वामबाहौ द्वादशीं दक्षिणे तथा ।। १० ।।
त्रयोदशीं कण्ठदेशे आस्यदेशे चतुर्दशीम् ।
अक्ष्णोः पंचदशीं न्यस्य षोडशीं मूर्ध्नि विन्यसेत् ।। ११ ।।
एवं न्यासविधिं कृत्वा पञ्चांगानि समाचरेत् ।
प्रायश्चित्ते जपे चैव विष्णोराराधने तथा ।। १२ ।।

पुंसूक्त जपविधिः -

सर्वालंकारसंयुक्त सर्वायुधधरं विभुम् ।
विष्णुं तद्वासुदेवं तं नारायणमनामयम् ।। १३ ।।
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगळम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ।
इति ध्यानं तथा कृत्वा पुंसूक्तजपमाचरेत् ।। १४ ।।
उत्तिष्ठन्मन्त्रसिद्ध्यर्थं अयुतं जपमाचरेत् ।
सर्वपापविनाशार्थं विष्णुसायुज्यसिद्धये ।। १५ ।।
महापापयुतो विप्रः पुंसूक्तजपमाचरेत् ।
धर्मकामार्थमोक्षार्थं एतदेव जपेत् द्विजः ।। १६ ।।
तन्मन्त्रफलसिद्ध्यर्थं यथाकालं जपेत् द्विजः ।
कर्पूरचन्दनेनैव सहस्रं तर्पयेत्तथा ।। १७ ।।
तिलैर्वा पायसेनैव अपामार्गैरुदुम्बरैः ।
तथा गोघृतसम्मिश्रं होमं कुर्यात् सहस्रकम् ।। १८ ।।

पुरुषसूक्तजपफलम् -

रोगाद्युपद्रवोपेतो दक्षिणाद्यैस्तथा द्विजः ।
मोक्षे ऋक्षेप्यनुज्ञाते सुपुत्रप्रापणेपि च ।। १९ ।।
सर्वकामफलावाप्तौ आरोग्ये मृत्युनाशने ।
चातुरंगविधानेन जपमेतत् समाचरेत् ।। २० ।।
मोक्षार्थी विष्णुपूजायां एकवारं जपेत् सदा ।
योऽनूचानो द्विजो मर्त्यो हतवानर्थलोभतः ।। २१ ।।
स जपेत् पौरुषं सूक्तं जलस्थश्चिन्तयेत् हरिम् ।
पुंसूक्तन्यासमन्त्रेण विष्णुरूपी भवेत् द्विजः ।। २२ ।।
किमुताल्पफलान् भोगान् पुंसूक्तस्य फलस्य च ।
पुंसूक्तस्य च माहात्म्यं वक्तुं श्रोतुं सुदुर्लभम् ।। २३ ।।
देवतानां ऋषीणां च सत्यमेव चतुर्मुख ।। २४ ।।

।। श्रीपाञ्चरात्रे पराशर संहितायां पुरुषसूक्तस्य विनियोगः समाप्तः ।।

ई. अहिर्बुध्न्यसंहितायां पुरुषसूक्तस्य विशेषार्थः

[अध्यायः ५९]

अहिर्बुध्न्यः -

संभारा देवपत्न्यश्च दक्षिणा हृदयानि च ।
रुद्रा ब्रह्माणि चेत्येतन्निगदेन निरूप्यते ।। १ ।।
सूक्तं तु पौरुषं पुंसः परस्मादुत्थितं पुरा ।
जगद्धिताय लक्ष्म्याश्च श्रीसूक्तं तत् समुद्गतम् ।। २ ।।
नानाभेदप्रपाठं तत् पौरुषं सूक्तमुच्यते ।
ऋचश्चतस्रः केचित्तु पञ्च षट् सप्त चापरे ।। ३ ।।
ऋचः षोडश चाप्यन्ये तथाष्टादश चापरे ।
अधीयते तु पुंसूक्तं प्रतिशाखं तु भेदतः ।। ४ ।।
समस्तजगदुत्पत्तिहेतुः स्वर्गापवर्गदः ।
पौरुषो मानुषो यज्ञः सूक्तेऽस्मिन् प्रतिपाद्यते ।। ५ ।।
तत्राद्याभिश्चतसृभिश्चातुरात्म्यं विविच्यते ।
यः परः पुण्डरीकाक्षः परमात्मा सनातनः ।। ६ ।।
या च सा जगतां योनिर्लक्ष्मीस्तद्धर्मधर्मिणी ।
भगवान् वासुदेवोऽसावाद्यया प्रतिपाद्यते ।। ७ ।।
सहस्रा सहगा यस्य सहभावमुपेयुषी ।
श्रीर्नाम परमा शक्तिः पूर्णषाड्गुण्यविग्रहा ।। ८ ।।
निःसक्तासक्तको यश्च नित्यं सन् सकलाश्रयः ।
सहस्रशीर्ष इत्येवं भगवान् परिगीयते ।। ९ ।।
पूर्णत्वात् पुरुषो नित्यं पृणातेः पूरणार्थकात् ।
अश्नोतेरथवाश्नातेरक्षोऽजेरञ्जतेरुत ।। १० ।।
अक्षः पुरुष उद्दिष्टो यः प्रकृत्याश्रितो विभुः ।
पद्यतेः परिणामार्थात् पादित्येष निरुच्यते ।। ११ ।।
पादिति प्रकृतिः प्रोक्ता सा नित्यपरिणामिनी ।
षण्णां गुणानां मध्ये या शक्तिः सा हस्र उच्यते ।। १२ ।।
प्रधानपुरुषौ तस्याः सृतौ सर्गे सनातनौ ।
तामेवापि श्रितावन्ते तौ सहस्रावतः स्मृतौ ।। १३ ।।

सहस्रपुरुषाव्यक्तः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वेत्येतेनैव निरूप्यते ।। १४ ।।
यदतीत्य सृतं विश्वं नानासत्तात्मनः स्थितिः ।
कार्ये हि कारणेयत्ता पयसो दधिसंभवे ।। १५ ।।
कार्यं सत्संततौ क्वापि कार्येयत्तैव कारणे ।
मधूच्छिष्टमये पिण्डे यथाकारवियोगिनी ।। १६ ।।
नैवं भगवतः सर्गे प्रतिसर्गेऽपि वा सति ।
कार्येयत्तात्वमस्तीति स भूमिमिति वर्ण्यते ।। १७ ।।
भगवत्यार्जितानीति शुद्धाशुद्धमयानि च ।
भूमिं जगदुपादानं भूमिशक्तिरिहोच्यते ।। १८ ।।
शुद्धाशुद्धविभागो यः कालपुंप्रकृतिस्थितिः ।
स भूमिं विश्वतो वृत्वा विष्टभ्य स्वेन तेजसा ।। १९ ।।
स्वसंकल्पस्वरूपेण प्रभवाप्ययवेलयोः ।
अत्यतिष्ठदतीत्यैव स्थितो भूयो दशाङ्गुलम् ।। २० ।।
दशाङ्गुलिभिरानन्त्यं कारणस्योपदिश्यते ।
अथ संकर्षणावस्था जगद्धेतुर्निरूप्यते ।। २१ ।।
यदिदं दृश्यते विश्वं भूतभव्यात्मरूपकम् ।
इदं पुरुष एवादौ सिसृक्षायामभूत् किल ।। २२ ।।
पुरुषः स्यन्दति व्यक्तं सम्यग्विज्ञानयोजनात् ।
अतः पुरुष इत्येवं संकर्षण उदीर्यते ।। २३ ।।
तिलकालकवद् विश्वं बिभ्रच्चिदचिदात्मकम् ।
संकर्षण उदेति स्म स एवं पुनरुच्यते ।। २४ ।।
उतामृतत्वस्येशान इति तस्यार्थ उच्यते ।
अन्नेन भोग्यभूतेन प्रकृतिप्राकृतात्मना ।। २५ ।।
कालसंकलितेनैव नानाकारविधाजुषा ।
अचिदंशेन जीवात्मा यश्चिदंशोऽधिरोहति ।। २६ ।।
स्वस्यासंबन्धपूर्वं यः पूर्वसङ्गवशादिह ।
तस्य सद्गुणसंसर्गान्नानाबन्धक्षये सति ।। २७ ।।

अमृतत्वं स्वरूपाविर्भावमोक्षापराह्वयम् ।
तस्य संकर्षणो देव ईशानो ज्ञानदेशनात् ।। २८ ।।
संसारानलसंतप्तचेतनानुजिघृक्षया ।
संकर्षणोदयो विष्णुरुच्यतेऽथ तृतीयया ।। २९ ।।
एतावानस्य महिमा विष्णोः संकर्षणात्मनः ।
यदयं धृतवान् विश्वं समुन्मीलनमादिमम् ।। ३० ।।
ज्यायानतोऽपि पुरुषः प्रद्युम्न उपकारतः ।
पुरू प्रकृतिपुंरूपौ पुरुषः सृजतीति यत् ।। ३१ ।।
विश्वोपकारचेष्टाभिर्ज्यायस्त्वं तस्य वर्ण्यते ।
ऋचा तुरीयया सूक्ते त्रिपादूर्ध्व उदैदिति ।। ३२ ।।
देवोऽपरिमितेहः सन्निनिरुद्धो निरूप्यते ।
पुरा सीदति कार्याणि कारयन् प्राणिनोऽखिलान् ।। ३३ ।।
फलानि पुरुषेभ्यश्च सनोति क्रिययार्चितः ।
ततः पुरुष इत्येवमनिरुद्धोऽभिधीयते ।। ३४ ।।
पुरि सन् सन् पुरीवायं पुरादूर्ध्वमुदैत् परात् ।
तदवस्थेन नाघ्रातमित्यर्थोऽयमिहोच्यते ।। ३५ ।।
पादोऽस्यैकांश एवेह चेतनाचेतनात्मकः ।
अन्तर्यामितया व्याप्तिस्तत्तन्नियमनेच्छया ।। ३६ ।।
एतदेव व्यनक्तीह ततो विष्वङ्ङिति त्वृचा ।
विष्वक् समन्ततो भूत्वा व्यक्रामत् प्राविशद् बहु ।। ३७ ।।
साशनानशने प्रोक्ते चेतनाचेतने उभे ।
तस्माद् विराडिति प्रोक्ता विराड् विद्या पराह्वया ।। ३८ ।।
हिरण्यगर्भो विश्वात्मा स पूरुष इहोच्यते ।।

।। श्रीपाञ्चरात्रे अहिर्बुध्न्यसंहितायां विशेषार्थः समाप्तः ।।

उ. महार्णवकर्मविभागे - ऋग्विधानोक्त पुरुषसूक्तस्य - प्रयोगः

[तरङ्गः - ७]

१. **अथ षोडशर्चस्य पुरुषसूक्तस्य न्यासविधिः ।**

ऋग्विधाने - वक्ष्ये पुरुषसूक्तस्य विधानं त्वर्चनं प्रति ।
अग्निकार्यं जपविधिं स्तोत्रं चैव तदात्मकम् ।। १ ।।
कुर्याद्यथोक्तविधिना प्राङ्मुखश्शुद्धमानसः ।
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ।। २ ।।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा ।
पञ्चमीं वामजानौ तु षष्ठीं चैव तु दक्षिणे ।। ३ ।।
सप्तमीं वामकट्यां तु दक्षिणायां तथाऽष्टमीम् ।
नवमीं नाभिमध्येतु दशमीं हृदि विन्यसेत् ।। ४ ।।
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके ।
त्रयोदशीं दक्षिणे च मुखमध्ये चतुर्दशीम् ।। ५ ।।
अक्ष्णोः पञ्चदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् ।
एवं न्यासविधिं कृत्वा पश्चाद्धोमं समाचरेत् ।। ६ ।।

होमं समाचरेदिति उपलक्षणम् तस्मात् जपे होमे पूजायां च अयमेव न्यासप्रकारः ।

एवं न्यासविधिं कृत्वा पञ्चाङ्गानि समाचरेत्
ब्राह्मणोऽस्येत्यादिकाभिः ऋग्भिः पञ्चाङ्गकल्पना ।। ७ ।।

(ऋ.वि.५१४-५२०)

ब्राह्मणोऽस्य मुखमासीदित्याद्याः पञ्चर्चः पञ्चाङ्गन्यासे ग्राह्या आश्वलायनपाठक्रमयुक्ताः । हृदयं शिरश्शिखा कवचम् अस्त्रं चेति पञ्चाङ्गानि । ब्राह्मणोऽस्य मुखमिति ऋचं पठित्वा हृदयाय नम इति हृदये । चन्द्रमा मनस इति पठित्वा शिरसे स्वाहा इति । शिरसि । नाभ्या आसीदिति पठित्वा शिखायै वषडिति शिखायाम् । सप्तास्यासन्निति पठित्वा कवचाय हुमिति कवचम् । यज्ञेन यज्ञमिति पठित्वा अस्त्राय फड् इत्यस्त्रम् ।

एतच्च न्यासद्वयं सङ्कल्पानन्तरं कर्तव्यम् । तद्यथा अमुकदेशे अमुक काले अमुककामनया पुरुषसूक्तस्य जपं पुरुषसूक्तेन होमम् आराधनं वा करिष्य इति सङ्कल्प्य । पूर्वोक्तन्यासद्वयं विधाय ऋषिदेवताछन्दांस्यपि विदित्वा जपादिकर्म समाचरेत् । तत्र च यदा जपो होमो वा क्रियते तदाऽपि परमपुरुषं समाराध्य जपहोमश्च कार्य इति ।।

२. पुरुषसूक्तऋग्विधानपूजा, अथ आराधनप्रकारोऽभिधीयते-

आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम् ।
द्वितीययाऽऽसनं दद्यात् पाद्यं चैव तृतीयया ।। ८ ।।
चतुर्थ्याऽर्घ्यं प्रदातव्यं पञ्चम्याऽऽचमनं तथा ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ।। ९ ।।
यज्ञोपवीतमष्टम्या नवम्याऽऽभरणं तथा ।
दशम्या गन्धदानं स्यादेकादश्या च माल्यकम् ।। १० ।।
द्वादश्या धूपदानं स्यात् त्रयोदश्या प्रदीपकम् ।
चतुर्दश्या तु नैवेद्यं पञ्चदश्या नमस्क्रियाम् ।। ११ ।।
उद्वासनं तु षोडश्या उपचारास्तु षोडश ।
स्नाने वस्त्रे च नैवेद्ये दद्यात् आचमनीयकम् ।। १२ ।।
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरम् ।। १३ ।।
दक्षिणान्तु यथाशक्ति षोडशेन प्रदापयेत् ।
ततः प्रदक्षिणं कृत्वा जपं कुर्यात् समाहितः ।। १४ ।।
यथा शक्ति जपित्वा च सूक्तं चास्मै निवेदयेत् ।। (ऋ.वि. ५२१-५२७)

अत्र पूजादि साद्गुण्यार्थं या दक्षिणा दीयते तां षोडशेन ऋचा यज्ञेन यज्ञम् इत्यनया दद्यादित्यर्थः ।।

३. पुरुषसूक्तहोमविधिः

देवस्य दक्षिणे भागे कुण्डं स्थण्डिलमेव वा ।
कारयेत् प्रथमर्चा तु प्रोक्षणं तु द्वितीयया ।। १५ ।।
तृतीययाऽग्निमादद्ध्याच्चतुर्थ्या तु समिन्धनम् ।
पञ्चम्या त्वाज्य संस्कारं चरोश्च श्रपणं तथा ।। १६ ।।
षष्ठ्याऽनलस्य मध्ये तु कल्पयेत् पद्ममासनम् ।
चिन्तयेत्तत्र देवेशं कालानलसमप्रभम् ।। १७ ।।
विवृतास्यं वाहशीर्षं रक्तास्यं रक्तलोचनम् । (ऋ.वि.५२७-५२८)

वाहः - हय इत्यर्थः । एवं ध्यात्वा सप्तम्यादिभिः पञ्चऋग्भिः क्रमेण गन्धादि नैवेद्यान्तां पञ्चोपचारपूजां देवस्यानुज्ञया कुर्याद् इत्याह -

ततो गन्धञ्च पुष्पञ्च धूपदीपनिवेदनम् ।। १८ ।।

अनुज्ञाप्य ततः कुर्यात् सप्तम्यादि यथाक्रमम् ।
समिधः प्रत्यृचं पूर्वं जुहुयादभिघारिताः ।। १९ ।।
ततो घृतेन जुहुयाच्चरुणा च पुनः पुनः ।
एवं हुत्वा ततः स्नात्वा समीपे स्तोत्रमुच्चरेत् ।। २० ।।
जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ।। २१ ।।
नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे ।
ओं नमो (भगवते) वासुदेवाय शुद्धज्ञानविभाविने ।। २२ ।।
देवानां दानवानां च सामान्यमधिदैवतम् ।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ।। २३ ।।
एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ।
अध्यक्षश्चानुमन्ता च गुणमायासमावृतः ।। २४ ।।
संसारसागरं घोरम् अनन्तक्लेशभाजनम् ।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ।। २५ ।।
न ते रूपं न चाकारो नायुधानि नचास्पदम् ।
तथाऽपि पुरुषाकारो भक्तानां त्वं प्रकाशसे ।। २६ ।।
नैव किञ्चित् परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ।
नैव किञ्चिदसिद्धं ते न च सिद्धोऽसि कस्यचित् ।। २७ ।।
कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।
योगानां परमां सिद्धिं परमं ते पदं विदुः ।। २८ ।।
अहं भीतोऽस्मि देवेश संसारेऽस्मिन् भयावहे ।
पाहि मां पुण्डरीकाक्ष न जाने शरणं परम् ।। २९ ।।
कालेष्वपि च सर्वेषु सर्वावस्थासु चाच्युत ।
शरीरेऽपि गतौ चापि वर्द्धते मे महद्भयम् ।। ३० ।।
त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ।
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ।। ३१ ।।
विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमार्जितम् ।
जन्मान्तरेऽपि मे देव माभूदस्य विपर्ययः ।। ३२ ।।

दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ।
यदि नाशं न विन्देत तावतास्मिकृती सदा ।। ३३ ।।
अकामकलुषं चित्तं मम ते पादयोः स्थितम् ।
कामये वैष्णवत्वं तु सर्वजन्मसु केवलम् ।। ३४ ।।
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किंकरोऽस्मि हृषीकेश भूयोभूयोऽस्मि किंकरः ।। ३५ ।।
इत्येवमनया स्तुत्या स्तुत्वा देवं दिने दिने ।
किंकरोस्मीति चात्मानं देवायैव निवेदयेत् ।। ३६ ।।

(ऋ.वि.५३०-५४९)

जितन्ते पुण्डरीकाक्ष इत्यारभ्य एतावत्पर्यन्तं स्तोत्रम् । अथ फलविशेषकर्तव्य विशेषप्रशंसा च -

पुरुषस्य हरेस्सूक्तं स्वर्ग्यं धन्यं यशस्करम् ।
आत्मज्ञानमिदं पुण्यं योगज्ञानमिदं परम् ।। ३७ ।।
फलाहारो जपेन्नित्यं पश्यन्नात्मानमात्मनि ।
फलानि भुक्त्वोपवसेन्मासमद्भिश्च वर्तयेत् ।। ३८ ।।
अरण्ये निवसेन्नित्यं जपन्निममृषिं मुनिः ।
ऋग्भिस्त्रिषवणं काले स्नायादप्सु समाहितः ।। ३९ ।।

(ऋ.वि.५५०-५५२)

ऋषिशब्दस्य मन्त्र इत्यर्थः । इममृषिं पुरुषसूक्तात्मकम् । ऋग्भिस्त्रिषवणमिति - पुरुषसूक्तान्तर्गताभिः समस्ताभिः ऋग्भिः । स्नानकाले एताभिः ऋग्भिः सम्मार्जनं अघमर्षणसूक्तं च कुर्यादित्यर्थः ।

आदित्यमुपतिष्ठेत सूक्तेनानेन नित्यशः ।
आज्याहुतीरनेनैव हुत्वैवं चिन्तयेदृषिम् ।। ४० ।। (ऋ.वि. ५५३)

अत्र ऋषिः सूक्तद्रष्टा नारायण एव । तं चिन्तयेत् । एवं मासं फलाहारं मासम् उदकाहारञ्च कृत्वा त्रीणि च वर्षाणि फलाहारस्सन् पौरुषं सूक्तं जपेत् । पाकश्चेत् द्वादश वर्षाणि । एवं कृते साक्षात् देवो दृश्यत इत्याह -

अर्द्धमासं फलाहारस्त्रिभिर्वर्षैर्जपेदिदम् ।
तद्भक्तस्तन्मनायुक्तो दशवर्षाण्यनन्यभाक् ।। ४१ ।।

साक्षात्पश्यति तं देवं नारायणमनामयम् ।
ज्ञानगम्यं परं सूक्ष्मं व्याप्य सर्वमवस्थितम् ।। ४२ ।।
ग्राह्यमत्यन्तयत्नेन स्त्रष्टारं जगतोऽव्ययम् ।
यद्यनासाद्यमानोऽपि भक्तिं न परिहारयेत् ।। ४३ ।।
भक्तानुकम्पी भगवान् जायते पुरुषोत्तमः ।
येन येन च कामेन जपेत्तत् प्रयतस्सदा ।। ४४ ।।
स सकामस्समृद्धस्स्याच्छ्रद्धधानस्य कुर्वतः ।
होमं वाऽप्यथवा जप्यम् उपहारमथैव तु ।। ४५ ।।
कुर्वीत येन कामेन तत्सिद्धिम् उपधारयेत् ।
जातिश्रैष्ठ्यं महद्वित्तं यशो लोके परागतिः ।। ४६ ।।
पापेन विप्रमोक्षश्च भवेत् सर्वं न संशयः ।
अथाभिधीयते कर्म पुत्रकामस्य वैष्णवम् ।। ४७ ।।

(ऋ.वि.५५४-५८०)

शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे ।
द्वादश्यां पुत्रकामस्तु चरुं कुर्वीत वैष्णवम् ।। ४८ ।।
दम्पत्योरुपवासस्स्याद् एकादश्यां सुरालये ।
ऋग्भिष्षोडशभिस्सभ्यगर्चयित्वा जनार्दनम् ।। ४९ ।।
चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया ।
प्राप्नुयाद्वैष्णवं पुत्रमचिरात्सन्तति क्षमम् ।। ५० ।।

(ऋ.वि.४९३-४९४)

अत्र चरुं पुरुषसूक्तेन - स्वगृह्योक्तविधानेन पायस चरुं श्रपयन् पुरुषसूक्तं पठेत् । एवं चरुं श्रपयित्वा पश्चात् पुरुषसूक्तेन जुहुयात् । सूक्तेन इत्येकवचनात् सकलमपि सूक्तम् अविच्छिन्नं होमसाधनम् । नतु प्रत्येकं ऋचः । पक्वहोमस्सहस्रम् । एतद्दशगुणितो जपः ।

अयमर्थः - कृष्णैकादश्यां उपक्रम्य जपित्वा शुक्लैकादश्यां दम्पती उपोष्य द्वादश्यां चरुं श्रपयित्वा सहस्राहुतीर्जुहुयादिति ।

अथापरः प्रकारोऽयमेकादश्यामभोजनम् ।
दम्पत्योः पुरुषस्तत्र नित्यकर्माविरोधिनि ।। ५१ ।।

काले जपेदिदं सूक्तमेकादश्यां निरन्तरम् ।
द्वादश्यां प्रयतो भूत्वा पायसं निर्वपेच्चरुम् ।। ५२ ।।
द्वादश द्वादशीष्वेवं पायसं निर्वपेच्चरुम् ।
हुत्वाऽऽज्यं विधिवच्चात्र ऋग्भिष्षोडशभिर्बुधः ।। ५३ ।।
कृताञ्जलिपुटो भूत्वा स्तवं ताभिः प्रयोजयेत् । (ऋ.वि.४९६-४९७)
समिधोऽश्वत्थवृक्षस्य हुत्वाऽऽज्यं जुहुयात्पुनः ।। ५४ ।।
उपस्थानं हुताशस्य ध्यात्वा च मधुसूदनम् ।
हविर्होमं ततः कुर्यात् प्रत्यृचं वाग्यतश्शुचिः ।। ५५ ।।
हविश्शेषं नम स्कृत्वा नारीनारायणं पतिम् ।
भक्षयित्वा हविश्शेषं लघ्वाशी संविशेत् क्षणम् ।। ५६ ।।

(ऋ.वि.५-३-५०५)

हविश्शेषं भक्षयित्वेति - हुतावशिष्टप्रतिपत्तिकर्मणि सिद्धे लघ्वाशीत्यनेन एतत् द्योतयति । द्वादश्यां आहारान्तरपरित्यागेन पत्नी हविश्शेषं लघु यथा तथा भुङ्क्त इति ।। संविशेदिति - क्षणं वामशायिनीभूयादित्यर्थः ।।

ततः कृत्वा त्विदं कर्म कर्तव्यं द्विजतर्पणम् ।
द्वितीयां स्त्रीं निवर्तेत यावद्गर्भं न विन्दति ।। ५७ ।।
अपुत्रामृतपुत्रा वा या च कन्याः प्रसूयते ।
क्षिप्रं सा जनयेत्पुत्रमृश्यशृङ्गो यथाऽब्रवीत् ।। ५८ ।।

(ऋ.वि.५०६-५-७)

अथ पुरुषसूक्तस्य आर्षादिः - षोडशर्चस्य पुरुषसूक्तस्य नारायणऋषिः, अनुष्टुप् छन्दः अन्त्याः त्रिष्टुप् । जपे होमे अभिषेके आराधने वा विनियोगः इति पुरुषसूक्तस्य न्यासपूजाहोमानां विधिः ।।

।। महार्णवकर्मविभागे ऋग्विधानोक्त पुरुषसूक्तस्य प्रयोगः समाप्तः ।।

४. मन्त्रगताः विशेषशब्दार्थाः

१. **अजावयः** - अजाः छागाः अवयः मेषाः ते उभयेऽपि इत्यर्थः ।

२. **अनशनम्** - स्थावरम् वृक्षगुल्मलतादिरूपम् ।

३. **अन्यः पन्थाः** - मार्गान्तरम् । उपायान्तरम् ।

४. **अमृतत्वम्** - मोक्षत्वम् ।

५. **अमृतः** - मुक्तः ।

६. **अमृतं** - जरामरणादिरहितं नित्यवस्तु जातम् ।

७. **अमृतं** - अविनाशिरूपम् ।

८. **असुराः** - भगवदाज्ञातिवृत्तिशीलाः ।

९. **आरण्यान्** - अरण्ये भवान् आरण्यान् पशून् श्वापादीन् सप्त ।

१०. **ईशानः** - स्वामी ।

११. **उभयादतः** - उभयतोदन्ताः । मुखस्य ऊर्ध्वाधोभागयोः उभयोरपि दन्तवन्तः ।

१२. **ऋचः** - ऋग्वेदाः एकविंशतिशाखाः ।

१३. **ग्राम्याः** - ग्रामे भवाः ग्राम्याः तान् मेषादीन् सप्त ।

१४. **छन्दांसि** - गायत्र्यादीनि ।

१५. **देवाः** - मुमुक्षवः । भगवदाज्ञानुवृत्तिशीलाः

१६. **धाता** - चतुर्मुखः

१७. **धीरः** - धिया रमते इति धीरः । धीमतां अग्रेसरः ।

१८. **पारः** - ऊर्ध्वदेशः ।

१९. **पुरुषः** - नारायणः ।

२०. **पूर्वे** - पुरातनाः ।

२१. **पृषदाज्यम्** - दधिमिश्रमाज्यम् ।

२२. **प्रोक्षन्** - प्रोक्षणसंस्कारमकुर्वन् ।

२३. **महान्तः** - अपरिच्छेद्यस्वरूपगुणविभूतिकः सर्वस्मात्परः ।

२४. **यजुः** - एकाधिकशतशाखाः यजुर्वेदः ।

२५. **यज्ञः** - देवतोद्देशेन द्रव्यत्यागः ।

२६. **विद्वान्** - प्रपन्नः पुरुषः ।

२७. **विराट्** - विशेषेण राजते इति विराट् । परमपुरुषः ।

२८. शक्रः - शचीपतिः इन्द्रः ।

२९. सर्वहुतः - सर्वं हूयतेऽस्मै इति सर्वहुत् तस्मात् । सर्वविधद्रव्यत्यागजन्य-फलभाज इत्यर्थः । सर्वं हूयते इति वा सर्वहुत् । तस्मात् पशुपुत्रादि सर्वविध-फलाभिलाषिकर्तृक अग्नीन्द्रादि सर्वदेवतोद्देश्यक यज्ञाराध्यात् इत्यर्थः ।

३०. साध्याः - प्राप्यभूताः ।

३१. सामानि - सामवेदाः सहस्रशाखाः ।

३२. साशनं - जङ्गमम् देवमनुष्यादिरूपम् ।

५. सङ्केताक्षरसूचनी

अ.पु	अग्निपुराणम्
अ.सं	अथर्वसंहिता
अ.प	अथर्वपरिशिष्टम्
ऋ.सं.	ऋग्वेदसंहिता
ऋ.वि.	ऋग्विधानम्
ऋ.भा.भू.	ऋग्वेदीयभाष्यभूमिका
ऐ.आ.	ऐतरेयारण्यकम्
ऐ.उ.	ऐतरेयोपनिषत्
ऐ.ब्रा.	ऐतरेयब्राह्मणम्
क.उ.	कठोपनिषत्
का.श्रौ.सू.	कात्यायनश्रौतसूत्रम्
के.उ.	केनोपनिषत्
कू.पु.	कूर्मपुराणम्
छां.उ.	छान्दोग्योपनिषत्
जै.सू.	जैमिनीयसूत्रम्
तै.आ.	तैत्तिरीयारण्यकम्
तै.उ.	तैत्तिरीयोपनिषत्
तै.ब्रा.	तैत्तिरीयब्राह्मणम्
तै.सं.	तैत्तिरीयसंहिता
धा.पा.	धातुपाठः
न.क.	नक्षत्रकल्पः
ना.पु.	नारसिंहपुराणम्
नि.	निघण्टु
निर्व.	निर्वचनम्
नृ.उ.ता.	नृसिंहोत्तरतापनीयोपनिषत्
पा.पु.	पाद्मपुराणम्
पा.सू.	पाणिनीयसूत्रम्
पैं.ब्रा.	पैङ्गायनब्राह्मणम्
प्र.उ.	प्रश्नोपनिषत्
बृ.उ.	बृहदारण्यकोपनिषत्
बृ.दे.	बृहद्देवता
ब्र.पु.	ब्रह्मपुराणम्
भ.गी.	भगवद्गीता
भ.पु.	भविष्यपुराणम्
भा.	भागवतम्
महा.ना.उ.	महानारायणोपनिषत्
म.पु.	मत्स्यपुराणम्
म.भा.	महाभारतम्
म.स्मृ.	मनुस्मृतिः
मुं.उ.	मुण्डकोपनिषत्
मो.ध.	मोक्षधर्मम्
य.सं.	यजुर्वेदसंहिता
यम.स्मृ.	यमस्मृतिः
यो.वा.	योगवासिष्ठम्
रा.बा.कां.	रामायणं बालकाण्डः
रा.आ.कां.	रामायणं आरण्यकाण्डः
रा.यु.कां.	रामायणयुद्धकाण्डः
व.पु.	वराहपुराणम्
वा.पु.	वामनपुराणम्
वायु.पु.	वायुपुराणम्
वि.पु.	विष्णुपुराणम्
वि.स्मृ.	विष्णुस्मृतिः
वै.सं.	वैकुण्ठसंहिता
वै.सू.	वैतानसूत्रम्

श.ब्रा.	शतपथब्राह्मणम्
श.स्मृ.	शङ्खस्मृतिः
शां.क.	शान्तिकल्पः
शा.ब्रा.	शाकल्यब्राह्मणम्
श्री.शा.	श्रीशास्त्रम् (पाञ्चरात्रागमः)
स्कं.पु.	स्कन्दपुराणम्
ह.वं.	हरिवंशः

६. ग्रन्थसूचनी (मूलग्रन्थाः भाष्यग्रन्थाश्च)

१. ऋग्वेदसंहिता - श्रीमत्सायणाचार्य विरचित भाष्यसमेता । संपादकः - सोनटक्के काशीकरः । प्रकाशकः - वैदिक संशोधन मण्डलम्, पुणे, १९८३, देवनागरीलिपिः ।

२. शुक्लयजुर्वेदकाण्वसंहिता - सायणभाष्योपेता । संपादकौ - श्रीदिवाकरदासशर्मा, वागीशशास्त्रि श्रीचिन्तामणिमिश्रशर्मा । प्रकाशकः - संपूर्णानन्द संस्कृत विश्वविद्यालयः वाराणसी, १९७८, देवनागरीलिपिः।

३. वाजसनेयि माध्यन्दिन शुक्लयजुर्वेदसंहिता - श्रीमदुवटाचार्यविरचित मन्त्रभाष्येण श्रीमहीधराचार्य कृतवेददीपभाष्येण च समन्विता - संपादकः - पण्डितजगदीशलालशास्त्रि । प्रकाशकः - मोतीलाल बनारसीदास, दिल्ली, १९७८, देवनागरीलिपिः ।

४. तैत्तिरीयसंहिता - भट्टभास्कर - सायणाचार्यविरचित भाष्याभ्यां समेता । संपादकः - सोनटक्के धर्माधिकारि । प्रकाशनम् - महाराष्ट्रतिलकविद्यापीठ वैदिकसंशोधनमण्डलम् - पुणे, १९७०, देवनागरीलिपिः ।

५. तैत्तिरीयारण्यकम् - भट्टभास्कर भाष्योपेतम् । संपादकौ - श्री ए. महादेवशास्त्रि, श्री.के. रङ्गाचार्यः । प्रकाशकः - मोतीलाल बनारसीदास दिल्ली, १९८५, देवनागरीलिपिः ।

६. सामवेदसंहिता - छन्द आर्च्चिकः । भगवत्सायणाचार्येण विरचितभाष्यसहिता । संपादकः - श्रीसत्यव्रतसामश्रमिभट्टाचार्यः । प्रकाशकः - मुन्शीराम् मनोहरलाल्, पब्लिशर्स, १९८३, देवनागरीलिपिः ।

७. अथर्ववेदसंहिता - श्रीमत्सायणाचार्येण विरचितमाधवीयवेदार्थप्रकाशसहिता । संपादकः - शङ्करपाण्डुरङ्गपण्डितः । प्रकाशिका - कृष्णदास अकादमी, वाराणसी, १९८९, देवनागरीलिपिः ।

८. श्वेताश्वतराद्युपनिषत्पुरुषसूक्तभाष्यम् - श्रीरङ्गरामानुजमुनिप्रभृतिपूर्वाचार्यविरचितम् । संपादकः - श्री.उ.वे. उत्तमूर् ति. वीरराघवाचार्यः । प्रकाशकः - श्रीतिरुमल - तिरुपति - देवस्थान मुद्रणालयः, १९५५, देवनागरीलिपिः ।

९. श्रीपुरुषसूक्तभाष्यम् - संपादकः - श्रीजद्गुरु गादि काञ्ची प्रतिवादिभयङ्करानन्ताचार्यस्वामी । प्रकाशकः - श्रीकृष्णमाचार्यस्वामी । १९७४, देवनागरीलिपिः

अनुवादग्रन्थाः

१०. पञ्चसूक्तम् - हिन्दीव्याख्या, व्याख्याकारः संपादकश्च - श्रीवैष्णव स्वामी रामनारायणदासशास्त्री - प्रकाशकः - चौखम्बा संस्कृत सीरीज आफिस् वाराणसी । १९८४

(द्राविडभाषायाम्)

११. पुरुषसूक्तम् - संस्कृतमूलम् - द्राविडभाषाव्याख्यासहितम् । संपादकः - कटलङ्कुटि नटेशशास्त्री । प्रकाशकः - 'शिवकामिविलासमुद्रणालयः' चेन्नै । १९२३ ।

१२. (पुरुषसूक्तादि) पुरुषसूक्तादिषड्सूक्तानि - (सूक्तषड्काणि) । संस्कृतमूलम् द्राविडव्याख्यासहितम् । संपादकः - विद्वान् एम्. रामराव्, नृसिंहाच्चार् प्रकाशकः - माधवश्री वि. कृष्णमूर्ति, होमियोपति मुद्रणालयः, कुम्भकोणम् । १९७९ ।

१३. पुरुषसूक्तम् - संस्कृतमूलम् द्राविडव्याख्यासहितम् । प्रतिपदार्थतात्पर्यार्थ अनुवादसहितम् । संपादकः - अनुवादकश्च - अण्णा । प्रकाशकः - श्रीरामकृष्णमठम् । मयूरपुरी, चेन्न, १९६३-१९६९

(आङ्ग्लभाषायाम्)

१४. पुरुषसूक्तभाष्यम् - व्याख्याकारः श्रीरङ्गनाथमुनिः । संपादकः अनुवादकश्च - वि. कृष्णमाचार्यः । प्रकाशकः - वि.एस्. एफ् मार्ड् बेन्, कार्नर् चेन्नै १९५५ ।

Academy of Sanskrit Research

[An aided Institution, Under the Dept. of Higher Education (Universities)]

Melkote 571 431, Mandya Dist., Karnataka.

Tel : +91-8236-299841, 209178, Tele fax : +91-8236-299981

Email : asrbng@vsnl.com, Website : www.sanskritacademy.org

MISSION : "Bridging the gap from the past to future through the present"

lokeshkdesigner@gmail.com